Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# A DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS

IN THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE.

---

*PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.*

---

VOL. IV.—UPAPURANAS AND STHALAMAHATMYAS.

*SECOND PART.*

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

[PRICE, [illegible] 4 *annas.*] 1908. [2 *shillings.*]

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# A DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS

IN THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE.

*PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.*

VOL. IV.—UPAPURĀṆAS AND STHALAMĀHĀTMYAS.

***SECOND PART.***

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1908.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# CONTENTS.

## CLASS III.

### II. PURĀṆAS.

(2) UPAPURĀṆAS.



| Name of the work. | Numbers. | Pages. |
|---|---|---|
| Ādityapurāṇa ... ... ... ... ... ... | 2338, 2339 | 1599 to 1602 |
| Ānandapurāṇa ... ... ... ... ... ... | 2340 | 1604, 1605 |
| Kanyakāpurāṇa ... ... ... ... ... ... | 2341 | 1605 |
| Kālikāpurāṇa ... ... ... ... ... ... | 2342, 2343 | 1608, 1609 |
| Gaṇēśapurāṇa ... ... ... ... ... ... | 2344 | 1610 to 1612 |
| Nṛsiṁhapurāṇa ... ... ... ... ... ... | 2345 to 2347 | 1612 to 1614 |
| Parāśarapurāṇa . ... ... ... ... ... | 2348 | 1614 & 1615 |
| Basavapurāṇa ... ... ... ... ... ... | 2349 to 2351 | 1616 to 1618 |
| Bhārgavapurāṇa ... ... ... ... ... ... | 2352 to 2355 | 1618, 1619 |
| Bhairavapurāṇa ... ... ... ... ... ... | 2356 | 1620 |
| Mārīcōpapurāṇa ... ... ... ... ... ... | 2357 | 1621 |
| Viṣṇurahasya ... ... ... ... ... ... | 2358 | 1623 |
| Śivapurāṇa ... ... ... ... ... ... | 2359 to 2364 | 1624 to 1631 |
| Skāndōpapurāṇa ... ... ... ... ... ... | 2365 | 1632 |



(3) STHALAMĀHĀTMYAS, ETC.



| | | |
|---|---|---|
| Adhikamāsamāhātmya ... ... ... ... ... | 2366 | 1635 |
| Aruṇācalamāhātmya ... ... ... ... ... | 2367 | 1637 |
| Aṣṭaṣaṣṭiśivasthānāni ... ... ... ... ... | 2368 | 1638 |
| Ahōbilakṣētramāhātmya ... ... ... ... ... | 2369 | 1639 |
| Ādipuramāhātmya ... ... ... ... ... | 2370 | 1641 |
| Uttaragītā ... ... ... ... ... ... ... | 2371 to 2376 | 1643 to 1650 |
| Uttaragītāvyākhyā... ... ... ... ... ... | 2377 to 2379 | 1650 to 1652 |
| Kapilōpākhyāna ... ... ... ... ... ... | 2380 | 1654 |
| Kāñcīmāhātmya ... ... ... ... ... ... | 2381, 2382 | 1656 to 1661 |
| Kārtikamāhātmya ... ... ... ... ... ... | 2383, 2384 | 1661, 1662 |
| Kālahastimāhātmya ... ... ... ... ... | 2385 to 2387 | 1664 to 1667 |
| Kāśīmāhātmya ... ... ... ... ... ... | 2388 | 1668 |
| Kundāraṇyamāhātmya ... ... ... ... ... | 2389 | 1669 |
| Kuruṅgakṣētramāhātmya ... ... ... ... | 2390 | 1672 |
| Kṛṣṇāpuṣkaramāhātmya ... ... ... ... ... | 2391 | 1673 |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



CONTENTS.

(3) STHALAMĀHĀTMYAS, ETC.—(*continued*).


| Name of the work. | Numbers. | Pages. |
|---|---|---|
| Kēralamāhātmya | 2392, 2393 | 1675 to 1678 |
| Kaiśikamāhātmya (Saṭīka) | 2394 to 2397 | 1679 to 1681 |
| Gaṅgāmāhātmya | 2398 | 1681 |
| Gajāraṇyakṣētramāhātmya | 2399 | 1682 |
| Gajēndramōkṣaṇa | 2400 to 2410 | 1685 to 1687 |
| Garalapurīmāhātmya | 2411, 2412 | 1688 to 1691 |
| Garbhagītā | 2413 to 2416 | 1691 to 1693 |
| Gurugītā | 2417 | 1694 |
| Gurumāhātmya | 2418, 2419 | 1696 to 1698 |
| Gōpikāgītā | 2420 to 2424 | 1698 to 1700 |
| Gōvardhanagirimāhātmya | 2425 | 1700 |
| Cāturmāsyamāhātmya | 2426, 2427 | 1702 to 1704 |
| Citrakētūpākhyāna | 2428 | 1704 |
| Cidambaramāhātmya | 2429 | 1706 |
| Tāmraparṇīmāhātmya | 2430 | 1708 |
| Tīrthapraśaṁsā | 2431 | 1714 |
| Tīrthādrimāhātmya | 2432 | 1715 |
| Tulasīmāhātmya | 2433 | 1717 |
| Tulākāvērīmāhātmya | 2434 to 2440 | 1718 to 1721 |
| Tōtādrimāhātmya | 2441, 2442 | 1723 to 1725 |
| Dēvāṅgadacaritra | 2443 | 1726 |
| Dēvīmāhātmya | 2444 to 2460 | 1727 to 1738 |
| Pañcakrōśamāhātmya | 2461 | 1739 |
| Pañcakrōśamahima or Kāśīgītā | 2462 | 1741 |
| Pañcanadakṣētramāhātmya | 2463 | 1741 |
| Paṭṭīśakṣētramāhātmya | 2464 | 1743 |
| Pādatīrthamāhātmya | 2465 | 1747 |
| Pinākinīmāhātmya | 2466, 2467 | 1747 to 1748 |
| Puṇḍarīkapuramāhātmya | 2468 | 1748 |
| Purāṇārthasaṅgraha | 2469 | 1750 |
| Puruṣārthasudhānidhi | 2470, 2471 | 1754 to 1762 |
| Puruṣōttamakṣētramāhātmya | 2472 to 2475 | 1762 to 1765 |
| Puruṣōttamamāhātmya | 2476 | 1766 |
| Badarikāśramamāhātmya | 2477 | 1767 |
| Bilvāraṇyamāhātmya | 2478 | 1769 |
| Bṛndāraṇyakṣētramāhātmya | 2479 | 1771 |
| Bṛndāvanamāhātmya | 2480 | 1773 |
| Brahmagītā | 2481 | 1774 |
| Brahmagītāvyākhyā | 2482 to 2485 | 1776 & 1777 |
| Bhagavadgītāmāhātmya | 2486 & 2487 | 1778, 1779 |
| Bhagavadgītāmāhātmyaślōka | 2488 | 1780 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(3) STHALAMĀHĀTMYAS, ETC.—(continued).


| Name of the work. | Numbers. | Pages. |
|---|---|---|
| Bhāgavatamāhātmya ... ... ... ... ... | 2489 | 1780 |
| Saptāhabhāgavatamāhātmya ... ... ... ... | 2490 | 1785 |
| Maṅgalagirimāhātmya ... ... ... ... ... | 2491 | 1791 |
| Mandākinīdharācalamāhātmya ... ... ... | 2492 | 1792 |
| Māghamāhātmya ... ... ... ... ... | 2493 to 2503 | 1794 to 1799 |
| Mālatīvanamāhātmya ... ... ... ... ... | 2504 | 1800 |
| Mauktikōpākhyāna ... ... ... ... ... | 2505 | 1802 |
| Yādavagirimāhātmya ... ... ... ... ... | 2506 to 2509 | 1804 to 1806 |
| Yādavācalapraśaṁsā ... ... ... ... ... | 2510 | 1806 |
| Rukmāṅgadacaritra ... ... ... ... ... | 2511 to 2513 | 1809 & 1810 |
| Lalitōpākhyāna ... ... ... ... ... ... | 2514 to 2518 | 1811 to 1813 |
| Viduraprajāgara ... ... ... ... ... ... | 2519 | 1814 |
| Vīramāhēśvarakrama ... ... ... ... ... | 2520, 2521 | 1815 to 1817 |
| Vēṅkaṭagirimāhātmya ... ... ... ... ... | 2522, 2524, 2527 to 2535 | 1817 to 1829 1831 to 1837 |
| Vēṅkaṭācalamāhātmya ... ... ... ... ... | 2523 | 1830 |
| Vēṅkaṭēśvarasthalamāhātmya ... ... ... ... | 2525, 2526 | 1831 |
| Vēṇugītā ... ... ... ... ... ... | 2536 | 1838 |
| Vēdāraṇyamāhātmya ... ... ... ... ... | 2537 | 1839 |
| Vaiśākhamāhātmya ... ... ... ... ... | 2538 to 2541 | 1841 to 1843 |
| Vaiśyacaritra ... ... ... ... ... ... | 2542 & 2543 | 1843 to 1847 |
| Śaṅkaragītā ... ... ... ... ... ... | 2544 | 1849 |
| Śivagaṅgāmāhātmya ... ... ... ... ... | 2545 | 1850 |
| Śivagītā ... ... ... ... ... ... ... | 2546 to 2550 | 1851 to 1854 |
| Śivagītātātparyaprakāśikā ... ... ... ... | 2551 | 1854 |
| Śivagītā (savyākhyā) ... ... ... ... ... | 2552 & 2553 | 1856 |
| Śivatattvasudhānidhi ... ... ... ... ... | 2554 | 1856 |
| Śivabhaktamāhātmya ... ... ... ... ... | 2555 to 2557 | 1858 to 1860 |
| Śrīkākulakṣētramāhātmya ... ... ... ... | 2558 | 1862 |
| Śrīraṅgamāhātmya ... ... ... ... ... | 2559 to 2569 | 1865 to 1869 |
| Śrutigītā ... ... ... ... ... ... ... | 2570 | 1870 |
| Śrutigītā (savyākhyā) ... ... ... ... ... | 2571 to 2574 | 1870 to 1873 |
| Śrutigītā (Āndhraṭīkāsahitā) ... ... ... ... | 2575 | 1875 |
| Śvētagirimāhātmya ... ... ... ... ... | 2576 & 2577 | 1876 & 1877 |
| Śvētāraṇyamāhātmya ... ... ... ... ... | 2578 | 1880 |
| Saṅgamēśvaramāhātmya ... ... ... ... | 2579 | 1882 |
| Satyakṣētramāhātmya ... ... ... ... ... | 2580, 2581 | 1884 to 1886 |
| Sarpapurakṣētramāhātmya ... ... ... ... | 2582 | 1887 |
| Sālagrāmamahimā ... ... ... ... ... ... | 2583 | 1888 |
| Subrahmaṇyamāhātmya ... ... ... ... | 2584 | 1890 |
| Sūtagītā ... ... ... ... ... ... ... | 2585 | 1891 |
| Sūtagītāvyākhyā ... ... ... ... ... ... | 2586 | 1894 |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(3) STHALAMĀHĀTMYAS, ETC.—(*continued*).


| Name of the work. | Numbers. | Pages. |
|---|---|---|
| Sētumāhātmya ... ... ... ... ... ... | 2587 to 2591 | 1895 to 1899 |
| Sōmōtpatti ... ... ... ... ... ... | 2592 to 2594 | 1900, 1901 |
| Svarṇamukharīmāhātmya ... ... ... ... | 2595 | 1901 |
| Hariścandrōpākhyāna ... ... ... ... ... | 2596 to 2599 | 1904 to 1907 |
| Hastigirimāhātmya ... ... ... ... ... | 2600 to 2605 | 1907 to 1910 |
| Hālāsyamāhātmya ... ... ... ... ... | 2606 to 2609 | 1910 to 1915 |
| Saṅkṣēpahālāsyamāhātmya ... ... ... ... | 2610 | 1915 |

INDEX ... ... ... ... ... ... ... ... ... ... i—x


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# A DESCRIPTIVE CATALOGUE
OF THE
# SANSKRIT MANUSCRIPTS.

## CLASS III.
### II. PURĀṆAS—2. UPAPURĀṆA.

### No. 2338. आदित्यपुराणम्.
### ĀDITYAPURĀṆAM.

Substance, paper. Size, $11\frac{3}{4} \times 7\frac{7}{8}$ inches. Pages, 315. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 66 Adhyāyas.

This is also called Saurapurāṇa and has been published under that name in the Ānandāśrama Sanskrit series. Therein it forms part of the Brahmōpapurāṇa and has a list of the contents. This copy differs from it mainly in the number of the Adhyāyas into which the work is divided.

**Beginning:**

नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने ॥
यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः ।
संहर्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने ॥
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।
मुनीनामाश्रमो नित्यं नैमिशारण्यमुत्तमम् ॥
शौनकाद्या महाभक्ताश्शिवभक्ता महौजसः ।
दीर्घसत्रं प्रकुर्वन्तस्तत्री(त्रे)शानस्य तुष्टये ॥
तस्मिन् सत्रे महाभागो मुनीनां भाग्यगौरवात् ।
आजगाम मुनिर्द्रष्टुं सूतः पौराणिकोत्तमः ॥

193 *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं दृष्ट्वा ते महात्मानो नैमिशारण्यवासिनः ।
प्रहृष्टाः प्रष्टुमुद्युक्ताः पप्रच्छू रोमहर्षणम् ॥

ऋषय ऊचुः—

कृतं भगवता पूर्वमादित्येन महात्मना ।
पुराणं कथितं सूत तन्नो वक्तुमिहार्हसि ॥

कृष्णद्वैपायनात्साक्षात्सर्वं हि विदितं त्वया ।
त्वत्तो नास्ति परं वक्ता पुराणानां महातपाः ॥

* * * *

सूतः—

नत्वा सूर्यं परं धाम ऋग्यजुस्सामरूपिणम् ।
त्रिसन्ध्यं त्रिजगद्योनिं त्रिमार्गस्थं त्रितत्त्वगम् ॥

पुराणं संप्रवक्ष्यामि सौरं शिवकथाप्रियम् ।
यच्छ्रुत्वा मनुजः शीघ्रं पापकञ्चुकमुत्सृजेत् ॥

* * * *

वक्ता यत्र रविस्साक्षाच्छ्रोता तस्य सुतो मनुः ।
माहात्म्यं कथ्यते शम्भोर्नास्त्यस्मादधिकं द्विजाः ॥

इदं पुराणं वक्तव्यं धार्मिकायानसूयवै(वे) ।
द्विजाय श्रद्दधानाय शिवैकार्पितबुद्धये ॥

असीन्मनुस्सूर्यसुतो वर्तते यो महातपाः ।
स कदाचिन्महाभागः कामिकाख्यवनं ययौ ॥

प्रतर्दनस्य नृपतेर्यज्ञे विपुलदक्षिणे ।
तत्त्वं विचारयामासुर्मिथो यत्र महर्षयः ॥

अशक्तास्ते महाभाग भृग्वाद्यास्तत्र निर्णये ।
एवं स्थितेषु विप्रेषु मायया मोहितात्मसु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संशयाविष्टचित्तेषु वागभूदशरीरिणी ।
तपः कुरुध्वं विप्रेन्द्राः तपोऽज्ञाननिबर्हणम् ॥
तपसा प्राप्यते सर्वमिति ते शुश्रुवुर्गिरम् ।
श्रुत्वा तु मुनयस्सर्वे भृग्वाद्या दग्धकिल्बिषाः ॥
मनुं पुरस्कृत्य ययुः क्षेत्रं वै द्वादशात्मनः ।
विश्रुतं द्वादशादित्यमिति लोकेषु तद्द्विजाः ॥
यत्र सन्निहितो नित्यं भानुस्त्रिदशपूजितः ।
तेपुस्तत्र तपो घोरं तत्त्वदर्शनकाङ्क्षिणः ॥
गते वर्षसहस्रे तु सूर्यः प्रत्यक्षतामगात् ।
किमर्थं तप्यसे वत्स सर्वैरेतैर्महात्मभिः ॥
तुष्टोऽहं तव दास्यामि यत्ते मनसि वर्तते ।
एते च मुनयस्सर्वे तपसा दग्धकिल्बिषाः ॥
पश्यन्तु मां परं देवं विश्वान्तर्यामिणं विभुम् ।

* * * *

मनुरुवाच—

किन्तच्छ्रेयस्करं तत्त्वं वेदान्तेषु प्रतिष्ठितम् ।
कस्माद्विश्वमिदं जातं कस्मिन्वा लयमेष्यति ॥
कस्य ब्रह्मादयो देवा वने तिष्ठन्ति सर्वदा ।
तदेकमपरानेकमुभयं वा वध(द)प्रभो ॥
केन वा ज्ञायते सम्यक् कः क दर्शनकाङ्क्षिणि ।
ज्ञाते कस्मिंस्तु किं रूपं तस्य ज्ञानं किमात्मकम् ॥
चरितं तस्य किन्तात किन्तीर्थं तदधिष्ठितम् ।
केषामनुग्रहन्तस्य तीर्थे निवसतां विभो ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्षणञ्च पुराणानां व्रतानाञ्च क्रमं यथा ।
वर्णानामाश्रमाणाञ्च सदाचारविधिः कथम् ॥
कथं वा क्रियते श्राद्धं प्रायश्चित्तविधिः कथम् ।
एतत्सर्वं हि भगवन् स्पष्टं वक्तुमिहार्हसि ॥
एवं मनोर्वचश्श्रुत्वा भगवान्भास्करो द्विजाः ।
यत्पृष्टं तदशेषेण वक्तुं समुपचक्रमे ॥
इत्यादित्यपुराणे प्रथमोऽध्यायः ॥

**End:**

पुण्यं पुराणमखिलमेतद्वः कथितं द्विजाः ।
सौरं शिवकथायुक्तं मोक्षमार्गैकसाधनम् ॥
योऽर्थं विचारयेदस्य पुराणस्य द्विजोत्तमाः ।
सर्वपापविनिर्मुक्तश्शाङ्करं पदमाप्नुयात् ॥
यः पठेच्छ्लोकमेकं वा श्लोकस्यार्धमथापि वा ।
अयने गोप्रदानस्य यत्तत्फलमवाप्नुयात् ॥
श्रावयेच्छ्रद्धया यस्मात्पुराणमिदमुत्तमम् ।
पठितव्यञ्च यत्नेन वर्जयित्वा कथान्तरम् ॥
पुराणस्यास्य पठनाच्छ्रवणाद्वा द्विजोत्तमाः ।
निश्चला गिरिशे भक्तिः भवत्येव हि सर्वदा ॥

**Colophon:**

इत्यादित्यपुराणे मानवीयसंहितायां षट्षष्टितमोऽध्यायः ॥

---

No. **2339.** आदित्यपुराणम्.

ĀDITYAPURĀṆAM.

**Substance**, palm-leaf. Size, 16 × 1¼ inches. **Pages**, 32. **Lines**, 6 on a page. Character, Kanarese. Condition, injured. **Appearance**, old.

Begins on fol. 1*a*. Adhyāyas 53 and 54

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This MS. contains the following extracts from the following works:—

17*a* Brahmōttarakhaṇḍa, Rudrajāpyamāhātmya, Adhyāya 21.

18*a* Kūrmapurāṇa (Brahmaśiraḥkhaṇḍana).

21*b* Skānda, Kāśīkhaṇḍa, Bhairavamāhātmya, Pādmapurāṇa, Māghamāhātmya, Mārkaṇḍēyamāhātmya, Yamamṛtyunigraha.

27*a* Kūrmapurāṇa, Adhyāya 43.

28*a* Liṅgapurāṇa, Nandikēśvarōtpatti, Adhyāya 20.

33*a* Kūrmapurāṇa, Yamavadha, Adhyāya 37.

34*a* Skānda, Śivarahasya, Śvētōpākhyāna, Adhyāya 69.

36*a* Skānda, Kālikākhaṇḍa, Śarabhalīlā, Adhyāya 17.

Vyāsabhujastambhavimōcana, Adhyāya 37.

Suvarṇamukharīmāhātmya (Śivastuti).

48*a* Skānda, Kālikākhaṇḍa, Gajāsuracarmadhāraṇa, Adhyāya 26.

Vṛṣēndravāhanādivivaraṇa, Adhyāya 27.

55*a* Skānda, Suvarṇamukharīmāhātmya (Kambaḷādidhāraṇa) Adhyāya 14.

56*a* Mārkaṇḍēyapurāṇa (Kuvalayāśīyōpākhyāna).

58*a* Brahmōttarakhaṇḍa (Sandhyātāṇḍava).

Kūrmapurāṇa Pralayatāṇḍava).

60*a* Mahābhārata, Āraṇyaparvan (Kāmyakavanapravēśa, Adhyāyas 38 to 43).

70*a* Pādmapurāṇa (Kirātārjunīyakathā), Adhyāyas 41 to 44.

86*a* Bhāgavata (Rudrōtpatti).

88*a* Dakṣiṇāmūrtisvarūpa.

90*a* Śivavāyavīyasaṁhitā (Pañcākṣarīmāhātmya).

96*a* Tripuṇḍradhāraṇavidhi.

97*b* Skānda, Tīrthakhaṇḍa, Bhūpradakṣiṇavidhi, Adhyāya 2.

100*b* Śivapūjāmāhātmya.

105*a* Liṅgapūjāmāhātmya, Adhyāya 43.

194

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



107*a* Śivasmaraṇamāhātmya, Adhyāya 44.
108*a* Śivapurāṇa, Trimūrtibhēdanirasana, Sivagītā, Adhyāyas 13 to 16.
117*a* Brahmagītā, Adhyāyas 3 and 4.
124*a* Īśvaragītā (Kūrmapurāṇa).
140*a* Bhāgavata, 6th Skandha, Nārāyaṇavarman.

---

## No. 2340. आनन्दपुराणम्.

## ĀNANDAPURĀṆAM.

Substance, paper. Size, 7¼ × 3 inches. Pages, 66. Lines, 6 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyayās 1 to 5, complete; 6th, incomplete.

This is a dialogue between Asaṅga and Nissaṅga intended to teach some of the tenets of the Advaita Vēdānta.

The contents are:—

1. Bhēdanirākaraṇa, 2. Aśucisaṁśayanivṛtti, 3. Vivēkōdaya, 4. Brahmapūjā, Trisandhyākarman, Tithisaṁśayanivṛtti, 5. Jātibhēdavēdavratakarmanirākaraṇa.

**Beginning:**

एकदा लोकनाथस्य सभायां समुपेयुषः ।
देवान् पप्रच्छ ऋषिभिः पूजितो नारदस्तदा ॥
भो देवास्सर्वशास्त्रेषु किं सारं वदताधुना ।
शास्त्रार्थतत्त्वजिज्ञासा ह्येतेषाश्च गरीयसी ॥
इत्युक्त्वा निर्जरास्सर्वे प्रत्यूचुर्विनता ऋषिम् ।
ब्रह्मऋषे [सर्व] सर्वशास्त्रार्थं त्वं ब्रूहि मुनिपुङ्गव[म] ॥

* * * *

लोकेऽस्मिन् ब्राह्मणः को वा असङ्ग वद मे द्विज ;
अहं वदामि निस्सङ्ग ब्राह्मणोऽहं नरोत्तम ॥
केन त्वं ब्राह्मणो विप्र असङ्ग वद मे द्विज ।
शिखायज्ञोपवीतेन ब्राह्मणोऽस्मि सदा नर[ा] ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमदानन्दपुराणे अद्वैतसुधासारे असङ्गनिस्सङ्गसंवादे जाति भेदवेदव्रतकर्मनिराकरणं नाम पञ्चमोऽध्यायः ॥

कुलालकस्य वैश्यस्य उपवीतं शिखास्ति च ।
विप्रश्च तावुभौ विप्र तथैव त्वं न संशयः ॥

**End:**

वदामी(मि)देहभावश्च असङ्ग[:]शृणु चेतसा ।
सदा दुर्गन्धमुच्छिष्टं निकृष्टं निष्फलं भवेत् ॥

---

No **2341.** कन्यकापुराणम्.
KANYAKĀPURĀṆAM.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 7, complete. Some stanzas, giving the Phalaśruti, etc., are given after the colophon of the 7th Adhyāya.

This Purāṇa deals with the origin and development of the Vaiśya caste.

The copyist gives his name and date thus: Sunday, the 11th of Kārtika-Bahula of Tāraṇa year, by Sūryanārāyaṇa, son of Śrīrāmuṇikāmanna.

**Beginning:**

श्रीलक्ष्मीरमणं विष्णुं जगद्रक्ष(ा)परायणम् ।
वन्देऽरविन्दनयनामिन्दीवरदलप्रभम् ॥
अक्षयाणि सुवस्त्राणि कृष्णायै करुणाम्बुधेः ।
यः प्रादात्पुण्डरीकाक्षः तं वन्दे भक्तवत्सलम् ॥
दैतेयशत्रुं प्रह्लादवाक्यपालनतत्परम् ।
वज्रायुधनखोदारं श्रीनृसिंहं नमाम्यहम् ॥
श्रीकण्ठमम्बिकानाथं चन्द्रशेखरमव्ययम् ।
जगत्पतिं महादेवं वन्देऽहं त्रिपुरान्तकम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनायकं नमस्कृत्वा नत्वा वाणीं प्रपूज्य च ।
वाल्मीकिमुख्यान् सुकवीन् स्तुत्वा पूर्वकथाविदः ।।
सनत्कुमारमौनीन्द्रप्रोक्तपौराणिकीं कथाम् ।
ज्ञात्वा तदनुसारेण वक्ष्येऽहं वणिजां कथाम् ।।
सत्यलोके परे पूर्वं ब्रह्मणा कल्पितो रथः ।
क्रमादधोऽधः पतितो निम्नोन्नतमहीतले ।।
नेमिभङ्गोऽभवत्तत्र विश्रुतं नैमिशं वनम् ।
पावनं मुक्तिदं तस्मिन् तिष्ठन्ति मुनिपुङ्गवाः ।।
अत्यन्तपुण्यनिलये नैमिशारण्यनामनि ।
वने शिनानि(नाना)मुनिवृते मुनिशिष्यनिषेवितः ।।
श्रुतिस्मृतिपुराणज्ञः शालङ्कायनसंयमी ।
वेदशास्त्रपुराणेषु यद्गोप्यं यच्च दुर्लभम् ।।
तत्सर्वं शिष्यकोटिभ्यः श्रावयःन(यन्स)दसि स्थितः ।

* * * *

इति शालङ्कायनवैश्यमुनिसंवादे प्रथमोऽध्यायः ।।

**End :**

कान्ताष्टादशपट्टणेषु कलिताह्रा(वा)साः कुबेरासिनः
स्फूर्जद्गोकुलवेङ्गिवैश्यनिकराः सत्यव्रतास्साधवः ।
वर्तन्तां भुवि पुत्रपौत्रवसुभिर्युक्तास्सुविद्यातपो-
भास्वद्भास्करपण्डितादिमहितक्षोणीसुरेन्द्राशिषान् (षा)।।

**Colophon :**

इति शालङ्कायन वैश्यमुनिसंवादे सप्तमोऽध्यायः ।।
आदौ ब्रह्मोरुजाता भुवि घनतपसा तोषयित्वा महेशं
स्थित्वा कैलासशैले चिरमघ(थ)शिवया राज्ञा(ज्ञ उ)द्वाहकाले ।
वैश्या गोकर्णजाता भुवि कुधरमुखाष्टादशग्रामनाथा
राज्ञे कन्यामदत्वा शतमनलमुखे द्वौ च मुक्तिं प्रयातान्(ः) ।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोरक्षणाय शरणागतरक्षणाय
त्राणाय भूमिमरुताङ्कुलरक्षणाय ।
प्राणान्त्यजन्ति च निजान् मधुरांज्ज(रान् ज)ना य(ये)
तेषां हरिर्दिशति दिव्यपदं मनोज्ञम् ॥

गुरुस्तुतिः—

श्रीमद्गौतमगोत्रपङ्कजवने ह्यासक्रियाभास्करं
वेदव्याकरणादिशास्त्रविलसन्नक्षत्रमाभास्करम् ।
शिष्यज्ञानमहान्तरायतिमिरव्याघातमाभास्करं
वन्दे वैश्यकुलैकसद्गुरुमहं श्रीदीपितं भास्करम् ॥
कल्यादिवत्सरगणे गजाक्षरसदोर्मिते ।
प्रभवास्ते(ब्दे)तपश्शुक्लद्वितीयागुरुवासरे ॥
अग्निप्रवेशस्थूलाद्रौ वैश्या मुक्तिपदं ययुः ।
स्वमातृपितृनामाङ्कान् तटाकांश्च शिवालयान् ॥
संस्थाप्य पुत्रपौत्राद्या धनधान्यसमन्विताः ।
वर्धन्ते दानधर्मज्ञाः शतगोत्रविवर्धनाः ॥
यः शृणोति कथामेनां तन्नरो लभते सुखम् ।
जामदग्निर्वीतहव्यो वैन्यो गृत्सो मदाह्वयः ।
वायव्यो गौतमाख्यश्च भरद्वाजः . . . . ॥
अत्रिविश्वामित्रनाम वसिष्ठः कश्यपाह्वयः ।
अगस्त्यश्चेति मुनयो अ(ह्य)ष्टादश गणास्स्मृताः ॥
गोत्रजा कणजा कन्या कामतः परिहारिणीम् ।
प्रजामुत्पाद्य दश्शा(तच्छा)न्तिगुरुतल्पकतद्व्रतम् ॥
चण्डालेषु व्रजाक्षिप्ते व्रतं प्राणान्तिकं त्यजेत् ।
निन्दाह्योमस्तु सर्वत्र मातृभावे यथा भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2342. कालिकापुराणम्.

## KĀLIKĀPURĀṆAM.

Substance, paper. Size, $12\frac{1}{8} \times 8\frac{3}{8}$ inches. Pages, 765. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 90 complete.

This Purāṇa treats of the greatness of Kāli and Śiva. A copy of this wo·k is described in detail in the India Office Library Catalogue on page 1193.

**Beginning:**

यद्योगिभिर्भवभयार्तिविनाशयोग्य-
मासाद्य वन्दितमतीव विविक्तचित्तैः ।
तद्वः पुनातु हरिपादसरोजयुग्म-
माविर्भवत्क्रमविलङ्घितभूर्भुवस्स्वः ॥
सा पातु वस्सकलयोगिजनस्य चित्तेऽ-
विद्यातमिस्रतरनि(णि)र्यतिमुक्तिहेतुः ।
या चान्यजन्तुनिवहस्य विमोहिनीति
माया विधोर्जनुषि शुद्धकुबुद्धिहन्त्री ॥
ईश्वरं जगतामाद्यं प्रणम्य पुरुषोत्तमम् ।
नित्यज्ञानमयं वक्ष्ये पुराणं कालिकाह्वयम् ॥
मार्कण्डेयं मुनिश्रेष्ठं स्थितं हिमधरान्तिके ।
मुनयः परिपप्रच्छुः प्रणम्य कमठादयः ॥

* * * *

भूयस्तच्छ्रोतुमिच्छामि हरं काली पुरा कथम् ।
मोहयामास यतिनं सतीरूपेण चेश्वरम् ॥
कथं संक्षोभयामास संसारविमुखं हरम् ।
सती वा कथमुत्पन्ना दक्षदारासुः(रेषु) शोभना ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथं हरो मनश्चक्रे दारग्रहणकर्मणि ।
कथं वा दक्षकोपेन त्यक्तदेहा सती पुरा ॥

हिमवत्तनया जाता भूयो वा कथमागता ।
कथमर्धशरीरं साहरत्स्मररिपोः पुनः ॥

एतत्सर्वं विस्तरेण ममाचक्ष्व द्विजोत्तम ।
नान्योऽस्ति संशयच्छेत्ता त्वत्समो न भविष्यति ॥

यथा जानीम विप्रेन्द्र तत्कुरुष्व महात्मवित् ।

मार्कण्डेय उवाच—

शृण्वन्तु मुनयस्सर्वे गुह्याद्गुह्यतरं परम् ।
पुण्यं शुभकरं सम्यक् ज्ञानदं कामदं परम् ॥

**End :**

प्रधानपुरुषो यस्य प्रपञ्चो योगिनां हृदि ।
यः पुराणाधिपो विष्णुः प्रसीदतु स वः स्थितः ॥

यो हेतुरुग्रः पुरुषः पुराणः सनातनः शाश्वत ईश्वरः परः ।
पुराणकृद्वेदपुराणवेद्यः प्रस्तौमि तं नौमि पुराणशेषे ॥

इति सकलजगद्विभर्ति या सा मधुरिपुमोहकरीन्दिरास्वरूपा ।
रमयति च हरं शिवास्वरूपा वितरतु वो विभवं शुभानि माया ॥

**Colophon :**

इति माहात्म्यसूचके नवतितमोऽध्यायः । श्रीकालिकापुराणं समाप्तम् ॥

---

No. **2343.** कालिकापुराणम्.

KĀLIKĀPURĀṆAM.

Substance, paper. Size, 12 × 8⅝ inches. Pages, 521. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 54, complete; 55th incomplete. Same work as the above.

Four pages in the beginning give in English, apparently in the hand of Mr. Brown, the subject-matter of the first 9 chapters.

---

## No. 2344. गणेशपुराणम्.

## GAṆEŚAPURĀṆAM.

Substance, paper. Size, 13 × 8 inches. Pages, 110. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Pages 49 to 68 are wrongly bound after pages 136.

Upāsanākhaṇḍa, Adhyāyas 1 to 30, complete; 31st incomplete.

This is an Upapurāṇa said to have been taugh by Brahman to Vyāsa. It consists of two Khaṇḍas, Upāsanākhaṇḍa and Līlākhaṇḍa, and contains 250 Adhyāyas made up of 12,000 granthas. A copy of this work is described in detail in Aufrecht's Bodleian Library Catalogue, No. 134.

**Beginning:**

ऋषय ऊचुः—

सूत सूत महाप्राज्ञ सर्वशास्त्रविशारद ।
सर्वविद्यानिधे त्वत्तो वक्ता नान्योपलभ्यते ॥

जन्मान्तरे कृतं पुण्यमस्माभिस्तु महत्तरम् ।
तेन सन्दर्शनं जातं सर्वज्ञस्य सतस्तव ॥

वयं धन्यतमा लोके जीवितं नस्सुजीवितम् ।
पितरो वेदशास्त्राणि तपांस्याश्रम एव च ॥

अष्टादश पुराणानि विस्तराच्छ्रावितानि नः ।
अन्यान्यपि हि नश्श्रोतुमिच्छास्ति द्विजसत्तम ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शौनकेय महासत्रे सक्ता द्वादशवार्षिके ।
त्वत्कथामृतपानान्नो नान्यद्विश्रामकारणम् ॥

सूतः—

साधु पृष्टं महाभागा भवद्भिः लोकविश्रुतैः ।
साधूनां समचित्तानां मतिर्लोकोपकारिणी ॥
ममापि परितोषोऽस्ति कथानां कथनाद्द्विजाः ।
अतोऽहं साधुवृत्तेभ्यः कथयिष्ये विशेषतः ॥

ब्राह्मं पुराणं प्रथमं द्वितीयं पाद्ममुच्यते ।
तृतीयं वैष्णवं प्रोक्तं चतुर्थं शैवमुच्यते ॥
ततो भागवतं प्रोक्तं भविष्यं षष्ठमुच्यते ।
सप्तमं नारदीयश्च मार्कण्डेयमथाष्टमम् ॥

* * * *

कृतं सुमहदाश्चर्यं सर्वज्ञैर्मुनिसत्तमैः ।
पुराणं चरणं तत्र भृगुणा कथितं महत् ॥
विनायकस्य चरितं सर्वपापविनाशनम् ।
पञ्चाशदुत्तरशतद्वयाध्यायसमन्वितम् ॥
भृगुणा कथितं पूर्वं खण्डद्वयसुमण्डितम् ।
पूर्वन्तूपासनाखण्डं लीलाखण्डमथोत्तरम् ॥
प्रोक्तं द्वादशसाहस्रं श्लोकानान्तु महर्षिणा ।
ब्रह्मणा कथितं पूर्वं व्यासायामिततेजसे ॥
ततो व्यासेन कथितं भृगवे च महर्षये ।
भृगुणा सोमकान्ताय गणेशचरितं महत् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुर्लभं श्रवणं यस्य मर्त्यलोके विशेषतः ।
यस्य स्मरणमात्रेण कृतकृत्यो भवेन्नरः ॥

* * * *

पातिव्रत्यं त्वया भग्नं दुष्ट पापीयसा मम ।
कामवस्थां गमिष्यामि शापाद्गौतमवाग्भवात् ॥

**Colophon:**

इति श्रीगणेशपुराणे उपासनाखण्डे धर्षणं नाम त्रिंशत्तमोऽध्यायः ॥

**End:**

परावृत्यागतस्तस्माद्गतो(तं)मे देहि शोभने ।
त्वमेवेति मया भ्रान्त्या कृतं वाक्यं तथैव तत् ॥
दिव्यगन्धानुपाघ्राय विकल्पो मेऽभवत्पुनः ।
दुरात्मन् कोऽसि मे ब्रूहि नो चेद्भस्म भविष्यसि ॥
इति शापभयाज्जातः प्रकटो बलसूदनः ।
तावदेव भवद्वाक्यं श्रुतन्तु मुनिसत्तम ॥
लज्जया न गता शीघ्रमपराधं क्षमस्व मे ।

---

## No. 2345. नृसिंहपुराणम्.

## NṚSIṀHAPURĀṆAM.

Substance, paper. Size, 11 × 5¼ inches. Pages, 366. Lines, 10 on a page. Character, Devanāgarī. Condition, injured. Appearance, new

Complete in 62 Adhyāyas.

This is an Upapurāṇa, mainly treating of the incarnations of Viṣṇu and inculcating the Dharmas.

This copy agrees in respect of contents with the MS. described in Aufrecht's Bodl. Libr. Catalogue, No. 138.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

तप्तहाटककेशान्तज्वलत्पावकलोचनः ।
वज्राधिकनखस्पर्शदिव्यसिंह नमोऽस्तु ते ॥

पातु वो नरसिंहस्य नखलाङ्गलकोटयः ।
हिरण्यकशिपोर्वक्षअ(सोऽ)सृक्कर्दममा(दा)रुणाः ॥

होमबद्धाग्निनस्सर्वे मुनयो वेदपारगाः ।
त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ॥
अर्बुदारण्यनिरताः पुष्करारण्यवासिनः ॥
महेन्द्राद्रिरता ये च विन्ध्याद्रि(वि)निवासिनः ॥

* * * *

**Colophon :**

इति श्रीनरसिंहपुराणे सर्गकथनं नाम प्रथमोऽध्यायः ॥

* * * *

इति श्रीनरसिंहपुराणे पुण्डरीकनारदसंवादे ६१ ॥

सूत उवाचं—

इत्येतद्वस्समाख्यातं पुराणं नारसिंहकम् ।
सर्वपापहरं पुण्यं सर्वदुःखनिवारणम् ॥

**End :**

श्रद्धयाश्रद्धया वापि श्रोतव्यमिदमुत्तमम् ।
भारद्वाजमुखास्सर्वे कृतकृत्या द्विजोत्तमाः ॥
सूतं पृष्टाः प्रपूज्यार्थे सर्वे स्वं स्वाश्रमं ययुः ।

**Colophon :**

इति श्रीनरसिंहपुराणे सूतभारद्वाजादिसंवादे सर्वदुःखो(खौ)घहरं श्रीसमाप्तं नरसिंहपुराणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2346. नृसिंहपुराणम्.

## NṚSIṀHAPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, 15¼ × 2 inches. Pages, 330. Lines, 7 on a page. Character, Malayāla. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 2347. नृसिंहपुराणम्.

## NṚSIṀHAPURĀṆAM.

Substance, paper. Size, 6⅝ × 10 inches. Pages, 234. Lines, 15 on a page. Character, Telugu. Condition, injured. Appearance, old.

Leaves are fragile.

Complete.

Same work as the above.

---

## No. 2348. पराशरपुराणम्.

## PARĀŚARAPURĀṆAM.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 83. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 18 Adhyāyas. This is said to contain 1,008 stanzas.

This is an Upapurāṇa attributed to Parāśara. A list of the contents of this Purāṇa is given on page 1230 of the India Office Library Catalogue

**Beginning :**

सौरमण्डलमध्यस्थं साम्बं संसारभेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥
मेरुशृङ्गे समासीनं संसारोदधितारकम् ।
शुकः प्रणम्य सर्वज्ञं श्रीपराशरमादरात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पप्रच्छ परमं गुह्यं भक्त्या परमया मुदा ।
भवपाशने बद्धानां भवपाशविमोचनम् ॥

पराशरोऽपि भगवान् भवानीपतिवल्लभः ।
प्राह कारुणिकः श्रीमान् ध्यात्वा साम्बं त्रिलोचनम् ॥

पराशर उवाच—

पुरा पुराणमखिलं व्यासस्सत्यवतीसुतः ।
कृत्वा शिवप्रसादेन मुनीनां भावितात्मनाम् ॥

दर्शयित्वा मुनीन्द्रैस्तु तैः प्रसन्नैर्महात्मभिः ।
पूजितोऽभवदत्यर्थं पुरभिद्भावबल्लभः ॥

अस्मिन्नवसरे श्रीमान् महाकारुणिकोत्तमः ।
महादेवो महादेवो(वः) सह सन्निहितोऽभवत् ॥

**End :**

पुराणं दण्डवद्भूमौ प्रणाममकरोद्गुरोः ।
नमो रुद्राय देवाय स्वतन्त्रायाखिलात्मने ॥

प्रधानपुरुषेशाय जगत्स्वगा(त्सर्गा)दिहेतवे ।
या विभाति सदा साक्षिस्वरूपेण स्वभावतः ॥

तांन माम्यादरेणैव शिवामानन्ददायिनीम् ।
अष्टोत्तरसहस्रेण श्लोकेनैव विनिर्मितम् ॥

इदमष्टादशाध्यायैः शिवोऽत्रैव च दर्शितः ।

**Colophon :**

इति श्रीउपपुराणे पराशरे शुकपराशरसंवादे अष्टादशोऽध्यायः ॥

पराशरपुराणं समाप्तिमगमत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूरेशाख्यब्राह्मणेन लिखितं शिवतुष्टये।
पराशरपुराणं तु परार्थं स्वार्थमेव च ॥

---

No. **2349.** बसवपुराणम्.

BASAVAPURĀṆAM.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 281. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 42.

This is intended to teach the greatness of Basavēśvara and to support the religious tenets of the Liṅgāyats.

**Beginning:**

श्रीशैलशिखरावासश्श्रीशपूजितपादुकः ।
श्रीमल्लिकार्जुनस्वामी श्रेयसे भूयसेऽस्तु नः ॥

शिवलीलाविनोदार्थमिच्छाकल्पितविग्रहान् ।
नन्दीशप्रमुखान् सर्वान् वेदशास्त्रार्थपारगान् ॥

चिदानन्दरसास्वादसदासन्तृप्तमानसान् ।
कर्तुं विश्वमकर्तुं वाप्यन्यथाकर्तुमेव हि ॥

स्वतन्त्रान् प्रमथान्सर्वान् नमस्कृत्य प्रियव्रतान् ।
बसवेश्वरमाहात्म्यं जिज्ञासुः पापनाशनम् ॥

शैवशास्त्रार्थतत्त्वज्ञो वेदवेदाङ्गपारगः ।
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ॥

रुद्राक्षमालाभरणो लिङ्गाङ्गस्थलतत्त्ववित् ।
देदीप्यमानो नितरां महता शैवतेजसा ॥

पाञ्चरात्रादितत्त्वाब्जसंभेदनसितद्युतिः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिवदूषणतूलेषु भस्मीकरणपावकः ।
शिवनिन्दकपाषण्डपिण्डीकरणपण्डितः ॥

लिङ्गधारणशास्त्राणि व्याकुर्वाणो महामतिः ।
अगस्त्यस्सर्वसिद्धान्तकोविदः करुणानिधिः ॥

द्रष्टुन्तारकहन्तारं कुमाराचलमाययौ ।
कुमारपर्वते रम्ये नानामुनिगणावृते ॥

**End:**

ततोऽनुज्ञां लब्ध्वा विकसितमुखाम्भोजकलितः
त्वगस्त्यस्स्वस्थानं प्रचुरमुनिबृन्दोज्ज्वलतरम् ।
प्रविश्येदं सर्वं बसवशिवभक्तौघचरितं
स्वशिष्येभ्यः प्राह त्रिणयनसुतास्याब्जगलितम् ॥

**Colophon:**

इति श्रीबसवपुराणे स्वरूपग्रन्थे कुमारागस्त्यसंवादे व्यासकैलासगमनफलकथनं नाम द्विचत्वारिंशोऽध्यायः ॥

The MS. is dated: युवनामसंवत्सरं वैशाखशुद्ध १० गुरुवारम् ॥

The subject-matter as noted in the colophons are:—1 Kumārāgastyasaṁvāda; 2 Śailādiśivasaṁvāda; 3. Madāmbāsvapnavṛttānta; 4. Basavēśvarajananavaibhava; 5 Basavēśvarabālakrīḍāvidvatsaṁvāda; 6. Basavakumārōktētihāsakathana; 7. Basava kumāravidvatsaṁbhāṣaṇō Upanayanakhaṇḍana; 8. Basavēśvaravivāhōtsava; 9. Bijjalabasavēśvarasamāgamapurapravēśa; 10. Bhaktāgamanārcana; 11. Cannabasavakṛtastōtra; 12. Allamaprabhukathāprasaṅga; 13. Allamaprabhukathāprasaṅgē itihāsakathana; 14. Vārtākaliṅgāṅgi-satyasandha-kāṭakūṭabāvūribrahmabhakta-kaścinmahēśvara-moraṭadavaṅkōpākhyāna; 15. Gōpīpayōghaṭarakṣaṇa - siddharāma - kailāsagamana- śivabasavābhēdanirūpaṇa; 16. Mugdhasaṅgēśakathāprasaṅga; 17. Mugdhabhaktamāhātmyakathana; 18. Mugdhakathāprasaṅga; 19. *ibid.*, 20. *ibid.*, 21. Mādirājakathāprasaṅga; 22. Mācākhyakathā; 24.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



23. Mācakathāprasaṅgēitihāsakathana - mācabōdhitabasavajñāna; 24. Ciritoṇḍakathāprasaṅga ; 25. Halāyudhamuktipradāna ; 26. Nambibhaktakathāprasaṅga ; 27. Mācakathāprasaṅga-nāvābhaktakathānuvarṇana ; 28. Kumārabrahmabhaktakathāprasaṅga ; 29. Mauligamārākhyabhaktakathāprasaṅga ; 30. Camaṭhakathāprasaṅga ; 31. Jommabhaktavṛttānta ; 32. Jainakōlāhala ; 33. *ibid.* ; 34. Jainakōlāhalaprasaṅgē ēkāntarāmamāhātmya ; 35. Ṣōḍḍalabācāryamaṇavīraśaṅkara-bhaktamāhātmya ; 36. Bācavṛttānta ; 37. Śivanāgakathāprasaṅgē bhaktasaṅghavṛttānta ; 38. Śivanāgabhaktaprasaṅga ; 39. Haradvijavijaya ; 40. Jagadēvakathāprasaṅga ; 41. Basavēśvaramahimānuvarṇana-saṅgamēśvaragarbhapravēśa ; 42. Vyāsakailāsagamana and phalakathana.

---

## No 2350. बसवपुराणम्.

## BASAVAPURĀṆAM.

Substance, paper. Size, 12¼ × 8¼ inches. Pages, 94. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 302*a* of the MS. described under No. 118.

Adhyāyas 1 to 15, complete ; 16th incomplete.

---

## No. 2351. बसवपुराणम्.

## BASAVAPURĀṆAM.

Substance, palm-leaf. Size, 14⅜ × 1¼ inches. Pages, 174. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 14, complete ; 15th incomplete.

---

## No. 2352. भार्गवपुराणम्.

## BHĀRGAVAPURĀṆAM.

Substance, paper. Size, 6½ × 8¼ inches. Pages, 220. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 40 in the Uttarakhaṇḍa.

A Purāṇa intended to establish the sanctity of the Vaiṣṇava saints called Ālvārs.

For notice and extracts see page 21 and 151 of M. Seshagiri Śastri's Report on a Search for Sanskrit and Tamil MSS. for 1896-97, No. 1.

The scribe adds;—

श्रीमद्रामानुजमुनेच्छात्र(श्छात्र): परमयोगिनाम् ।
चरित्रं महतां भद्रं लिलेख कृपया हरे: ॥

---

## No. 2353. भार्गवपुराणम्.
## BHĀRGAVAPURĀṆAM.

Substance, palm-leaf. Size, 18¼ × 1⅓ inches. Pages, 120. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 36 in the Uttarakhaṇḍa; 37th, incomplete.

Same work as the above.

---

## No. 2354. भार्गवपुराणम्.
## BHĀRGAVAPURĀṆAM.

Substance, palm-leaf. Size, 17⅝ × 1¼ inches. Pages, 172. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Adhyāyas 1 to 39, complete; 40th, incomplete.

Same work as the above.

---

## No. 2355. भार्गवपुराणम्.
## BHĀRGAVAPURĀṆAM.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 174. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 8 to 39, complete; 40th, incomplete.

The want of 21 leaves in the beginning makes the MS. begin in the course of the 8th Adhyāya.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2356. भैरवपुराणम्.

## BHAIRAVAPURĀṆAM.

Substance, palm-leaf. Size, $20\frac{1}{2} \times 2\frac{1}{8}$ inches. Pages, 20. Lines, 8 on a page. Character, Nandinagari. Condition, much injured. Appearance, old.

The colophons of Adhyāyas 45 and 46 are given below ; no other information can be given as the leaves of this injured MS. are very badly disarranged.

**Beginning :**

ईश्वराणां शिवानाञ्च धारणीयतयापि या ।
पुंसामप्रतिघोदारमरीचिनिचयेन च ॥
रत्नानीष्टविधानाच्च विद्वांसश्शिवशासना ।

* * * *

इति श्रीभैरवपुराणे शबरपराक्रमो नाम पञ्चचत्वारिंशोऽध्यायः ॥

व्यासः—

वीरभद्रविरूपाक्षौ मायामालोक्य विस्मितौ ।
अन्योऽन्यस्य मुखं दृष्ट्वा वचनन्त्विदमूचतुः ॥
गिरिकूटनिभा दैत्याः कालमेघसमत्विषः ।

**End :**

सुचूर्णयन्तश्शिलापृष्ठान्निपेतुर्धरणीतले ।
हतेषु दैत्येश्वरसैनिकेषु यथाप्रधानं युधि दुर्जयेषु ।
जयारवो भीमतरो गणानां विचित्रवादित्ररवश्च जज्ञे ॥

**Colophon :**

इति श्रीभैरवपुराणे कार्तिकेयविजयो नाम षट्चत्वारिंशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2357. मारीचोपपुराणम्.

## MĀRĪCŌPAPURĀṆAM.

Substance, paper. Size, 12 × 9⅝ inches. Pages, 14. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 5, complete.

Begins on fol. 73*a*. The other works herein are Cidambaramāhātmyam 1*a*, Puṇḍarīkapuramāhātmyam 46*a*.

This is an Upapurāṇa setting forth the Dharmas, said to have been first taught by Nandikēśvara to Marīca; and hence the name of the Purāṇa.

**Beginning:**

वन्दे सच्चित्सुखमयं वेदान्तैकप्रगोचरम् ।
विज्ञानघनमानन्दमीश्वरं तं त्रयीमयम् ॥
सत्रान्ते मुनयस्सर्वे नैमिशारण्यवासिनः ।
आगतं पूजयामासुः रोमहर्षणनामकम् ॥
तैः पूजितो यथान्यायमुपविष्टो वरासने ।
विनयात्तं तदा प्रोचुः मुनयो वीतकल्मषाः ॥

मुनय ऊचुः—

सूत सूत महाभाग पुराणार्थविशारद ।
ब्रूहि पुण्यकथां साधो यत्र नो धर्मसङ्ग्रहः ॥

सूत उवाच—

यत्पृष्टोऽहं भवद्भिस्तु सत्यपूतैर्महाव्रतैः ।
साक्षादध्वरराजानं पूजयद्भिस्सदा मखैः ॥
पुरा नन्दी मरीचाय यदुवाच शुभां कथाम् ।
तामद्य सम्प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमस्कृत्वाप्रमेयाय महादेवाय शम्भवे ॥
पुरुषाय पुराणाय त्रिमूर्तिजनकाय च ॥
पुरा कैलासशिखरे नन्दिनं विश्वनन्दिनम् ।
रत्नपीठे सुखासीनं गणेशैः परितो वृतम् ॥

* * * *

रत्नवेत्रलसत्पाणिं सुयशापतिमीश्वरम् ।
संस्थिता(तं) मन्दरप्रख्यं द्वितीयमिव शङ्करम् ॥
प्रणिपत्य मरीचस्तु ब्रह्मपुत्रो महायशाः ।
प्रह्वो बद्धाञ्जलिपुटो उवाच सभयं पुरः ॥

* * * *

**Colophon:**

इति श्रीमन्मारीचोपपुराणे प्रथमोऽध्यायः ॥

**End:**

देयमेतद्धि कथितं शिवज्ञानमनुत्तमम् ।
भक्ताय च विनीताय सम्यक् शुश्रूषवे त्वया ॥
देयं नान्यज्जने विद्वन् एतद्धि मम शासनम् ।
इति नन्दिवचः श्रुत्वा मरीचो नन्दिकेश्वरम् ॥
प्रणम्य पादौ तस्याज्ञां गृहीत्वा स्वाश्रमं ययौ ।

सूत उवाच—

एतद्वः कथितं ज्ञानं गुह्याद्गुह्यतरं परम् ॥
मारीचमिदमाख्यातं गुरुणा मे प्रसादतः ।
भवन्तोऽपि जयन्त्वाशु महादेवं महेश्वरम् ॥
प्राप्यानुज्ञां मुनीन्नत्वा ययौ सूतो यथागतम् ।

**Colophon:**

इति श्रीमारीचोपपुराणे पञ्चमोऽध्यायः ॥

मारीचोपपुराणं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2358. विष्णुरहस्यम्.

## VIṢṆURAHASYAM.

Substance, paper. Size, 9½ × 7½ inches. Pages, 393. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 55. This work is a portion of the Vasiṣṭhōpapurāṇa.

**Beginning:**

यतो भूतानि जायन्ते येन जीवन्ति तान्युत ।
यो हन्ति मोक्षदस्तेषां तं विष्णुं प्रणमाम्यहम् ॥
नैमिशे निमिषक्षेत्रे ऋषयश्शौनकादयः ।
दीक्षिता वैष्णवे यज्ञे सूतं पप्रच्छुरादरात् ॥

ऋषयः—

सूत सूत महाभाग वद नो वदतां वर ।
दुःखाम्बुधौ निमग्नस्य कथं स्याज्जगतो हितम् ॥
* * * *
व्यासशिष्य महाभाग त्वत्प्रसादाच्च सर्ववित् ।
अतः पृच्छामहे सर्वे सुश्रूण्वन्तो जगद्धितम् ॥

सूतः—

भवन्तो वेदविद्वांसो सर्वशास्त्रार्थवेदिनः ।
यन्मां पृच्छन्ति तत्प्रीत्या केवलं गुणनाय वा ॥
अतो यावदहं वेद्मि तावद्वक्ष्यामि नान्यधा(था) ।
यत्पुरा विष्णुना प्रोक्तं सृष्ट्यादौ ब्रह्मणे पुरा ॥
* * * *
इमं विष्णुरहस्याख्यमितिहासं हरिप्रियम् ।
लक्षसङ्ख्यमुवाचास्मै ब्रह्मणे स सुतं निजम् ॥
* * * *
इति श्रीविष्णुरहस्ये विष्णुक्रीडनं नाम प्रथमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

यत्फलं सर्वतीर्थस्य सर्वयज्ञैश्च यत्फलम् ।
सर्वदानैः कर्मभिश्च यद्यत्कालेन लभ्यते ॥
सकृच्छ्रवणतश्चास्य कीर्तनात् स्यात्तु तत्फलम् ।
अन्ते मुक्तिमवाप्नोति यतो नावर्तते पुनः ॥
नमस्तस्मै भगवते व्यासायामिततेजसे ।
येन प्रवर्तितो दीपो दिव्यज्ञानसमन्वितः ॥

**Colophon:**

इति श्रीविष्णुरहस्ये पञ्चपञ्चाशत्तमोऽध्यायः ॥
ग्रन्थस्समाप्तः ॥

---

No. **2359.** शिवपुराणम्.

ŚIVAPURĀṆAM.

Substance, paper. Size, 11 × 6¾ inches. Pages, 511. Lines, 19 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 75 in the Pūrvabhāga. A Purāṇa on the greatness of Śiva and on the conduct of His worship and on other details of Śaivism. For a list of contents see Aufrecht's Bodl. Catalogue, No. 113.

**Beginning:**

जगतः पितरं शम्भुं जगतो मातरं शिवाम् ।
तत्पुत्रञ्च गणाधीशं नत्वैतद्वर्णयाम्यहम् ॥
वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ति हृदये संवित् तं नृसिंहमहं भजे ॥
एकदा मुनयस्सर्वे नैमिशारण्यवासिनः ।
पप्रच्छुः परया भक्त्या व्यासशिष्यं गुणान्वितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋषयः ऊचुः—

सूत सूत महाभाग चिरञ्जीव सुखी भव ।
पिबन्तस्त्वन्मुखाम्भोजात् च्युतं ज्ञानामृतं वयम् ॥
अवितृप्ताः पुनः केचित् प्रष्टुमिच्छामहेऽनघ ।
व्यासप्रसादात् सर्वज्ञो जातोऽपि कृतकृत्यताम् ॥
नाज्ञातं विद्यते किञ्चित् भूतं भव्यं भवच्च यत् ।
गुरोः कृपां समासाद्य सर्वं सार्थीकृतं त्वया ॥
कथय त्वं प्रसादेन शिवरूपमनुत्तमम् ।
तत्पूजां परमां दिव्यां चरित्राण्यप्यनेकशः ॥
अगुणो गुणतां यातः कथं लोके महेश्वरः ।
शिवतत्त्वं वयं सर्वे न जानीमो विचारतः ॥
सृष्टेः पूर्वं कथं देवस्तन्मध्ये च कथं पुनः ।
तदन्ते च कथं तिष्ठेच्छङ्करो लोकशङ्करः ॥
कथं प्रसन्नतां याति प्रसन्नः किं फलं पुनः ।
यच्छति सर्वलोकेभ्यः सर्वं कथय सुव्रत ॥

**End:**

चन्दनैश्च विचित्रैश्च नानालङ्करणैस्तथा ।
नमस्कारैस्स्तवैश्चैव स्वस्तिवाचनपूर्वकम् ॥
आशीर्भिर्विविधाभिश्च वर्धयामासुरञ्जसा ।
सन्तुष्टाश्चैव ते सर्वे सन्तुष्टाः सूत एव च ॥
परस्परं च सन्तुष्टा शिवभक्तिपरायणाः ।
एतदेव परं मत्वा नमन्ति च भजन्ति च ॥
एवं यश्शृणुयादत्र सर्वान् कामानवाप्नुयात् ।
अन्ते भक्तिं परां प्राप्य मुक्तिं वै प्राप्नुयात्पुनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीशिवपुराणे सनक[स]सूतसंवादे ज्ञानप्रकरणनिरूपणं नाम पञ्चसप्ततितमोऽध्यायः ॥

---

## No. 2360. शिवपुराणम्.

## ŚIVAPURĀṆAM.

Substance, paper. Size, $9\frac{7}{8} \times 7\frac{4}{8}$ inches. Pages, 564. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

## No. 2361. शिवपुराणम्.

## ŚIVAPURĀṆAM.

Substance, paper. Size, $11\frac{3}{4} \times 5\frac{1}{4}$ inches. Pages, 938. Lines, 10 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 2362. शिवपुराणम्.

## ŚIVAPURĀṆAM.

Substance, paper. Size, $11\frac{1}{4} \times 6\frac{3}{4}$ inches. Pages, 609. Lines, 15 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 62.

A note on fol. 2 (probably from the pen of Mr. C. P. Brown) says— "This is transcribed from a MS. in my own possession in the Dēvanāgarī character". Written on one side of the paper.

Vol. I breaks off in the 26th Adhyāya ; Vol. II to the end.

This is probably the Dharmasaṁhitā of the Śivapurāṇa and resembles the MS. described on page 1312 of the India Office Library Catalogue. A list of contents is given therein.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथोत्तरभागारम्भः—

सनत्कुमार उवाच—

एतच्छ्रुत्वा वचस्तस्य सोऽब्रवीत्तं महामुनिम् ।
विस्मयं परमं गत्वा ऋषिः प्रयतमानसः ॥

वासुदेव उवाच—

धन्यस्त्वमसि विप्रेन्द्र कस्त्वत्तोऽस्तीह पुण्यकृत् ।
यस्य देवादिदेवास्ते सान्निध्यं कुरुते च ये ॥
दर्शनं मुनिशार्दूल दद्यात्स भगवान् शिवः ।
अपि तावन्ममाप्येवं प्रसादश्चेत्कुरु प्रभो ॥

उपमन्युरुवाच—

अचिरेणैव कालेन महादेवं न संशयः ।
सर्वदेवगणाध्यक्षं द्रक्ष्यसे पुरुषोत्तम ॥
षोडशाष्टौ वरांश्चैव प्राप्यसे(प्स्यसि) त्वं महेश्वरात् ।
सपत्नीकान्(त्) कथं नाथात् त्वं हि देवो जनार्दनः ॥
पूज्योऽसि दैवतैस्सर्वैः श्लाघनीयस्सदा रणे ।
जप्यश्च ते प्रदास्यामि श्रद्धधानाय चाच्युत ॥
ब्रह्मण्यः श्रद्दधानश्च सत्यं द्रक्ष्यसि शङ्करम् ।
आत्मतुल्यबलं पुत्र भविष्यति महेश्वरात् ॥
देवज्ञानोऽसि दक्षोऽसि पुत्रकामो भवान्मया ।

व्यास उवाच—

एवं कथयतस्तस्य महादेवाश्रिताः कथाः ।
दिनान्यष्टौ प्रयातानि मुहूर्तमिव तापसाः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति शिवपुराणे शङ्करमाहात्म्यं नाम प्रथमोऽध्यायः ॥

**End :**

आमन्त्रयित्वा ते सर्वे ययुस्साक्षान्नियोगिनः ।
तस्मिन् संकीर्तिते विष्णोः पदे पापः प्रणम्य तु ॥
शूरा ये संप्रपद्यन्ते अपुनर्भवकाङ्क्षिणः ।
पापं प्रणाशयत्वद्य तद्विष्णोः परमं पदम् ॥
शरीरे मानसे चैव पापे वात्के(के) महामुने ।
कृते सम्यक्पदं भक्त्या पठन् श्रद्धासमन्वितः ॥
मुच्यते सर्वपापेभ्यो कृष्णनामानुकीर्तनात् ।
उच्चार्यमाण एतस्मिन् देवदेवस्य दर्शनात् ॥

**Colophon :**

इति श्रीशिवपुराणे योगमार्गविस्तारो नाम द्विषष्टितमोऽध्यायः ॥

---

## No. 2363. शिवपुराणम्.

## ŚIVAPURĀṆAM.

Pages, 218. Lines, 25 on a page.

Begins on fol. 1*a* of the MS. described under No. 2141.

Adhyāyas 1 to 58 ; 59th, incomplete. It is difficult to make out to which Saṁhitā of this Purāṇa this portion of it belongs.

श्रीकण्ठं जगतामाद्यमादिमध्यान्तवर्जितम् ।
वन्दारुजनमन्दारं वन्दे कात्यायनीपतिम् ॥
यं प्रपश्यान्त सततं योगिनो यतचेतसः ।
तमात्मनिलयन्देवं शङ्करं समुपास्महे ॥
वाराणस्यां पुरि पुरा सनकाद्या महर्षयः ।
द्रष्टुं विश्वेश्वरं लिङ्गं शिवरात्र्यां समाययुः ॥
महानिशायां तत्रोष्य कृत्वा जागरणं तथा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्येद्युः पारणां कृत्वा जग्मुस्ते मणिकार्णिकाम् ॥
ते तत्र स्वानुरूपाभिः (संमा)न्यं वाग्भिरादरात् ।
चक्रुस्सम्भावनां सम्यक् उपविष्टा ब्रवीष्वथ(?) ॥
तत्रान्तरे समभ्यागात्तत्र ज्ञानैकभाजनम् ।
व्यासशिक्य(ष्यो)महातेजास्सूतो वै रौमहर्षणिः ॥
तं दृष्ट्वा मुनयस्सर्वे रोमहर्षणमागतम् ।
यथोचितं ततः कृत्वा कुशलप्रश्नमुत्तमम् ॥
पप्रच्छुः शाङ्करान् धर्मान् पौराणान् हृष्टचेतसः ।
शैवं पुराणञ्च तथा व्यासशिष्यन्तपोधनाः ॥

* * * *

इत्यादिमहापुराणे श्रीशैवपुराणे वामदेवमहर्षिसमागमो नाम प्रथमोऽध्यायः ॥

**End :**

अरोगी विजितारातिरिह भुक्त्वा परां श्रियम् ।
अन्ते हरस्मृतिं प्राप्य शिवलोके महीयते ॥
तत्र स्वर्णमये दिव्ये नानारत्नविचित्रिते ।
भजमानोऽमरस्त्रीभिर्विमाने वसतिं ध्रुवम् ॥
सप्त सप्त च सप्तापि कुलान्यघयुतान्यपि ।
तारयेन्नात्र सन्देहः शिवेन परिभाषितम् ॥

* * * *

अनन्तानन्दसम्बोधनिधिमद्भुतविक्रमम् ।
अम्बिकापतिमीशानमवनीशं प्रणौम्यहम् ॥
. . . . व्यासं यणः नारायणमुदीरयेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The contents of the chapters as given in the colophons are :—

१. वामदेवमहर्षिसमागमः
२. महदादिसृष्टिप्रसङ्गः
३. भूतसृष्टिप्रसङ्गः
४. जम्बूद्वीपकथनम्
५. सकलद्वीपसमुद्रकथनम्
६. स्वर्लोकवर्णनम्
७. सत्यलोककथनम्
८. शिवलोकवर्णनम्
९. नैमित्तिकप्रलयप्रसङ्गः
१०. महेश्वरस्तुतिः
११. वराहावतारप्रसङ्गः
१२. शङ्करस्य सर्वमयत्ववर्णनम्
१३. सदाचारप्रसङ्गः
१४. शौचविधिः
१५. तिथिपूजाप्रशंसा
१६. दिवाचारप्रसङ्गः
१७. कन्यालक्षणम्
१८. गृहस्थचर्याप्रसङ्गः
१९, २०, २१. वैश्याचारप्रसङ्गः
२२. श्राद्धप्रसङ्गः
२३. श्राद्धार्हानर्हद्रव्यकथनम्
२४. महादेवनन्दिकेश्वरसमाप्तिः
२५, २६. अम्बरीषचरित्रम्
२७, *Itid* २८. शापप्राप्तिः
२९. धर्मकेतूपाख्यानम्
३०, ३१. कलावत्युपाख्यानम्
३२. स्वस्त्ययनस्तोत्रकथनम्
३३. पुष्पादिप्रशंसा
३४. द्रव्यशुद्धिप्रसङ्गः
३५, ३६, ३७. शर्यातिनाभागवंशानुकीर्तनम्
३८. मान्धातृचरित्रानुवर्णनम्
३९. सगरचरितम्
४०. भगीरथचरितम्
४१. राजवंशे श्रीरामचरितम्
४२. सूर्यवंशानुकीर्तनम्
४३. निमिचरितम्
४४. मैथिलभूपालकीर्तनम्
४५. विश्वामित्रकथनम्
४६. कुवलयाश्वचरितानुवर्णनम्
४७. रजिचरितम्
४८. ययातिचरितम्
४९. पुरूरववंशानुकीर्तनम्
५०. शन्तनुवंशानुचरितम्
५१. भविष्यद्वंशानुचरितम्
५२, ५३, ५४, ५५, ५६. ब्राह्मणजातानुलोमकथनम्
५७. क्षत्रियाद्यनुलोमकथनम्
५८.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2364. शिवपुराणम्.

## ŚIVAPURĀṆAM.

Substance, palm-leaf. Size, 15⅜ × 1⅝ inches. Pages, 74. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 18, complete; 19th, incomplete. Wants the beginning of the first Adhyāya.

This is the Vāyavīya-saṁhitā of the Śivapurāṇa. A complete copy, in 2 parts of 30 Adhyāyas each, is described on page 1314 of the India Office Library Catalogue.

(माहे)श्वरं तदा रौद्रं वैनायकमतः परम् ।
औमं मातृपुराणञ्च रुद्रैकादशिकन्तथा ॥

* * * *

पारीक्षिताय सिव्या(शिष्या)य धार्मिकायानसूयवे ।
प्रदेयं शिवभक्ताय शिवधर्मानुरागिणे ॥

पुराणसंहिता यस्य प्रसादान्मयि वर्तते ।
नमो भगवते . . . . बृंहिततेजसः ॥

**Colophon:**

इत्यादिमहापुराणे वायवीयसंहितायां विद्यावतारकथनं नाम प्रथमोऽध्यायः ॥

सूत उवाच—

पुरा कालेन महता

* * * *

प्रतिष्ठितायां वार्तायां प्रवृद्धासु प्रजासु च ।
मुनीनां षट्कुलीयानां ब्रुवतामितरेतरम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति श्रीमच्छैवपुराणे वायवीयसंहितायां ब्रह्मपात्कु(षाट्कु)लीयसंवादो नाम द्वितीयोऽध्यायः ॥

* * * *

इत्यादिमहापुराणे वायवीयसंहितायां अष्टादशोऽध्यायः ॥

वायुरुवाच—

ततस्त्रिदशमुख्यास्ते शक्रविष्णुपुरोगमा(:) ।
सर्वे भयपरिग्रस्ता दुद्रुवुर्भयविह्वलाः ॥

**End:**

विनिकृत्तोत्तमाङ्गाश्च पेतुरुर्व्यां सुरोत्तमाः ।
हतेषु तेषु देवेषु पतितेषु सहस्रशः ॥

प्रविवेश गणेशानः क्षणादाहवनीयकम् ।
प्रविष्टमथ तं दृष्ट्वा भद्रं कालाग्निसन्निभम् ॥

दुद्राव मरणाद्भीतो यज्ञो मृगवपुर्धरः ।
स विष्फार्य महच्चापं दृढज्याघोषभीषणम् ॥

भद्रस्तमभिदुद्राव विक्षिपन्नेव सायकान् ।
आकर्ण्य.

---

No. **2365.** स्कान्दोपपुराणम्.

SKĀNDŌPAPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, 14 × 2 inches. Pages, 216. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 27 to 49, and 67, 89, 90.

This is an Upapurāṇa treating of the lives of certain Śaiva devotees.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

. . . . . . . . . . दद‍ौ बहुधनं नृपः ।
ततो निजगृहं प्राप्य स्नात्वापीदं निवृत्य च ॥
तत्रैकं शिशुमालोक्य न पश्यन् लिङ्गमीशितुः ।
अतिखिन्नमना भूत्वा दिवा तत्याज भोजनम् ॥
शिशुं तत्रैव संस्थाप्य चिन्तयन्नात्मनीश्वरम् ।
रात्रौ सुप्तिं समापन्नः तदा शम्भुरपि स्वयम् ॥
स्वप्ने तस्य वचः प्राह गृहाणेमं शिशुं नृप ।
शिवपूजाफलं तुभ्यं ददाम्येव न संशयः ॥
इतः परं सैकतेन लिङ्गं कृत्वा प्रपूजय ।
मानविक्रमशाली च शिशुरेष महामतिः ॥
तस्मादेनं शिशुं रक्ष स्वात्मानं कुरु पुत्रकम् ।
इत्युक्त्वान्तर्दधे शम्भुः राजापि प्रातरुत्थितः ॥
भार्यायै स्वप्नमावेद्य शिशुं तस्यै ददौ नृपः ।
सापि सत्यवती बालमादायातीव हृष्टधीः ॥
पालयामास तं बालं सा नित्यं परया मुदा ।
स राजा वचनाच्छम्भोः सैकतं लिङ्गमर्चयन् ॥

* * * *

**Colophon :**

इति श्रीस्कान्दोपपुराणे शिवभक्तमाहात्म्ये सप्तविंशोऽध्यायः ॥

* * * *

इति श्रीस्कान्दोपपुराणे शिवभक्तमाहात्म्ये क्षपणान्तकचरिते एकोनपञ्चाशोऽध्यायः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति श्री . . माहात्म्ये सप्तषष्टितमोऽध्यायः ॥

* * * *

इति श्री . . माहात्म्ये एकोननवतितमोऽध्यायः ॥

**End:**

किमेतदिति पप्रच्छ जना वृत्तान्तमूचिरे ।
निवार्य रुदितं तस्यास्तुष्टाव परमेश्वरम् ॥
अथाज्ञया महेशस्य ग्राहस्तद्द्विजनन्दनम् ।
सभूषणं (सार)साङ्गमुद्ववाम मुखात्स्वकात् ॥
सर्वे च विस्मिंताविष्टाः सुन्दरं मेनिरेऽधिकम् ।

**Colophon:**

इति श्रीस्कान्दोपपुराणे शिवभक्तमाहात्म्ये नवतितमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# II. THE PURĀṆAS—3: STHALAMĀHATMYAS AND EXTRACTS FROM PURĀṆAS OR UPAPURĀṆAS.

## No. 2366. अधिकमासमाहात्म्यम्.

## ADHIKAMĀSAMĀHĀTMYAM.

Pages, 36. Lines, 22 on a page.

Begins on fol. 166*b* of the MS. described under No. 2337. Written on one side only.

Breaks off in the 11th Adhyāya.

A portion of the Bhaviṣyōttarapurāṇa. This work is also called Malamāsamāhātmya. It describes the various religious rites to be performed during the intercalary month occurring once in about 3 years according to the lunar calendar of the Hindus.

**Beginning:**

श्रीलक्ष्मीरुवाच—

देवदेव जगन्नाथ भुक्तिमुक्तिप्रदायक ।
कथयस्व प्रसादेन लोकानां हितकाम्यया ॥

मुनीश्वराः प्रवदन्ति कृष्णद्वैपायनादयः ।
अदत्तं नैव लभ्येत दत्तं चैवोपतिष्ठते ॥

यथा वन्ध्या गृहस्थस्य पतिवंशस्य नाशिनी ।
तथा दानविहीनन्तु जन्म सर्वं निरर्थकम् ॥

तथापि कथयन्तीह दैवज्ञाश्शास्त्रकोविदाः ।
मलिम्लुचे सदा प्राप्ते याः कार्याः कथय प्रभो ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीकृष्ण उवाच—

चौलं मौञ्जी विवाहश्च व्रतं काम्योपवासितम् ।
मलिम्लुचे सदा त्याज्यं गृहस्थेन विशेषतः ॥

श्रीलक्ष्मीरुवाच—

अधिमासे च संप्राप्ते किङ्कार्यं ब्रूहि मे प्रभो ।
कस्योद्देशेन दातव्यं परत्रेक (ह)प्रदायक(दश्च कः) ॥

(श्रीकृष्ण उवाच)—

शृणु देवि महाभागे सर्वलोकस्य हेतवे ।
स्वयं दाता स्वयं भोक्ता यो ददाति द्विजातये ॥
नान्यो दाता न भोक्ता च इह लोके परत्र च ।

* * * *

**Colophon :**

इति भविष्योत्तरपुराणे मलमासमाहात्म्ये प्रथमोऽध्यायः ॥

श्रीकृष्ण उवाच—

शृणु देवि महाभागे मलमासविधानता(क)म् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

* * * *

**Colophon :**

इति श्रीभविष्योत्तरपुराणे अधिकमासमाहात्म्ये दशमोऽध्यायः ॥

श्रीलक्ष्मीरुवाच—

दानं तीर्थाश्रितं मोक्षं स्वर्गश्च वद मे प्रभो ।
केन मोक्षमवाप्नोति केन स्वर्गे वसेच्चिरम् ॥

**End :**

या स्त्री सवर्णसंशुद्धमृतं पतिमनुव्रजेत् ।
सा मृता स्वर्गमाप्नोति वर्षाणि पूर्वसङ्ख्यया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रपौत्रादिभिस्त्यक्ता(क्ता) स्वपतिं याधिरोहति ।
स्वर्गलोके च तौ चोभौ दिव्यस्त्रीभिरलङ्कृतौ ॥

---

## No. 2367. अरुणाचलमाहात्म्यम्.

## ARUṆĀCALAMĀHĀTMYAM.

Substance, paper. Size, 13⅜ × 8¾ inches. Pages, 190. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyāyas 1 to 31, complete; 32nd, incomplete.

This describes the greatness and sacredness of Aruṇācala or Tiruvaṇṇāmalai, in the South Arcot district of the Madras Presidency.

**Beginning:**

श्रीमत्संबन्धविघ्नेशं विघ्नान्धतमसो रविम् ।
शोणाचलात्मजं वन्दे दन्तावळमुखं सदा ॥
सञ्जायते शिवज्ञानं यस्य दर्शनमात्रतः ।
तं वन्दे शोणशैलेशमपीतकुचयान्वितम् ॥
स्मेराननां सुरनुतां कमलासनवल्लभाम् ।
कुन्देन्दुधवळच्छायां सेवे मधुरभाषिणीम् ॥
शौनकाद्या महात्मानो मुनयो हृष्टमानसाः ।
अरुणाचलमाहात्म्यं श्रोतुकामास्समन्ततः ॥
आगतं नैमिशारण्ये सूतमेत्येदमब्रुवन् ।
अरुणाचलमाहात्म्यं भवतो मुखपङ्कजात् ॥
श्रोतुमिच्छापरास्सर्वे वयमीशप्रसादतः ।

श्रीसूतः—

यूयं शृणुत यत्पूर्वं नन्दीश्वरमुखाच्छ्रुतम् ॥
मार्कण्डेयेन तद्वक्ष्ये मुनयो विहितादराः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

निशम्य नन्दीशमुखारविन्दात् समस्तपुण्याकरतीर्थजातम् ।
उवाच सन्तुष्टमनाः प्रणम्य वदेति मे शोणगिरीश उक्तम् ॥

**Colophon:**

इति श्रीविद्यासारकोटिरुद्रसंहितायाम् अरुणाचलमाहात्म्ये तीर्थप्रशंसा नाम एकत्रिंशोऽध्यायः ॥

मार्कण्डेयः—

पुरा नन्दीश्वर प्रोक्तं गौतमेन महात्मना ।
शिवायै लोकमात्रे व(च)वृत्तं किमिति तद्वद ॥

नन्दिकेश्वरः—

मुने शृणु पुरावृत्तं कैलासे मेरुधन्वना ।
आदिष्टस्तीर्थयात्रार्थं गौतमस्तपसां निधिः ॥

* * * *

तत्र सिद्धा महात्मानो मुनयश्च दृढव्रताः ।
कन्दमूलफलाहारा हृष्टाश्शोणाचले गिरौ ॥

---

No. **2368.** अष्टषष्टिशिवस्थानानि.

AṢṬAṢAṢṬIŚIVASTHĀNĀNI.

Pages, 4. Lines, 7 on a page.

Begins on fol. 104*b* of the MS. described under No. 119.

Complete.

This gives a list of the names of 68 holy shrines dedicated to Śiva.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

कैलासशिखरे रम्ये नानाधातुविचित्रिते ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥

* * * *

नमस्कृत्य सुखासीनं ब्रह्मा पृच्छति शङ्करम् ।
केषु केषु च स्थानेषु द्रष्टव्यानि मया प्रभो ।

महेश्वरो(र उ)वाच—

नामानि च प्रवक्ष्यामि पुण्यान्ना(न्ना)यानि यानि च ।
एतत्ते परमं गुह्यं महापातकनाशनम् ॥

वाराणस्यां महादेवं प्रयागे तु महेश्वरम् ।
नैमिशे देवदेवेशं गयायां च पितामहम् ॥

**End:**

लिङ्गेश्वरे तु वरदं ज्वललिङ्गं ज्वलप्रिये ।
स्थानानि चाष्टषष्टिरुं(स्ते)मया प्रोक्तानि सुव्रत ॥
एतानि शृणुयाद्यस्तु पठति श्रावयेत्सुधीः ।
शिवार्चनस्य समये सर्वपापैः प्रमुच्यते ॥
सर्वान् कामानवाप्नोति शिवलोके महीयते ।

**Colophon:**

अष्टषष्टिस्थानानि संपूर्णानि ॥

---

## No. 2369. अहोबिलक्षेत्रमाहात्म्यम्.

## AHŌBILAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 91*b*. The other works herein are Pinākinīmāhātmya 1*a*, Suvarṇamukharīmāhātmya 19*a*, Śrīraṅgamāhātmya 61*a*, Vēṅkaṭagirimāhātmya 76*a*, Tattvagirimāhātmya 94*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Breaks off in the second Adhyāya.

This is a portion of the Brahmaṇḍapurāṇa, Kṣētramāhātmya-khaṇḍa, treating of the greatness of Viṣṇu as Nṛsiṁha worshipped at Ahōbila.

**Beginning:**

नैमिशेऽनिमिषक्षेत्रे मुनयः शौनकादयः।
सूतं दृष्ट्वा महात्मानं पप्रच्छुरिदमादरात् ॥
अहोबिलस्य माहात्म्यं श्रोतुकामा वयं मुने ।
ब्रूहि सर्वोपकाराय सूत पौराणिकोत्तम ॥

सूतः—

प्रणम्य परमात्मानं परमानन्दकारणम् ।
प्रवक्ष्यामि यथापूर्वं माहात्म्यं नृहरेः परम् ॥
पुरा तु जाह्नवीतीरे मुनयस्सनकादयः ।
कृतात्मानः परं प्रीत्या पप्रच्छुर्नारदं मुनिम् ॥
भगवन् ज्ञानिनां श्रेष्ठ भवसंतप्तचेतसाम् ।
उत्तारणकर प्राज्ञ सत्यसङ्कल्पवैभव ॥

* * * *

अयने दशभागे तु ये विशेषा महीयसः ।
भूधरस्योत्तरे भागे योजनद्वयसंमिते ॥
नन्द्याश्रमं महापुण्यं . . . . . ।
. . . . . यथासान्त्वं सुभूषितम् ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे क्षेत्रमाहात्म्यखण्डे श्रीमदहोबिलमाहात्म्ये प्रथमोऽध्यायः ॥

भगवन् तपसां श्रेष्ठ नारदाना . . . . ।
. . . . शैलस्य नामासीद्गरुडाचल नारद ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शृणुध्वं मुनयस्सर्वे सावधानमिदं वचः ।

**End:**

पितस्तवाहं प्रेष्यो वै भूयो भूयोऽनुशाधि माम् ।
दर्शनात्तव वै ब्रह्मन् कृतार्थोऽस्मि न संशयः ॥

कश्यपः—

आराधय जगन्नाथ.

---

## No. 2370. आदिपुरमाहात्म्यम्.

## ĀDIPURAMĀHĀTMYAM.

Substance, paper. Size, 13½ × 8⅜ inches. Pages, 137. Lines, 24 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 127*a*. The other work herein is Kāñcīmāhātmya 1*a*.

Complete.

A portion of the Brahmāṇḍapurāṇa, treating of the greatness and holiness of Ādipura, to the west of Konga or Coimbatore; in 26 Adhyāyas.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

वरमरतकवल्लीवल्लभं वेदवेद्यं
(कमलभव) ननाथश्चन्द्रसूर्याग्निनेत्रम् ।
सकलदुरितसङ्घध्वंसनं सर्वदेवं
भवभयहरमीडे भक्तलोकैकपालम् ॥

वक्ष्येऽस्मिन् भारते वर्षे सर्ववर्षोत्तमोत्तमे ।
अद्भुतं नैमिशारण्यं शरण्यं सर्वदेहिनाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलिकालभयात्सर्वे शौनकाद्या महर्षयः ।
वरेण्ये नैमिशारण्ये न्यैवात्सुर्ब्रह्मवादिनः ॥
आरेभिरे ब्रह्मसत्रं सहस्रसममादरात् ।
कलौ दुरितभूयिष्ठे दुर्बलानां हि देहिनाम् ॥
रक्षणायैव साधूनां धर्मानुष्ठानतत्पराः ।
तत्राविरासीत्सुमनाः सूतस्सर्वपुराणवित् ॥
जाह्नवीं सर्वफलदां पावनं नैमिशं वनम् ।
ऋषीणां बालवृद्धांश्च सहशिष्यान् सहानुगान् ॥
मृगपक्षिगणान्रम्यान् पादपान्विविधानपि ।

* * *

पुरा कैलासशिखरे नन्दिकेशाय शम्भुना ।
विस्तरेणोपदिष्टं यत् ब्रह्मविष्ण्वादिसन्निधौ ॥
ततः कुमाराय ततः नन्दिकेशेन बोधितम् ।
कुमारो नारदायाह सोऽपि व्यासाय ते तु सः ॥
इतीदं भवता पूर्वं संक्षिप्यास्माकमीरितम् ।
विस्तरेणाद्य वक्तव्यं तत्र नः कौतुकं बहु ॥
यदि ते करुणास्मासु यद्यस्ति सुकृतञ्च नः ।
आगो विस्मृतिसंभूतं क्षम्यतां तर्हि सांप्रतम् ॥

**Colophon:**

इति श्रीमद्ब्रह्माण्डपुराणे कौमारखण्डे उपरिभागे कुमारनारदसंवादे क्षेत्रतीर्थप्रशंसायामादिपुरमाहात्म्ये सूताविर्भावो नाम प्रथमोऽध्यायः ॥

श्रीसूतः—

सर्वेष्वपि पुराणेषु ब्रह्माण्डं मुख्यमुच्यते ।
कौमारखण्डन्तत्रापि मुख्यं पुण्यकथास्पदम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्राप्यादिपुरेशस्य माहात्म्यमतिपावनम् ।
सर्वभाग्योदयादेतद्यासेनात्र प्रपञ्चितम् ॥

**End:**

इतीदमुक्त्वा शिवधर्मयुक्तं पुराणमग्र्यं पुरतः स्थितानाम् ।
विनीतवेषास्स्मरतं यथोक्तं मया रहस्यं किल शैवमाद्यम् ॥
तेनैवमुक्ताश्च मुनिप्रवीराः स्वनाम चोच्चार्य तदा प्रणेदु(मु)ः ।
मुदान्विताश्चैनमपूजयंस्तत्कृताशिषस्सूतमतिप्रहृष्टाः ॥
कृतार्थास्स्म कृतार्थास्स्म कृतार्थास्स्म त्वयाधुना ।
हितार्थं नः त्वदन्यः कः प्रवक्ता स्याज्जगत्रये ॥

**Colophon:**

इति श्रीमद्ब्रह्माण्डपुराणे कौमारखण्डे कुमारनारदसंवादे क्षेत्रतीर्थप्रशंसायामादिपुरमाहात्म्ये पुराणस्वरूपमहिमा नाम षड्विंशोऽध्यायः ॥

---

No. **2371.** उत्तरगीता.

UTTARAGĪTĀ.

Substance, paper. Size, 7¼ × 4 inches. Pages, 27. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, not old.

Begins on fol. 1*a*. The other works herein are Nadīstōtra 15*a*, Sūryastava 17*a*.

Complete.

A treatise in 4 Adhyāyas on Vēdānta and the philosophy of conduct. The work is in imitation of the famous Bhagavadgītā, and is supposed to be made up of the teachings given by Kṛṣṇa to Arjuna long after the war of the Mahābhārata. Hence its name as the "Later Lay."

**Beginning:**

परं परस्थं(स्थाः) प्रकृतेरनादिम्
एकं निविष्टं बहुधा गुहासु ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वालयं सर्वचराचरस्थं
तमेव विष्णुं शरणं प्रपद्ये ॥

अर्जुन उवाच—

यदेकं निष्कळं ब्रह्म व्योमातीतं निरञ्जनम् ।
निर्मलं परमं दिव्यमप्रमेयमनुत्तमम् ॥
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ।
कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्मलम् ॥
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् ।
नीवाराग्रै(ग्र) स्थितं सूक्ष्मं ज्ञानयोगस्वरूपिणम् ॥
निर्गुणं परमं गुह्यं भिन्नाञ्जनसमप्रभम् ।
तत्क्षणादेव मुच्येत तज्ज्ञानं ब्रूहि केशव ॥

श्रीभगवानुवाच—

साधु साधु महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां पृच्छसि तत्त्वार्थमशेषं प्रवदाम्यहम् ॥
आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात् ।
भावेन गतकाम्यानां भावना(नां) ब्रह्म चक्षते ॥

**End:**

तस्मात्सर्वप्रयत्नेन योगयुक्तो भवार्जुन ।
अन्तस्सङ्गं बहिस्सङ्गमात्मसङ्गं परित्यजेत् ॥
सर्वसङ्गनिवृत्तात्मा पश्य(श्ये)दात्मानमात्मनि ।
विषयासक्तेष्विदं शास्त्रमन्धस्यादर्शनं यथा ॥
गीतासारमिदं प्रोक्तं गीतासारसमुच्चयम् ।
तत्र स्थितं परं ब्रह्म ज्ञानं वेद सुनिश्चलम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदं शास्त्रं मया प्रोक्तं गुह्यं वेदार्थविस्तरम् ।
यदुक्तं ते मया भक्त्या स गच्छेद्विष्णुसाम्यताम् ॥

एतद्गुह्यं पापहरं पुण्यं दुस्स्वप्ननाशनम् ।
पठतां शृण्वतां चैव विष्णोर्माहात्म्यमुत्तमम् ॥

अचलमचलवर्णं वर्णरूपादिहीनं
निखिलगतमगुह्यं गुह्यमेकं सुसूक्ष्मम् ।

अमलमतुलतत्त्वादेव पश्यन्ति रूपं
हृदयकमलमध्ये जीवमुक्ता भवन्ति ॥

हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यम् ।

हरिगुरुशिवयोगं सर्वभूतस्थमेकं
सकृदपि मनसा मां ध्यायते यस्स मुक्तः ॥

**Colophon:**

इति श्रीमदुत्तरगीतासु योगशास्त्रे श्रीकृष्णार्जुनसंवादे चतुर्थोऽध्यायः ।

The MS. is dated: Sunday, the 11th of Margaśira-śuddha in the year Virōdhi.

## No. 2372. उत्तरगीता.

## UTTARAGĪTĀ.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 11. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Garbhagītā 6*a*, Śrutigītā 7*a*, Anusmṛti 10*a*, Bhīṣmastuti 14*a*, Bhāratasāvitrī 17*a*, Chāyapuruṣalakṣaṇa 21*a*, Yōgatarāvali 24*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 3. The work is here said to belong to the Aśvamēdhaparvan of the Mahābhārata; but it is not to be found therein in the printed editions of the Mahābhārata. The colophon in this MS. wrongly describes this work also as Bhagavadgītā.

**Beginning:**

अखण्डसच्चिदानन्दमवाङ्मानसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

अर्जुन उवाच—

यदेकं निष्कलं ब्रह्म व्योमातीतं निरञ्जनम् ।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥
कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्मलम् ।
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् ॥
हृदयाम्बुजमध्यस्थं ज्ञानज्ञेयस्वरूपकम् ।
तत्क्षणादेव मुच्येत यद्ज्ञानाद्ब्रूहि केशव[:] ॥

श्रीभगवानुवाच—

साधु पृष्टं महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां पृच्छसि तोपा(तत्त्वा)र्थमशेषं प्रवदाम्यहम् ॥
आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात् ।
योगेन गतकामानां भावना(नां)ब्रह्म चक्षते ॥

**End:**

पूर्ण(र्णं)तन्तु निराकारं पद्मसूत्रं निराकृतिम् ।
संचिन्त्य निर्मलं शान्तं चिन्ता(न्त्या)चिन्त(न्त्य)विवर्जितः ॥
सर्वचिन्ताविनिर्मुक्त(:) निश्चिन्त्यमचलं भवेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीमहाभारते शतसहस्र्यां संहितायां वैयासिक्याम् अश्वमेधपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे आत्मयोगो नाम तृतीयोऽध्यायः ॥

---

## No. 2373. उत्तरगीता.

### UTTARAGĪTĀ.

Substance, paper. Size, $12\frac{7}{8} \times 8\frac{1}{8}$ inches. Pages, 14. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 3. The 3rd Adhyāya herein contains only 17 stanzas. Similar to the above.

Begins on fol. 21*a*. The other works herein are :—

| | Fol. |
|---|---|
| Saṁhārabhairavamantra .. .. | 1*a* |
| Ādityahṛdaya .. .. .. .. | 2*b* |
| Tṛca-arghyapradāna .. .. .. | 3*a* |
| Sūryanārāyaṇakavaca .. .. .. | 5*a* |
| Nārāyaṇavarmamantra .. .. .. | 10*b* |
| Nārāyaṇamantra .. .. .. | 14*a* |
| Sudarśanakavacastōtra .. .. .. | 15*a* |
| Hanūmatkavaca .. .. .. | 18*a* |
| Rāmamantra .. .. .. .. | 19*b* |
| Liṅgalakṣaṇa .. .. .. .. | 20*b* |
| Garbhagītā .. .. .. .. | 27*b* |
| Viṣṇusahasranāmabhāṣya .. .. | 29*b* |
| Viṣṇusahasranāmanirukti .. .. | 98*b* |
| Vivāhakalpa .. .. .. .. | 106*a* |
| Āmnāyatantramālikāstōtra .. .. | 116*a* |
| Pañcākṣarīdhyāna .. .. .. | 118*a* |
| Dakṣiṇāmūrtidhyāna .. .. .. | 118*b* |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | Fol. |
|---|---|
| Gurudhyāna .. .. .. .. | ibid. |
| Paramēśvarīdhyāna .. .. .. | 120a |
| Śivāṣṭaka .. .. .. .. | 121a |
| Mārkaṇḍēyēśvarastava .. .. .. | 122a |
| Annapūrṇādhyāna .. .. .. | 123b |
| Bālāmantraprayōgasādhana .. .. | 126b |
| Bālāpūjāvidhāna .. .. .. | 127b |
| Atharvaṇarahasyalakṣmīdhyāna .. .. | 129b |
| Lakṣmīnārāyaṇadhyāna .. .. .. | 137b |
| Lakṣmīkavaca .. .. .. .. | 138b |


**Beginning :**

अखण्डं सच्चिदानन्दमवाङ्मानसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

परम्परस्मात्प्र(: प्र)कृतेरनादिम्
एकं निविष्टं बहुधा गुणानु(ह्रासु) ।
सर्वालयं सर्वचराचरस्थं
त्वामेव विष्णुं शरणं प्रपद्ये ॥

अर्जुनः—

यदेकं निष्कळं ब्रह्म व्योमातीतं निरञ्जनम् ।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥
कारणं योग(निर्मुक्तं हेतुसाधनवार्जितम् ।
हृदयाम्बुजमध्यस्थं हेतुसाधनवर्जित(ज्ञानज्ञेयस्वरूपक)म् ॥
तत्क्षणादेव मुच्येत तज्ज्ञानं ब्रूहि केशव ।

श्रीभगवानुवाच—

साधु पृष्टं महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां पृच्छसि तत्त्वार्थमशेषं प्रवदाम्यहम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात् ।
योगेन गतकामानां भावना(नां)ब्रह्म चक्षते ॥

**End:**

दृश्यते चेत्खगाकारं खगाकारं विचिन्तयेत् ।
सकलं निष्कलं सूक्ष्मं मोक्षद्वारेण निर्गतम् ॥
अपवर्गस्य निर्वाणं परमं विष्णुमव्ययम् ।
अहं ब्रह्मेति यत्सर्वं विजानाति नरस्सदा ॥
हन्यात्स्वयमिमान् कामान् सर्वाशी सर्वविक्रयी ।
सर्वं निषिद्धं कृत्वापि कर्मभिर्न स बध्यते ॥
निमिषं निमिषार्धं वा शीताशीतनिवारणम् ।
अचला केशवे भक्तिः विभवैः किं प्रयोजनम् ॥
भिक्षान्नं देहरक्षार्थं वस्त्रं शीतनिवारणम् ।
अश्मानं च हिरण्यं च शाकं शाल्योदनं तथा ॥
समानं चिन्तयेद्योगी यदि चिन्त्यमवेक्ष्य(पेक्ष)ते ।
भूतवस्तुन(न्य)शोति(चि)त्वे पुनर्जन्म न विद्यते ।
आत्मयोगवतो(मवो)चद्यो भक्तियोगं(ग) शिरोमणिम् ।
तं वन्दे परमात्मानं नन्दनन्दनमीश्वरम् ॥

**Colophon:**

हरिः ओं तत्सदिति श्रीभगवदुत्तरगीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम तृतीयोऽध्यायः ।

---

No. **2374.** **उत्तरगीता.**

UTTARAGĪTĀ.

Pages, 11. Lines, 5 on a page.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Begins on fol. 117*a* of the MS. described under No. 2022.

Adhyāyas 1 to 3; the third Adhyāya contains about 20 stanzas.

---

## No. 2375. उत्तरगीता.

## UTTARAGĪTĀ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 12. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhagavadgītāsāra 7*a*, Bhagavadgītāmāhātmya 12*a*, Līlāsaṅgraha 15*a*.

Adhyāyas 1 to 3. Same work as the last.

---

## No. 2376. उत्तरगीता.

## UTTARAGĪTĀ.

Pages, 24. Lines, 7 on a page.

Begins on fol. 65*a* of the MS. described under No. 2040.

Adhyāyas 1 to 3, complete. Same work as the above.

This MS. also makes this work a portion of the Mahābhārata.

---

## No. 2377. उत्तरगीताव्याख्या.

## UTTARAGĪTĀVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 22. Lines, 4 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāya I, incomplete.

The commentary, according to the colophon found in the MS. described under the next number, is by Gauḍapādācārya.

**Beginning:**

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह खलु भगवानर्जुनश्च धर्मक्षेत्रकुरुक्षेत्रे भगवदुपदिष्टमात्मतत्त्वोपदेशं विषयभोगप्रापकत्वेन विस्मृत्य पुनस्तदेवात्मतत्त्वं ज्ञातुं भगवन्तं पृच्छति :—

अर्जुन उवाच—

यदेकं निष्कळं ब्रह्म व्योमातीतं निरञ्जनम् ।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥ १ ॥
कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्मलम् ।
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् ॥ २ ॥

टीका.—हे केशव यद्ज्ञानात् यस्य ब्रह्मणः सम्यग्ज्ञानात् ॥

**End :**

अवाच्यं चावाङ्मनसगोचरम् । प्रणवस्याकारोकारमकारात्मकनादबिन्दुकळात्मकस्य सकलवेदसारस्य । अक्षरं ब्रह्म यो वेद स वेदवित् वेदान्तार्थज्ञानी नान्य इत्यर्थः ॥

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥

---

No. **2378**. उत्तरगीताव्याख्या.

UTTARAGĪTĀVYĀKHYĀ.

Substance, paper. Size, $12\frac{1}{2} \times 9\frac{3}{4}$ inches. Pages, 30. Lines, 25 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in 3 Adhyāyas, the 3rd Adhyāya containing 14 stanzas.

The commentary is by Gauḍapādācārya.

**End :**

भिक्षान्नं देहरक्षार्थं वस्त्रं शीतनिवारणम् ।
अश्मानं च हिरण्यं च शाकं शाल्योदनं तथा ॥ १४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समानं चिन्तयेद्योगी यदि चित्त(न्त्य)मपेक्षते । इति ।

योगी चिन्त्यं मोक्षं यद्यपेक्षते तर्हि देहार्थमेव भिक्षान्नं चिन्तयेत् न त्विन्द्रियप्रीत्युत्साह(त्पादनार्थ)मिति भावः । वस्त्रं च शीतनिवारणार्थं चिन्तयेत् न त्वलङ्काराय । अश्मानं पाषाणं सुवर्णं हिरण्यं च शाकं शाल्योदनं च हेयोपादेय(वैषम्य)राहित्येन चिन्तयेत् । १४ । किं च.

भूतवस्तू(स्तु)न्यशोचित्वे पुनर्जन्म न विद्यत इति ।

भूतवस्तू(स्तु)नि अशोचित्वे गतमिति दुःखराहित्ये सिद्धे । उपलक्षणमेतत्—आगामिवस्तुनिरपेक्षत्वे सिद्धे वर्तमानवस्तुनि लब्धे हर्षराहित्ये सिद्धे च पुनर्जन्म न विद्यत इत्यर्थः ॥

आत्मयोगमवोचद्यो भक्तियोगशिरोमणिम् ।
तं वन्दे परमात्मानं नन्दनन्दनमीश्वरम् ॥

**Colophon :**

इति श्रीगौडपादाचार्यविरचितायाम् उत्तरगीताव्याख्यायां तृतीयोऽध्यायस्समाप्तः ॥

२१–२–९५. जयसंवत्सरमाघबहुल १३ त्रयोदश्यां समाप्तः ॥

Said to have been copied from a MS. in the Mysore Oriental Library and compared with the original 26th February 1895.

---

## No. 2379. उत्तरगीताव्याख्या.

## UTTARAGĪTĀVYĀKHYĀ.

Pages, 285. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 277.

Complete.

Same work as the above.

**Beginning :**

उत्तरगीता सव्याख्या—

इह खलु भगवान् पार्थः धर्मक्षेत्रे कुरुक्षेत्रे भगवदुपदिष्टमात्मतत्त्वोपदेशं विषयभोगप्रावण्येन विस्मृत्य पुनस्तदेवात्मतत्त्वं ज्ञातुं भगवन्तं पृच्छति । अर्जुन उवाच—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मू.

यदेकं निष्कलं ब्रह्म व्योमातीतं निरञ्जनम् ।
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितम् ॥

कारणं योगनिर्मुक्तं हेतुसाधनवर्जितम् ।
हृदयाम्बुजमध्यस्थं ज्ञानज्ञेयस्वरूपकम् ॥

तत्क्षणादेव मुच्येत यज्ज्ञानाद्ब्रूहि केशव ।

हे केशव यज्ज्ञानात् यस्य ब्रह्मणः सम्यग्ज्ञानात् तत्क्षणादेव ज्ञानोत्तरक्षण एव मुच्येत अविद्यानिवृत्तिद्वारा आनन्दावाप्तिर्भवेत् तद्ब्रूहि स्वरूपतटस्थलक्षणाभ्यां प्रतिपादयेत्यर्थः । ते एव लक्षणे दर्शयति यदित्यादिना । एकं सजातीयविजातीयस्वगतभेदरहितं, निष्कलम् अवयवरहितं, व्योमातीतम् आकाशादिचतुर्विंशतितत्त्वातीतं, निरञ्जनं स्वयंप्रकाशम्, अप्रतर्क्यम् अमनोगोचरं, यन्मनसा न मनुतेति श्रुतेः, अविज्ञेयं प्रमाणाविषयं, यद्वाचानिरुक्तं, यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह इति श्रुतेः । विनाशोत्पत्तिवर्जितं त्रैकालिकं, कारणं सर्वोत्पत्तिमन्निमित्तोपादानभूतं, योगनिर्मुक्तं वस्त्वन्तरसंबन्धरहितं, हेतुसाधनवर्जितं निमित्तत्वोपादानत्ववर्जितमित्यर्थः । स्वस्य सनातनत्वेन ताभ्यामेव वर्जितमिति वा । हृदयाम्बुजमध्यस्थं सर्वलोकान्तर्नियामकतया सर्वलोकहृदयकमलमध्यस्थम् । ज्ञानं विषयप्रकाशः, ज्ञेयं विषयः, तदुभयस्वरूपं तदुभयसत्तात्मकं यद्ब्रह्म, तत्कीदृशमिति प्रश्नार्थः । एवमर्जुनेन पृष्टो भगवान् प्रश्नार्थमभिनन्दन्नुत्तरमाह श्रीभगवानुवाच—

साधु पृष्टं महाबाहो बुद्धिमानसि पाण्डव ।
यन्मां पृच्छसि तत्त्वार्थमशेषं प्रवदाम्यहम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

भिक्षान्नं देहरक्षार्थं वस्त्रं शीतनिवारणम् ।
अश्मानश्च हिरण्यं च शाकं शाल्योदनं तथा ॥

समानं चिन्तयेद्योगी यदि चिन्त्यमपेक्षत इति ।

योगी चिन्त्यं मोक्षं यद्यपेक्षते, तर्हि देहरक्षार्थमेव भिक्षान्नं चिन्तयेत् न त्विन्द्रियप्रीत्यर्थमित्यर्थः । वस्त्रं च शीतनिवारणार्थं चिन्तयेत् न त्वलङ्काराय । अश्मानं पाषाणं सुवर्णं हिरण्यं च शाकं शाल्योदनश्च हेयोपादेयवैषम्यराहित्येन चिन्तयेत् । किञ्च.

भूतवस्तुन्यशोचित्वे पुनर्जन्म न विद्यत इति ।

भूतवस्तुन्यशोचित्वे दुःखराहित्ये सिद्धे । उपलक्षणमेतत्—आगामिवस्तुनिरपेक्षत्वे सिद्धे वर्तमानवस्तुनि लब्धे हर्षराहित्ये च सिद्धे पुनर्जन्म न विद्यत इति ॥

आत्मयोगमवोचद्यो भक्तियोगशिरोमणिम् ।
तं वन्दे परमात्मानं नन्दनन्दनमीश्वरम् ॥

**Colophon:**

इति श्रीगौडपादाचार्यविरचितायां भगवदुत्तरगीताव्याख्यायां तृतीयोऽध्यायः समाप्तः ॥

---

## No. 2380. कपिलोपाख्यानम्.
## KAPILŌPĀKHYĀNAM.

Substance, paper. Size, 7⅓ × 6 inches. Pages, 7. Lines, 16 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 31*a*. The other works herein are Mārkaṇḍēyāṣṭaka 1*a*, Ālavandārstōtra 2*a*, Rukmiṇīsandēśa 7*b*, Yatirājasaptati 9*b*, Śrutigītā 18*a*, Gajēndramōkṣa 22*a*, Bhramaragītā 29*b*, Śukastuti 34*a*, Mucukundōpākhyāna 36*a*, Darśatarpaṇamantra 40*b*, Kṛṣṇayajussandhyāvandana 48*b*, Kṛṣṇakarṇāmṛta 55*a*, Nyāsaśataka 56*a*, Vēdāntācāryamaṅgalāśāsana 57*a*, Drāviḍaprabandhataniyan 60*a*, Śṛṅgāraślōka 65*a*, Yakṣapraśna 68*a*, Kṛṣṇāṣṭōttaraśatanāmāvali, last leaf.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

This forms the 28th Adhyāya in the 3rd Skandha of the Bhāgavata.

It treats of Yōgalakṣaṇa as related by Kapila to Dēvahūti.

**Beginning:**

श्रीभगवान्——

योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ।
मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥

स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् ।
दैवाल्लब्धेन सन्तोष आत्मविच्चरणार्चनम् ॥

ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा ।
मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥

अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ।
ब्रह्मचर्यं तपश्शौचं स्वाध्यायः पुरुषार्चनम् ॥

**End:**

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
ईक्षेतानन्यभावेन भूतेष्वपि तदात्मताम् ॥

स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते ।
योनीनां गुणवैषम्यं तदात्मा प्रकृतौ स्थितः ॥

तस्मादिमां स्वप्रकृतिन्दैवीं सदसदात्मिकाम् ।
दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥

**Colophon:**

इति श्रीमद्भागवते तृतीयस्कन्धे कपिलोपाख्याने साधनानुष्ठानं नामाष्टाविंशोऽध्यायः ॥

The book is said to have belonged to Poyyapākkam Cakravarti Raṅgasvāmi Ayyaṅgar.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2381.** काञ्चीमाहात्म्यम्.

KĀÑCĪMĀHĀTMYAM.

Pages, 251. Lines, 22 on a page. Character, Telugu and Grantha.

Begins on fol. 1*a* of the MS. described under No. 2370.

Complete in 50 Adhyāyas.

This is a portion of the Skāndapurāṇa of Sanatkumārasaṁhitā in the Kālikākhaṇḍa in Tīrthapraśaṁsā. It treats of the sanctity of all the Śiva shrines and of some of the Viṣṇu shrines at Kāñci (Conjeevaram).

**Beginning:**

स्वकटजातमदाश्रितबम्भरप्रकटकूजितनादितदिक्तटम् ।
निकटवासिनमेकरसालिनो निकटचक्रविनायकमाश्रये ॥

पुरा केचिन्महाभागा मुनयः संशितव्रताः ।
नैमिशे परमे पुण्ये तपस्तेपुस्सुदुष्करम् ॥

वसिष्ठः काश्यपः कण्वः पुलस्त्यः पुलहः क्रतुः ।
विश्वामित्रो भरद्वाजः पराशरशुकावपि ॥

* * * *

सर्वे संभूय सुचिरं मोक्षोपायमचिन्तयन् ।
संसारविषवृक्षोऽयं सर्वदोषफलो महान् ॥

साक्षात्कारकुठारेण भेद्यस्साम्बस्य नान्यथा ।
इति निश्चित्य चान्योन्यं तदुपायमचिन्तयन् ॥
वसिष्ठस्तत्र तपतां वरिष्ठः प्रत्युवाच ह ।
तप एव परो मार्गः तपसा दृश्यते शिवः ॥
तपसा स्वर्गमारूढः देवत्वमपि वा नरः ।

* * * *

दू(दु)र्वासा वैष्णवं मत्वा पदं लघु तदाब्रवीत् ।
सन्न्यासेन शिवप्राप्तिः सर्वेषां मुक्तिदायिनी ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्येवं विवदत्स्विष्टं महर्षिष्वपि योगिषु ।
त . . . . कृष्ट इव तेषां महात्मनाम् ॥

व्यासप्रसादसंपन्नश्शिष्यस्तस्य तपोधनः ।
तत्त्वयाथार्थ्यनिश्चेता शिवध्यानपरायणः ॥

रुद्राक्षमालिकाक्लृप्तभूषणैर्भूषिताङ्गवान् ।
भस्मत्रिपुण्ड्रविलसदुत्तमाङ्गविराजितः ॥

सूतः पौराणिकश्श्रेष्ठः संप्राप्तः . . वात् ।
तं दृष्ट्वा मुनयस्सर्वे पुलकाङ्कितविग्रहाः ॥

तस्मै साम च पूजाश्च यथावदनुपूर्वशः ।
कृत्वासनार्घ्यपाद्याद्यैः पप्रच्छुस्ते मुनीश्वराः ॥

ऋषयः—

एते वयं महाभाग संशयाविष्टमानसाः ।
मुमुक्षवोऽस्मात्संसारात्तपःपू . . . ॥

तपसा तेन विज्ञातो मुक्तेर्हेतुर्द्विजोत्तमैः ।
साक्षात्कारश्शिवस्येति वेदान्तज्ञानचक्षुषा ॥

तदुपायमजानन्तो ब्रुवन्त इतरेतरम् ।
खिन्ना विवदमानाश्च ज्ञातोऽस्माभिर्न निर्णयः ॥

**End:**

नास्ति काञ्चीसमं क्षेत्रं सर्वसिद्धिप्रदं भुवि ।
कामाक्षीसदृशा(शी)देवी नास्ति मङ्गलदेवता ॥

सर्वतीर्थसमं तीर्थं नास्ति पापनिबर्हणम् ।
कामकोटिसमं पीठं नास्ति नास्ति जगत्त्रये ॥

कामाक्षीकुचकुम्भचूचुकशिखा(हारा)यिताङ्को(ङ्गो)ज्ज्वलो
भक्तानेकमनोरथामरमणिर्लोकैकरक्षामणिः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेवानम्ररमेशमुख्यदिविषत्कोटीररत्नप्रभा-
प्राग्भाराञ्चितचूतमूलवसतिः पायादपायाच्छिवः ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे काञ्चीस्थानमाहात्म्ये श्रीमदेकाम्रनाथपुराणमहिमानुवर्णनं नाम पञ्चाशोऽध्यायः ॥

The following is the list of contents as made out from the colophons:

१. मुनिगणप्रश्नानुवर्णनम्.
२, ३.
४. सत्यनाथमहिमानुवर्णनम्.
५. पुण्यकोटीश्वरमहिमानुवर्णनम्
६. विघ्नेशोत्पत्तिवर्णनम्.
७.
८. मणिकण्ठेश्वरमहिमानुवर्णनम्.
९. मणिकण्ठेश्वरफणाधरेश्वरमहिमानुवर्णनम्.
१०. व्यासश्रान्ताश्रयेश्वरमहिमानुवर्णनम्.
११. पराशरेश्वरमहिमानुवर्णनम्.
१२. अष्टभुजेश्वर- आदिपीठेश- नृसिंहेश- जैगिषव्येश- गरुडेश- फणाधरेश्वर- महिमानुवर्णनम्.
१३. इष्टसिद्धीश्वरमहिमानुवर्णनम्.
१४. माण्डुकर्णीश्वर- वह्नीश्वर- ज्वरहरेश्वरमहिमानुवर्णनम्.
१५. उपमन्युपूजितस्वयंभुलिङ्गत्रिदशेश्वरपाण्डवदूतेश्वरपाश्रिमेश्वरवर्णनम्.
१६. अनेकपेश्वरकैलासनाथेश्वरमहिमानुवर्णनम्.
१७. कैलासनाथागस्त्येश्वरवीरराघवेश्व(र)बलभद्रेश्वरकल्कीश्व(र)वल्मीकेश्वरमहिमानुवर्णनम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१८. भैरवेश्वरमाहिमानुवर्णनम्.

१९. विष्वक्सेनेश्वरविकटचक्राविघ्नेश्वरम०.

२०. दक्षेश्वरम०.

२१. त्रिपुरारीश्वरहिरण्येश्वरहिरण्याक्षेश्वरादिम०.

२२. शरभेश्वरवराहेश्वरस्वयम्भूलिङ्गान्धकेश्वरम०.

२३. बाणेश्वर· औणकान्तेश्वर- जलन्धरेश्वरम०.

२४. जलन्धरेशम०.

२५. विष्णुवरस्थानेश्वरम०.

२६. क्रूरस्थानेश्वरपरशुरामेश्वरम०.

२७. रेणुकेश्वरम०.

२८. गोविन्दपाठकस्थानस्थितदक्षिणामूर्तिपश्चाशदधिकयोगाचार्यप्रतिष्ठितशिवलिङ्गानां म०.

२९. कामेश्वरतीर्थराजेश्वरसर्वतीर्थमहिमागङ्गाधरेश्वरविश्वनाथेश्वरमुक्तिमण्डपमुक्त्यालयमण्डपपरमानन्दमण्डपजवन्तीश्वरशूलतीर्थपरिधिकुण्डसूर्येश्वरस्पर्शवेदिशिलालिङ्गचन्द्रेश्वरशिततटागसप्तग्रहलिङ्गअपुनर्भवेश्वरमुक्तीश्वरम०

३०. महालिङ्गानुवर्णनम्.

३१. वीराट्टहासेश्वरकामकोटिपीठबिलद्वारचक्रतीर्थश्यामवर्णविष्णुकृष्णगन्धलक्ष्मीकामाक्षीचोरविष्णुमहाभूतस्थिताविष्णुनिषण्णाविष्णुशयानविष्णुमहिमानुवर्णनम्.

३२. धर्मपुत्रलिङ्गभीमकिरीटिनकुलसहदेवद्रौपदीधृष्टद्युम्नादिराजलिङ्गसमवायरोमशादिमुनीश्वरालिङ्गसमूहकैलासनाथशुक्तिकातीर्थतटस्थितस्वयंभुलिङ्गशुक्तिकातीर्थतत्कूलस्थितमत्स्येश्वराभिरामेश्वरवामनकुण्डत्रिविक्रमस्थानम०.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३३. कृष्णेश्वरचन्द्रकलाखण्डचन्द्रिकाविष्णुत्वकौशिकेश्वरमहाकालेश्वर-देवसेनापतीश्वरकुमारकोष्ठसुब्रह्मण्यम०.

३४. कुमारकोष्ठसेनापतीश्वरनारायणमायामोहिनीश्वरमहाशास्त्रेश्वरम०.

३५. मङ्गलमण्डपत्रैसिंहासनमङ्गलेशमङ्गलतीर्थरामेश्वरसीतेशलक्ष्मणेशसुग्रीवेशविभीषणेशहनुमदीशमातलीशानन्तपद्मनाभेशश्मशानेश्वरम०.

३६. वेदैकाम्रवृक्षाविर्भावकाञ्चीपुरीवर्णनश्रीमदेकाम्रनाथम०.

३७. कम्पानदीमहिमानुवर्णनवेदैकाम्रतरुमहिमवेदनूपुरेश्वरकदम्बेश्वराध्यापकेश्वरम०.

३८. ब्रह्मपूजितस्वच्छैकाम्रेश्वररुद्रपूजितभद्रैकाम्रेश्वरवालीश्वरम०.

३९. श्रीमदेकाम्रनाथस्तनकङ्कणमुद्राङ्काविर्भावम०.

४०. एकाम्रनाथलिङ्गे देवीस्तनवलयाङ्काविर्भाववर्णनम्.

४१. वृषभेश्वरकामाक्ष्यागमनम्.

४२. रक्षाबन्धनेश्वरकटकेश्वरश्रीमदेकाम्रनाथलिङ्गे देवीस्तनवलयाङ्काविर्भाववर्णनम्.

४३. अगस्त्येश्वरम०..

४४. मद्दलमाधवेश्वरम०.

४५. श्रीमदेकाम्रनाथलिङ्गे कामाक्षीदेवीस्तनकङ्कणमुद्रिकाविर्भावकामाक्षीकल्याणवर्णनम्.

४६. नित्याह्निकाचारप्रशंसा.

४७. नित्याह्निकसमुपास्यमानैकाम्रनाथमहिमानुवर्णनम्.

४८. शिवालयप्रतिष्ठाप्यपञ्चविंशतिमूर्तिभेदादिवर्णनम्.

४९. श्रीमदेकाम्रनाथमहोत्सववर्णनम्.

५०. श्रीमदेकाम्रनाथपुराणमहिमानुवर्णनम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2382. काञ्चीमाहात्म्यम्.

## KĀÑCĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 59. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 39 to 47, complete; 48th, incomplete.

Same work as the above.

---

## No. 2383. कार्तिकमाहात्म्यम्.

## KĀRTIKAMĀHĀTMYAM.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 124. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 31*a*. The other work herein is Śrīraṅgamāhātmya 1*a*.

Adhyāyas 1 to 13.

This treats of the worship of Viṣṇu and of the lighting of lamps in Vaiṣṇava shrines during the month of Kārtika (Nov.-Dec.)

**Beginning:**

सूत उवाच—

पुरा कलियुगस्यान्ते ब्रह्मलोकं गतो मुनिः ।
ददर्श लोकनाथेशं ध्यायन्तं वै जनार्दनम् ॥

पितामहं महाप्राज्ञं(सर्वदेव)नमस्कृतम् ।
स्तूयमानं मुनिगणैः ध्यायन्तं वै जनार्दनम् ॥

अप्सरोगणसङ्गीतं सिद्धचारणसेवितम् ।
मूर्तिमद्भिश्चतुर्वेदैस्सेतिहासैः पुरातनैः ॥

ससोदधिसमायुक्तं नदीभिः परिवारितम् ।
सूर्यकोटिप्रतीकाशं सर्वधर्मसमन्वितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रणिपत्य महाभक्त्या नारदस्तु पितामहम् ।
* * * *
फलं वैष्णवधर्मस्य कथयस्व सुविस्तरम् ।
येनाहं त्वत्प्रसादेन पदं यामि परं हरेः ॥
कार्त्तिकस्य तु मासस्य माहात्म्यं वक्तुमर्हसि ।
दीपदानस्य माहात्म्यं व्रतानां नियमन्तथा ॥
गोपीचन्दनमाहात्म्यं माहात्म्यं तुलसीषु च ।
मालतीपुष्पमाहात्म्यं वारिजानां महाफलम् ॥
मुनिपुष्पस्य माहात्म्यं याथातथ्येन सुव्रत ।
धात्रीफलस्य माहात्म्यं तत्पत्रैर्विष्णुपूजनात् ॥
* * * *

**Colophon:**

इति स्कान्दपुराणे कार्त्तिकमाहात्म्ये दशमोऽध्यायः ॥
मार्गशीर्षे कृष्णपक्षे पञ्चम्यामिन्दुवासरे ।
कार्त्तिकस्य तु माहात्म्ये अध्यायं दशमं स हि ॥
अलिखत्पुष्पवाख्यां च वेल्लङ्कयन्वयसंभवः ।

**End:**

एकेन हरिनाम्ना वै सर्वपापं प्रणश्यति ।
तथा गङ्गावगाहेन पापराशिर्विनश्यति ॥

**Colophon:**

इति स्कान्दपुराणे वैष्णवसारोद्धारे कार्त्तिकमाहात्म्ये त्रयोदशोऽध्यायः ॥

---

No. 2384. कार्तिकमाहात्म्यम्.

KĀRTIKAMĀHĀTMYAM.

Substance, palm-leaf. Size, $19\frac{1}{2} \times 1\frac{7}{8}$ inches. Pages, 40. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Begins on fol. 42*a*. The other work herein is Vaiśākha-māhātmya 1*a*.

Breaks off in the 21st Adhyāya.

This treats of the worship to be conducted in the temples of Viṣṇu and Śiva during the month of Kārtika, and of the lighting of lamps therein.

**Beginning :**

इन्द्रनीलमणिश्यामं सम्यग्विद्याप्रबोधकम् ।
सर्वसम्पत्प्रदं वीरं राघवं तं नमाम्यहम् ॥

ऋषयः—

सूत नः कथितं पुण्यं माहात्म्यं माधवस्य च ।
भूयोऽन्यं श्रोतुमिच्छामः कार्त्तिकस्य च वैभवम् ॥
कलौ कलुषचित्तानां दारागारात्ममानिनाम् ।
संसाराब्धौ निमग्नानामनायासेन का गतिः ॥
को धर्मस्सर्वधर्माणामधिको मोक्षसाधनः ।
को देवस्सर्वदेवेषु गुरुर्गुरुफलप्रदः ॥

* * * *

श्रीसूतः—

मुनयस्साधु पृष्टोऽहं भवद्भिर्विष्णुकीर्तनम् ।
सुसारितं जगद्भद्रं सर्वलोकसुखं वरम् ॥

* * * *

तन्निर्वाणाय कल्पेत श्रोत्रानन्दकरः परः ।

* * * *

**Colophon :**

इति श्रीस्कन्दपुराणे प्रायश्चित्तकाण्डे कार्त्तिकमाहात्म्ये प्रथमोऽध्यायः ।

**End :**

भवदागमनं मह्यं हेतुः कल्याणबु(वृ)द्धये ।
एवं वदन्तं राजानं विप्रेन्द्रोत्फुल्ललोचनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2385.** **कालहस्तिमाहात्म्यम्.**

KĀLAHASTIMĀHĀTMYAM.

Substance, palm-leaf. Size, 16⅝ × 1⅝ inches. Pages, 782. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 90, complete.

This treats of the greatness and holiness of Kālahasti, of the Śiva shrine therein, and of the river Svarṇamukharī. It professes to form part of the Śivarahasyasaṅgraha and is said to have been related by Rōmaśa to Bharadvāja.

**Beginning:**

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यस्स्युस्तं नमामि गजाननम् ॥
पुरा हि नैमिशारण्ये स(शौ)नकाद्या महर्षयः ।
नित्यं तपसि निष्णाता वाङ्मनःकर्मजे शुभे ॥
अध्वरैर्बहुसाहस्रैरीजानाः परमेश्वरम् ।
कायक्लेशादिभिश्चैव वितन्वानास्तपःकृतिम् ॥
एकदा कर्मना(णा)मन्ते धर्मशुश्रूषयर्षयः ।
पप्रच्छुः कौतुकाविष्टा विनयाद्रो(द्रौ)महर्षणिम् ॥
शुद्धं भस्मलसत्फालं रुद्राक्षालङ्कृताकृतिम् ।
वक्तारं सर्वधर्माणां पुराणानाञ्च सर्वशः ॥
तं दृष्ट्वा संभ्रमात्सर्वे सूतं सर्वार्थकोविदम् ।
अन्वयुञ्जत धर्मार्थे वाग्मिनं लोकपूजितम् ॥

ऋषयः—

व्यासशिष्य महाप्राज्ञ सूत तत्त्वविदां वर ।
ब्रूहि धर्मानशेषेण विशेषज्ञोऽसि नः प्रभो ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



के धर्माः के ह्यनुष्ठेयाः कैस्सिद्धिं लभते नरः ।
विशिष्टः कश्च धर्मेषु प्रख्यातश्च मनीषिभिः ॥
त्वं हि सर्वविदां श्रेष्ठो वक्तॄणाञ्चाधिको मतः ।
तन्नियोक्ष्यामहे श्रोतुं त्वां धर्मश्रावकं वयम् ॥
पूर्वैराचरितान्धर्मान् सरहस्यान्विधानतः ।
अघघ्नांश्चित्तशुद्ध्यर्थं त्वं नो विस्तरतो वद ॥
एवं पृष्टो महाभागैरप्येभिस्तत्त्वदर्शिभिः ।
विस्मयाविष्ट(हृदयः) सूतस्तानिदमब्रवीत् ॥

सूतः—

अहो यूयं महाभागा अपि धर्मैकलिप्सवः ।
मत्तः शुश्रूषवो धर्मान् मां पृच्छथ किमुत्तरम् ॥
अथाप्यहं प्रवक्ष्यामि यथामति सतां मुदे ।
गुरोः प्रसादान्महतः कृष्णद्वैपायनस्य वै ॥
श्रुतिस्मृतिसम(ा)र्थानां नि(नी)तानामिव दुग्धतः ।
शृणुताखिलधर्माणां परं भावं महर्षयः ॥
ज्योतिष्टोमादयस्सर्वे क्रतवश्चाप्तदक्षिणाः ।
अभयादीनि दानानि वैभवादिव्रतानि च ॥
मन्त्रा वेदा जनन्याद्याः स्मृताः परमपावनाः ।
एतेष्वपि च सर्वेषु धर्मेषु मुनिपुङ्गवाः ॥
सत्यमेव परो धर्म इति शास्त्रविनिश्चयः ।
सर्वानपि च वै धर्मान् सत्यमेवात्यरेचयत् ॥

**End :**

श्रीमद्दक्षिणकैलासमाहात्म्यञ्च तथैव हि ।
जीवन्मुक्तिप्रदानञ्च लिङ्गानां चरितं यतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतो यूयं त्वरेणैव गत्वा श्रद्धापुरस्सरम् ।
श्रीकालहस्तिनगरीं पूर्वोक्तेनैव वर्त्मना ॥
लिङ्गान् संपूज्य विधिवत् साक्षात्कृतमहेश्वर(1): ।
अभवन् कृतकृत्याश्च मा शङ्किष्ठाः(ध्वं) कदाचन ॥

अतिरहस्यमिदं कथितं मया
चलितमद्भुतमाशु शुभप्रदम् ।
गोपनीयमनमज्जनसंसदि
बोधनीयमतिशुद्धधियां सदा ॥

**Colophon:**

इति श्रीशिवरहस्यसङ्ग्रहे उपरिभागे रोमशभरद्वाजसंवादे श्रीकालहस्तिस्थलमाहात्म्ये नवतितमोऽध्यायः ॥

करचरणकृतं वा कर्मवाक्कायजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
शिव शिव करुणाब्धे श्रीमहादेव शम्भो ॥

---

No. **2386.** कालहस्तिमाहात्म्यम्.

KĀLAHASTIMĀHĀTMYAM.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 558. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 31 to 89, complete.

Herein said to form part of the Uttarakhaṇḍa of the Śiva-rahasya.

The MS. is dated Thursday, the 9th of Vaiśākha in the year Viśvāvasu.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2387. कालहस्तिमाहात्म्यम्.

## KĀLAHASTIMĀHĀTMYAM.

Pages, 30. Lines, 28 on a page.

Begins on fol. 279*a* of the MS. described under No. 118.

Adhyāyas 1 to 6, complete.

A portion of the Śivarahasya.

This is a different version of the Māhātmya and is said to have been related by Mahēśvara to Umā. Kālahasti is herein called Dakṣiṇa-Kailāsa or the Southern Kailāsa.

**Beginning:**

ऋषय ऊचुः—

सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
मुक्त्युपायं वदास्मभ्यं कृपालो मुनिसत्तम ॥
कस्सेव्यस्सर्वदेवेषु का वा जप्या मनुस्सदा ।
स्थातव्यं कुत्र वा नित्यं किं वा सर्वार्थसाधनम् ॥

* * * *

शिवे दक्षिणकैलासो विलासस्याश्रयो मम ।
स यथोत्तरकैलासस्तथैव सुखदस्तथा ॥
सुवर्णमुखरी नाम नदी तत्रास्ति शोभने ।
यज्जलस्नानमात्रेण ब्रह्महापि विमुच्यते ॥

* * * *

**Colophon:**

इत्यादिमहापुराणे शिवरहस्ये सप्तमांशे श्रीकालहस्तीश्वरप्रशंसाया-मुमामहेश्वरसंवादे दक्षिणकैलासमहिमानुवर्णनं नाम प्रथमोऽध्यायः ॥

**End:**

पूजयित्वा महादेवं जप पञ्चाक्षरं मुदा ।
तेनैव मोहविच्छित्तिः भविष्यति तव ध्रुवम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शतश्रुतिगणं पुण्यं जप रुद्रं द्विजोत्तम ।
रुद्राध्यायजपेनैव प्रीणाति भगवान् शिवः ॥

**Colophon :**

इत्यादिमहापुराणे शिवरहस्ये सप्तमांशे श्रीकालहस्तीश्वरप्रशंसायामुमामहेश्वरसंवादे दक्षिणकैलासमहिमानुवर्णनं नाम षष्ठोऽध्यायः ॥

---

## No. 2388. काशीमाहात्म्यम्.

## KĀŚĪMĀHĀTMYAM.

Substance, paper. Size, 11 × 4¼ inches. Pages, 59. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Leaves 7, 8, 9, 10 and 22 are lost.

Adhyāyas 1 to 5.

This treats of the holiness and greatness of Kāśī or Benares, and professes to form part of the Pātālakhaṇḍa of the Pādmapurāṇa. It is said to have been related by Sūta, as originally taught to him by Bhṛgu, to the sages on the sandbanks of the Rēva. A similar work is found described in C.S. 4, 21 and Lz. 212.

**Beginning :**

नारायणं नमस्कृत्य नरश्चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥
सूत उवाच—
एकदा सुखमासीनं रेवायाः पुलिने भृगुम् ।
मुनयो विनयोपेताः पप्रच्छुर्लोमशादयः ॥
मुनय ऊचुः—
भगवन् सर्वतत्त्वज्ञ तत्त्वं यत्तव निश्चितम् ।
निर्वाणपरिनिर्माणकारणं मुक्तिकाङ्क्षिणम् ॥
यद्रहस्यश्च वेदानां तन्निष्कृष्य विविच्य च ।
ब्रूहि नः श्रद्धयोपेतान् कारणत्रयतत्त्वतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वयं हि मायया मुग्धा निश्चयं न लभामहे ।

सूत उवाच—

एवं पृष्टस्स भगवान् भृगुस्तत्त्वार्थदर्शनः ।
यदुवाच तदाख्यामि तच्छृणुध्वं समाहित(ा)ः ॥

भृगुरुवाच—

साधु साधु महाभागाः साधु साधु तपोधनाः ।
भवद्भिर्यदहं तत्त्वं पृष्टस्तत्त्वविवित्सया ॥

**End:**

अष्टोत्तरशतं मार्दलिङ्गानि परिपूज्य च ।
माहात्म्यं शृणुयात्काश्यां प्रत्यहं नियमान्वितः ॥
तस्य संवत्सरेण स्यात्पुत्रः शीलगुणान्वितः ।
दीर्घायुरतिलक्ष्मीवान् शिवाराधनतत्परः ॥

**Colophon:**

इति श्रीपद्मपुराणे पातालखण्डे काशीमाहात्म्ये पञ्चमोऽध्यायः ।

समाप्तम् ॥

The book is said to have belonged to Vīrēśvara Śāstrin, a descendant of the Drāviḍa Appayadīkṣita.

---

## No. 2389. कुन्दारण्यमाहात्म्यम्.

## KUNDĀRAṆYAMĀHĀTMYAM.

Pages, 47. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2117.

A portion of the Brāhma Purāṇa. Adhyāyas 1 to 6, complete; 7th, incomplete.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This deals with the holiness and greatness of Kundāraṇya, now called Āviḍayārkōil in the Tanjore district, and is said to have been related by Brahma to Nārada.

**Beginning:**

प्रणिपत्य जगन्नाथं पद्मयोनिं पितामहम् ।
नारदः परिपप्रच्छ प्राञ्जलिर्विनयान्वितः ॥

भगवन् सर्वदेवेश सर्वज्ञ करुणानिधे ।
त्वत्तः श्रुता मया धर्मा वर्णाश्रमसमाश्रिताः ॥

क्षेत्राणामपि पुण्यानां तीर्थानामपि सत्तम ।
इदानीं श्रोतुमिच्छामि तत्त्वसारमनुत्तमम् ॥

पुरा कूरेश्वरो नाम महादेव उमापतिः ।
कुन्दारण्ये महापुण्ये सर्वसिद्धिप्रदायके ॥

नित्यं पद्मसहस्रेण समाराध्य तु केशवम् ।
ब्रह्महत्याविनिर्मुक्तः ब्रह्मानन्दमवाप्तवान् ॥

इति संक्षेपतः प्रोक्तं भवता मम वत्सलात् ।
विस्तारात् श्रोतुमिच्छामि तस्यारण्यस्य वैभवम् ॥

ब्रह्मा—

तात नारद देवर्षे धन्योऽसि कृतपुण्यवान् ।
यत्त्वया स्मारितोऽस्म्यद्य पुरा वृत्तान्तमद्भुतम् ॥

तदद्य शृणु वक्ष्यामि सावधानतयानघ ।
पुरा कैलासशिखरे रम्योद्यानसमावृते ॥

सर्वर्षिभिस्समाकीर्णे दिव्यगन्धर्वसेविते ।
अप्सरोगणसंकीर्णैरिन्द्राद्यैरभिसंवृते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आस्थानमण्टपे दिव्ये रत्नस्तम्भशतावृते ।
वितानैर्बहुभिर्युक्ते तोरणाद्यैरलङ्कृते ॥

*  *  *  *

दिव्यसिंहासने स्वीये संस्थाप्य सुसमाहितः ।
अर्चयामास तुष्टात्मा भक्त्या परमया शिव.
ततः पप्रच्छ कुशलं सत्यलोकनिवासिनः ।
पितुर्मम महेशानस्सर्वं निरवशेषतः ॥
अहञ्च तस्य कुशलं पृष्टवान् मुनिसत्तम ।

*  *  *

इति ब्राह्मपुराणे ब्रह्मनारदसंवादे प्रथमोऽध्यायः ॥

*  *  *

षडब्दवासी ब्रह्मत्वं द्वादशाब्दं वसेत्तु यः ।
वैकुण्ठवासिनां देवि स हि श्रेष्ठतमो भवेत् ॥
इति तद्वचनं श्रुत्वा कमला कमलप्रिया ।
विच्छिन्नसंशया भूत्वा मुमोद पतिना सह ॥

**End :**

ततःप्रभृति लोकेऽस्मिन् चक्रं कृन्तति नारद ।
कपाला धारयत्य(न्त्य)द्य कं कं कुर्यादितीव हि ॥
भविष्यति महान् वादः सर्वत्र जगतीतले ।
एतदुक्तं महाभाग हत्यावृत्तान्तमद्भुतम् ॥
य एतच्छृणुयान्मर्त्यः भक्त्या परमया मुदा ।
स सर्वपापनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

**Colophon :**

इति कुन्दारण्यमाहात्म्ये षष्ठोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2390. कुरुङ्गक्षेत्रमाहात्म्यम्.

## KURUṄGAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 86. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Adhyāyas 1 to 6, complete.

A portion of the Brahmāṇḍa-Purāṇa, treating of the greatness of Tirukkuruṅguḍi and of the Viṣṇu shrine therein; this place is a village in the Tinnevelly district of the Madras presidency.

**Beginning:**

तदिदं जगदुत्पत्तिस्थितिसंहारकारणम् ।
शासनं शाश्वतं विष्णोश्श्रीकुरुङ्गनिवासिनः ॥

श्रीवैशम्पायन उवाच—

अशेषमिदमाख्यातं त्वया वेदविदां वर ।
विष्णोर्माहात्म्यपादांशञ्जगच्चिदचिदात्मकम् ॥

तत्क्षेत्राणान्तु माहात्म्यं श्रोतव्यं भवतो मया ।
सार्वो(सर्व)न्तावाद्विशेषेण वक्तुमर्हसि मानद ॥

श्रीवेदव्यासः—

विष्णोः क्षेत्राण्यनन्तानि श्रुतानि हि जगत्पतेः ।
संख्यातुं नैव शक्तोऽस्मि यथाज्ञातं मया श्रृणु ॥

पुरा देवास्समेता वै सेन्द्रास्सर्षिपुरोगमाः ।
आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ॥

पितरो लोकपालाश्च मेरुश्रृङ्गसमाश्रिताः ।
देवकार्यं विचिन्वन्तो दैत्यदानवपीडिताः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्मिन्नवसरे योगी नारदस्समुपागतः ।
वाणीं सङ्गृह्य बाहुभ्यां विष्णोस्तोत्रपरा यणः ॥

**End:**

कुरुङ्गक्षेत्रमाहात्म्यं सर्वपापप्रणाशनम् ॥
यः पठेच्छृणुयान्नित्यं श्रावयेच्छुद्धमानसः ।
स सर्वकिल्बिषैर्मुक्तो पूर्णकामसमृद्धिमान् ॥
विमुक्तो योगयुक्तस्सन् साक्षात्कृत्य सनातनम् ।
यत्सूरिसेव्यं परमं वैष्णवं पदमाप्नुयात् ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे गङ्गानारदसंवादे श्रीकुरुङ्गक्षेत्रमाहात्म्ये षष्ठोऽध्यायः ।

Here the name of the copyist is given to be Vānamāmalai-dāsan of Tirukkuruṅguḍi.

---

## No. 2391. कृष्णापुष्करमाहात्म्यम्.

## KṚṢṆĀPUṢKARAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 56. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 9.

This is a portion of the Skānda - Purāṇa and treats of the sancti-ty and purifying greatness of the Kṛṣṇā river on the occasion of the Puṣkara, which takes place once in 12 years, when the planet Jupiter is in the Kanyā sign of the zodiac.

**Beginning:**

आरङ्गेदृष्टं नैमिशारण्येसत्रं द्वादशवार्षिकम् ।
आजग्मुरखिलास्सर्वे मुनयो ब्रह्मवादिनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वालखिल्यादिऋषयो ये च मासोपवासिनः ।
पक्षोपवासिनः केचिदन्ये वै वायुभोजनाः ॥
जलशय्यास्तथैवान्ये पङ्कलग्नास्तथापरे ।
एकपादेन तिष्ठन्त आदित्याभिमुखं स्थिताः ॥
निरुच्छ्वासास्तथैवान्ये तथा चोर्ध्वमुखाः स्थिताः ।

* * * *

दण्डोलूखलिनः केचित्प्रातस्सायाग्निपूजकाः ।
एत चान्ये च बहवः मुनयस्ते तपोधनाः ॥
आगत्य नैमिशारण्यमशेषगुणसंयुतम् ।
कर्तुमारेभिरे सत्रमथ सूतस्समाययौ ॥
तमागतं महात्मानं जटावल्कलधारिणम् ।
अभिवाद्य महात्मानो महाभक्तिसमन्विताः ॥
चित्राः श्रोतुं कथास्तत्र परिवव्रुः समन्विताः ।

ऋषयः—

कन्यागते सुराचार्ये कृष्णामाहात्म्यमञ्जसा ।
श्रोतुमिच्छामहे सूत वक्तुमर्हसि तत्त्वतः ॥

सूतः—

कन्यागते सुराचार्ये त्रैलोक्ये यानि सन्ति च ।
तानि सर्वाणि तीर्थानि कृष्णायां प्रविशन्ति हि ॥
तिस्रः कोट्यर्धकोटि(ट्य)श्च तीर्थानि भुवनत्रये ।
आयान्ति कृष्णवेण्णायां कन्यायुक्ते बृहस्पतौ ॥
कृष्णायां प्रविशन्त्येव सर्वतीर्थानि पुष्करः ।

**End:**

अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मातृवंशे मृतायाश्च(नाश्च) गतिर्यासां न विद्यते ।
तासामुद्धरणार्थाय इमं पिण्डं ददाम्यहन् ॥
अग्निदग्धाश्च ये केचित् नाग्निदग्धास्तथापरे ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
आत्मोपघातिनो ये च परेषां ये च घातुकाः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
अरण्ये च रणे ये च ये हताः क्षुधया तृषा ।
भूतप्रेतपिशाचैश्च तेभ्यः पिण्डं ददाम्यहम् ॥

**Colophon:**

इति स्कन्दपुराणे कृष्णापुष्क(र)माहात्म्ये नवमोऽध्यायः ॥

१. कृष्णास्नानमहिमानुवर्णनम्.
२. कन्यापुष्करमाहात्म्यवर्णनम्.
३. कन्यापुष्करयोगे धर्ममार्गप्रशंसनम्.
४. कन्यापुष्करयोगे प्रथमदिवसे सालग्रामदानमहिमानुवर्णनम्.
५. कन्यापुष्करयोगे द्वितीयदिवसे भूदानप्रशंसनम्.
६. कन्यापुष्करपुराणश्रवणमहिमानुवर्णनम्.
७. कन्यादानप्रशंसनम्.
८. कन्यापुष्करयोगे पञ्चमदिवसे गोदानप्रशंसनम्.

---

## No. 2392. केरलमाहात्म्यम्.

## KĒRALAMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 8⅝ × 1⅝ inches. Pages, 226. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Dvādaśamañjarikāvivaraṇa 114*a*, Kēralacaritra (Malayalam language) 162*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 55, complete ; 56th incomplete.

This describes how Paraśurāma, after making a gift of the country he conquered, created anew the Kērala (Malabar) country, how he consecrated the various holy waters and places therein, and how he organised the various castes there and framed 64 special rules for their guidance.

**Beginning :**

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ।
विश्वामित्रो मृकण्डुश्चागस्त्यो नारदस्तथा ॥
तृणबिन्दुश्शतानन्दो गौतमश्च तपोधनः ।
अत्रिश्च ऋश्यशृङ्गश्च दुर्वासस्तप्ततेजसः ॥
पराशरस्य शिष्याश्च वेदव्यासो महामुनिः ।
एते च मुनयस्सर्वे आगतास्तत्र भारत ॥
तान् दृष्ट्वा भार्गवो रामः प्रत्युत्थाय कृताञ्जलिः ।
साष्टाङ्गं संप्रणम्याथाभिवादनपूर्वकम् ॥
अर्घ्यपाद्यं समादाय पृथगासनमेव च ।
गन्धपुष्पाक्षतैस्सम्यक् पूजयामास भार्गवः ॥

**End :**

उदयोद्भवाय भूपाय सामन्ताय महात्मने ।
दत्वा राज्यञ्च भूमिञ्च प्रययौ भार्गवस्तथा ॥
पश्चादागत्य रामश्च सुब्रह्मण्यालये शुभे ।
अष्टयोजनभूमिन्तां द्विधाकृत्याथ भार्गवः ॥
एकभागं कुमाराय एकभागं शिवाय च ।
द्विभागभूमिरक्षार्थं ददौ च भृगुनन्दनः ॥

**Colophon :**

इति श्रीभूगोलपुराणे केरलमाहात्म्ये पञ्चपञ्चाशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं सङ्कल्पयामास उदयोद्भवभूमिपम् ।
अब्रवीद्वचनं रामः धर्मार्थसहितं प्रभो ॥
यावद्धर्मस्थितिर्लोके यावत्सत्यस्थितिः प्रभो ।
द्विजधर्मस्थितिर्यावत् तावद्राज्य(ज)त्वमस्तु ते ॥

* * * *

चतुष्षष्टितमान् ग्रामान् ब्राह्मणान् योगपुङ्गवम् ।
पूजयामास रामश्च तस्थौ च भृगुनन्दनः ॥
अखिलां केरलीभूमिं ब्राह्मणेभ्यो ददौ प्रभुः ।
चतुष्षष्टितमेभ्योऽस्तु मद्भूमिम(र)खिलाश्च(ला च) ते ॥
युष्माकञ्च यदात्थाथ भविष्यति तदा तदा ।

---

## No. 2393. केरलमाहात्म्यम्.

## KĒRALAMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 198. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 103, complete ; 104th, incomplete. In the middle 49 to 51 and 53 to 62 leaves are lost.

This is a different version of the Kēraḷamāhātmya, and is said to have been related by Garga to Yudhiṣṭhira. The first five Adhyayas make the Māhātmya a part of the Brahmāṇḍa-Purāṇa. The birth and education of Paraśurāma is given in detail in the beginning.

**Beginning :**

कृतादौ सूर्यवंशे च जातः कश्चिन्महीपतिः ।
नर्मदायास्तटे सोऽपि कृतवीर्याभिधः पुरा ॥
अवन्त्याद्यष्टदेशेषु राजाभूद्दक्षिणे पथि ।
तस्य पत्नी कुमारी च पातिव्रत्यमहोत्सवा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रहीनौ च तौ तत्र दुःखितौ समबोधितौ ।
सतां बुद्धिमतां श्रेष्ठो नारायणमहर्निशम् ॥

ध्यात्वास्ते पञ्चवह्न्यादौ परमात्मानमच्युतम् ।
तपस्तेपेऽपि भूपोऽपि सत्यसन्धो जितेन्द्रियः ॥

* * * *

इति श्रीकेरलमाहात्म्ये ब्रह्माण्डपुराणे अगस्त्यसंहितायां परमरहस्ये गर्गयुधिष्ठिरसंवादे क्षेत्रवर्णनन्ना(नं ना)म प्रथमोऽध्यायः ॥

धर्मराट् वीक्ष्य साष्टाङ्गं प्रणम्य प्रददौ करम् ।
Substance, palm-leaf. Size, 17⅛ × 1⅝ inches. Pages, 116. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

**Breaks off in the 16th Adhyāya.**

---

## No. 2438. तुलाकावेरीमाहात्म्यम्.
## TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 17¾ × 1⅜ inches. Pages, 206. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete in 28 Adhyāyas.

Same work as the above.

The MS. is dated: Friday, the 8th of Aippaśi in the year Dundubhi. The scribe's name is given as Marutalam Vēṅkaṭasubbayyan.

---

## No. 2439. तुलाकावेरीमाहात्म्यम्.
## TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 16⅝ × 1⅝ inches. Pages, 76. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Brahmasūtra 39*a*. Adhyāyas 4 to 13, complete; 14th, incomplete.

Same work as the above.

---

## No. 2440. तुलाकावेरीमाहात्म्यम्.
## TULĀKĀVĒRĪMĀHĀTMYAM.

Substance, paper. Size, 13¼ × 8⅝ inches. Pages, 249. Lines, 22 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyāyas 1 to 45, complete.

A portion of the Brahmavaivarta-Purāṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

ब्रह्मकैवर्तम्—तुलाकावेरीमाहात्म्यम्.

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

देववर्मा—

नानाविधांस्तथा देशान्नानाजातिसमन्वितान् ।
नानाधर्मसमायुक्तान् नानाचारसमन्वितान् ॥

मुनेऽहं भवता प्रोक्तानाश्रमान् सुबहूनिह ।
देशे देशे विचित्राणां तीर्थानां सरितामपि ॥

* * * *

श्रवणाभ्यां यथाकामं शुश्रूषा जायते पुनः ।
सह्यभूधरसम्भूता कावेरीति महानदी ॥

सद्यः पापहरा नृणामभीष्टफलदायिनी ।
तुलामासे विशेषेण मोक्षदात्री निमज्जताम् ॥

* * * *

साध्वी सर्वहिते रता निजगुणैस्सर्वप्रिया सज्जनैः
सद्भिस्साधुभिरीडिता शिवकथास्तोत्रेषु बद्धादरा ।
नाथप्रीतिविवर्धिनी कुचनता पूर्णेन्दुतुल्यानना
कालक्षेपमतिप्रसन्नहृदा(दया) चक्रेऽनवद्याप्युमे ॥

इति ब्रह्मकैवर्ते तुलाकावे(री)माहात्म्ये प्रथमोऽध्यायः ॥

**End :**

इत्थं श्रुत्वा धर्मजालं वर्षे वर्षे कृतादरौ ।
तुलास्नानरतो भूत्वा नीत्वा पापानि (च)क्षयम् ॥

त्यक्त्वा यामीया(यो)तनाश्च जग्मतुर्लोकमुत्तमम् ।
तस्मात्त्वया मया चापि मायूरे मुक्तिदे स्थले ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुलामासे च संप्राप्ते कावेर्यामुदये रवेः ।

* * * *

ये शृण्वन्ति ममाध्यायं ये शृण्वन्ति समाहिताः ।
ते तु मुक्तिं प्रयान्ति स्म भुक्त्वा भोगान्न संशयः ॥

**Colophon:**

इति ब्रह्मकैवर्ते महापुराणे तुलाकावेरीमाहात्म्ये पञ्चचत्वारिंशोऽध्यायः ॥

---

No. **2441.** तोताद्रिमाहात्म्यम्.

TŌTĀDRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 12⅓ × 1⅜ inches. Pages, 120. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 10 Adhyāyas.

This is a portion of the Brahmāṇḍa-Purāṇa and treats of the holiness of the shrine at Tōtādri, *i.e.*, Vānamāmalai, a village in the Tinnevelly district of the Madras Presidency. This Māhātmya is said to have been taught by Kṛṣṇa to Arjuna.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥
विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काश्यपोऽत्रिभरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सूतं पप्रच्छुरादरात् ॥
मुने कथय पुण्यानां क्षेत्राणामुत्तमं पुनः ।

सूतः—

वेदव्यासं मुनिश्रेष्ठं प्रणिपत्य शुकः पुरा ॥
माहात्म्यं तोतशैलस्य कथयस्व यथातथम् ।

श्रीवेदव्यास उवाच—

कृष्णद्वैपायनो व्यासः शुकाय निजसूनवे ॥
श्रीमत्तोताद्रिमाहात्म्यं कथयामास तत्त्वतः ।
प्रस्थितस्तीर्थयात्रार्थं पाण्डुपुत्रोऽर्जुनः पुरा ॥
प्रसादसुमुखं कृष्णं प्रणिपत्येदमब्रवीत् ।
भगवन् पुण्डरीकाक्ष शरणागतवत्सल ॥
ब्रूहि क्षेत्राणि पुण्यानि तीर्थयात्रोद्यतस्य मे ।

श्रीकृष्ण उवाच—

अहोबिलं वेङ्कटाद्रिं सिंहाद्रिं करिभूधरम् ॥
घटिकाद्रिश्च तोताद्रिं वक्षारण्यं सुपावनम् ।
श्रीमुष्णं कुम्भघोणञ्च श्रीरङ्गक्षेत्रमुत्तमम् ॥

* * * *

अर्जुन उवाच—

इमानि श्रुतपूर्वाणि क्षेत्राणि धरणीतले ।
श्रीमत्तोतगिरेः पुण्यमाहात्म्यं वद मेऽधुना ॥

श्रीकृष्ण उवाच—

श्रीमत्तोताद्रिमाहात्म्यं कथयामि तवाद्भुतम् ।
श्रोतॄणां सर्वफलदं समाहितमनाश्शृणु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

रुद्र उवाच—

इति तोताद्रिमाहात्म्यं गुह्यानां गुह्यमुत्तमम् ।
श्रुत्वा पराशरमुखात्पुण्डरीको महामुनिः ॥
स्वयंव्यक्तस्थलानान्तमष्टानामुत्तमं हरेः ।
तोताद्रिमञ्जसा सद्यश्चतुस्तीर्थ्या समाप्लुतः ॥
तत्र तांश्चतुरो देवान् सेवमानो निरन्तरम् ।
उवास सुचिरं कालं कृतार्थेनान्तरात्मना ॥
य इदं तोतशैलस्य माहात्म्यं गुह्यमुत्तमम् ।
संकीर्तयेद्वा लिख्येद्वा श्रावयेच्छृणुयादपि ॥
सर्वकामप्रदा लक्ष्मीः स्थिरा भवति तद्गृहे ।

**Colophon:**

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे पराशरपुण्डरीकसंवादे श्रीमत्तोताद्रिमाहात्म्यं नाम दशमोऽध्यायः ॥

विलम्ब्यभिधवत्सरे मधुजघन्यमासे शुभे
बलक्षगरुति क्षमावरपुरे हरेर्वासरे ।
. . . कुलवत्सगोत्रजरमानिवासेन सः
समाप्तिमगमन्महान् लिखिततोतभूभृद्गगः ॥

---

## No. 2442. तोताद्रिमाहात्म्यम्.

## TŌTĀDRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 124. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2443.** देवाङ्गदचरित्रम्.
DĒVĀṄGADACARITRAM.

Pages, 74. Lines, 22 on a page.

Begins on fol. 350*a* of MS. described under No. 118.

Adhyāyas 6 to 19, complete.

A portion of the Brahmāṇḍa - Purāṇa; treats of the history of Dēvāṅgada and his descendants.

**Beginning :**

समस्तविघ्नविच्छेदकारणं वारणाननम् ।
भजेत्सज्जनसन्तापवारणं तोरणध्वजम् ॥
वाणीं वीणाकरां वन्दे वन्दारुजनवत्सलाम् ।
शुम्भन्मन्मथकुम्भीशकुम्भदम्भहरस्तनाम् ॥
नैमिशीया महात्मानो मुनयश्शंसि(स्संशि)तव्रताः ।
शौनकाद्याः पाणिपुटैः स्तूयमानाः कृपानिधिम् ॥
पुरतः प्रश्रितं पीठे निषण्णं योगिनां वरम् ।
पौराणिकोत्तमं सूतं पप्रच्छुः कुशलात्मनः ॥

ऋषयः—

सूत सूत महाभाग सर्वशास्त्रार्थकोविद ।
सर्वतत्त्वविधानज्ञ प्रज्ञाविज्ञानसागर ॥

* * * *

कारणेन इव प्रीतिं कृत्वा व्यासो महामुनिः ।
पुराणं पञ्चमं वेदं प्रसादादुक्तवान्मुनिः ॥
श्रोतुमिच्छामि तत्सर्वं युष्मद्वदनपङ्कजात् ।
पृच्छासु विचिकित्सा च सम्यगुक्ता(त्सा)रित(।)त्वया ॥
विचित्राश्च कथाः पुण्याः त्वयावक्तव्य(यथावद्वक्तु)मर्हसि ।

**End :**

पाञ्चालं टङ्कणश्चैव विचरन् हास्यकोविदः ।
राजपुत्रान् तोषयित्वा संपाद्य बहुलन्धनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गजानाश्वंच(नश्वांश्च) शिबिका[न्] रत्नहारान् मनोहरान् ।
ग्रामान् पशूंश्च संतुष्टो वितीर्य बहुलं धनम् ॥
शिष्येभ्यो दासदासीनां शतैर्युक्तं स्वमन्दिरम् ।
शोभयन् भूषितैः पुत्रैः पौत्रैर्युक्तस्सदार्चयन् ॥
शङ्करं शाश्वतं शान्तं चिन्तायोगाच्छिवाज्ञया ।
कैलासनगरे शम्भुसमीपं प्राविशन्मुदा ॥

**Colophon:**

इति ब्रह्माण्डपुराणे उत्तरभागे देवाङ्गदचरित्रे देवसाल्वावतारकथनं नाम एकोनविंशोऽध्यायः ॥

---

## No. 2444. देवीमाहात्म्यम्.
## DĒVĪMĀHĀTMYAM.

Substance, paper. Size, 9¾ × 7½ inches. Pages, 110. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 71*a*. The other works herein are: Bagalākalpa 1*a*, Lalitāsahasranāmastōtra 126*b*, Śrīcakrapūjāvidhāna 151*a*.

Complete.

This is a portion of the Mārkaṇḍēya Purāṇa, and treats of the greatness of Dēvī or Kālī, principally describing the destruction of the eight Asuras by Dēvī in her incarnations as Kālī, Lakṣmī and Sarasvatī. The Māhātmya proper consists of 13 Adhyāyas, and is generally followed by five Adhyāyas, three of which contain Argala, Kīlaka and Kavaca, and two contain Rahasyatraya and Sūktatraya. The work is also called Saptaśatī as it is made up of about 700 stanzas But the MS. under notice has the three Adhyāyas containing Argala, &c., in the beginning, and counts three Adhyāyas in Rahasyatraya alone; it omits altogether the Sūktatraya, but adds five more Adhyāyas on rules relating to the conduct of the worship of Dēvī. The subject-matter of the chapters as found in the colophon is as follows—

१. दुर्गार्गळम्.
२. लक्ष्मीकीलकम्.
३. सरस्वतीकवचम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१. मधुकैटभवधः.
२. महिषासुरसैन्यवधः.
३. महिषासुरवधः.
४. महिषासुरवधप्रयुक्तदेवतास्तोत्रम्.
५. देवीदूतसंवादः.
६. धूम्रलोचनवधः.
७. चण्डमुण्डवधः.
८. रक्तबीजवधः.
९. निसुम्भवधः.
१०. सुम्भवधः.
११. देवतास्तुतिः.
१२. भगवतीवाक्यम्.
१३. सुरवैश्ययोर्वरप्रदानम्.
१४. (प्रधान)रहस्यम्.
१५. (वैकृति)रहस्यम्.
१६. (मूर्ति)रहस्यम्.
१७. (मन्त्र)रहस्यम्.
१८. बीजोद्धारविधिः.
१९. पूजाप्रकरणम्.
२०. महालक्ष्मीपूजाविधानम्.
२१. मन्त्ररहस्यम्.

**Beginning :**

अस्य श्रीदेवीमाहात्म्यचण्डिकासौभाग्यसप्तशतीस्तोत्रमन्त्रस्य मार्कण्डेयब्रह्मविष्णुमहेश्वरा ऋषयः, गायत्र्यादिनानाछन्दांसि, महाकालीमहालक्ष्मीसरस्वत्यः प्रधानदेवताः.

* * * *

अर्गलं कीलकं चादौ पठित्वा कवचं न्यसेत् ।
जपेत्सप्तशतीं पश्चात् सर्वसिद्धिर्भविष्यति ॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा ।
कवचं रक्षाते प्रायश्चण्डिकात्रितयं यजेत् ॥

* * * *

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ।
लभते परमं रूपं शिवेन समतां व्रजेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीहरिहरविरचितं चण्डिकाकवचं संपूर्णम् — तृतीयोऽध्यायः ॥

*　*　*　*

अस्य श्रीप्रथमचरितस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीभद्रकाली देवता, नन्दा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्त्वं, यजुर्वेदस्वरूपं, महाकालीप्रीत्यर्थे जपे विनियोगः, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः.

*　*　*　*

सावर्णिस्सूर्यतनयो यो मनुः कथ्यते बुधैः ।
निशामय तउ(दु)त्पत्तिं विस्तराद्गदतो मम ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥
स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरतो(थो) नाम राजाभूत् समस्ते क्षितिमण्डले ॥

*　*　*　*

सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ।
सा विद्या परमा मुक्तेः हेतुभूता सनातनी ॥
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ।

राजोवाच—

भगवन् का हि सा देवी महामायेति यां भवान् ।
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ।
यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ।

ऋषिरुवाच—

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ।
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥

**End:**

मार्कण्डेय उवाच—

इति दत्वा तयोर्देवी यादाभिह्व(यथाभिल)षितं प(व)रम् ।
बभूवान्तर्हिता सदो(द्यो) भक्त्या ताभ्यामभिष्टुता ॥
एवं देव्या वरं लब्ध्वा सुरथ(:)क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

**Colophon:**

इति मार्कण्डेये सावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये सुरथवैश्ययोर्वरप्रधा(दा)नन्ना(नं ना)म त्रयोदशोऽध्यायः ॥

राजोवाच—

भगवन्नवतारा णां(मे) चण्डिकायास्त्वयोदिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥

**End:**

इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ।
जगन्मातुश्चण्डिकायाः कीर्तिता(:)कामधेनवः ॥
इदं रहस्यं परमं न वाच्यं कस्य चित्त्वया ।
आख्यातं दिव्यमूर्तीनामधिष्ठानानि ते स्वयम् ॥

**Colophon:**

इति मार्कण्डेये सावर्णिके मन्वन्तरे देवीमाहात्म्ये मूर्तिरहस्यं नाम षोडशोऽध्यायः ॥

देवीमाहात्म्यं संपूर्णम् ॥

जय चन्द्रकभूषाढ्ये जय चन्द्रकलाधरे ।
जय पूर्णचन्द्रवदने जय वाञ्छाफलप्रदे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

पात्रं नास्त्रीषु संपूज्य ध्यायेद्देवीं ततो बुधः ।
एवं रूपं हृदि ध्यात्वा पिण्डी स्वपदनंकला ॥
नीकेलोत्माह्यनंसस्य (?)

**Colophon:**

इति श्रीमार्कण्डेयपुराणे सूर्यसावर्णिकमन्वन्तरे देवीमाहात्म्ये मन्त्ररहस्यं नाम एकविंशोऽध्यायः ॥

---

## No. 2445. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 8¼ × 1½ inches. Pages, 126. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 13 + 2 + 3 Adhyāyas. This copy contains the Pūrvāṅga to the Purāṇa.

Same work as the above.

---

## No. 2446. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 10¾ × 1⅝ inches. Pages, 50. Lines, 10 on a page. Character, Nandināgari. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tricākalpa 26*a*. Ślōkas 10 to 587 containing the 13 Adhyāyas.

---

## No. 2447. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, paper. Size, 10⅜ × 8⅝ inches. Pages, 103. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Begins on fol. 96*b*. The other works herein are Sāṅkhyāyanatantra 1*a*, Lalitāsahasranāmastōtra 64*a*, Śrīca krapūjāvidhāna 81*a*.

Complete in 3 + 13 + 3 Adhyāyas.

Same work as the above.

---

## No. 2448. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, paper. Size, $8\frac{1}{2} \times 5\frac{3}{8}$ inches. Pages, 164. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 3 + 13 + 3 ; and again another copy of the work containing Adhyāyas 3 + 2 of the Māhātmya proper.

Same work as the above.

---

## No. 2449. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $8\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 128. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śivakavaca 65*a*.

First leaf is lost.

Adhyāyas 1 to 13 of the Māhātmya proper; the Adhyāya on the Rahasyatraya breaks off with the 15th stanza.

---

## No. 2450. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $7\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 27. Lines, 7 on a page. Character, Malayāla. Condition, fair. Appearance, old.

Adhyāyas 9 to 12 of the Māhātmya proper.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2451. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 9¾ × 2⅝ inches. Pages, 36. Lines, 10 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

Adhyāyas 1 to 4, complete ; 5th incomplete, of the Māhātmya proper.

---

## No. 2452. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 7⅝ × 1⅞ inches. Pages, 127. Lines, 13 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 3 + 13 + 3 + 8 Adhyāyas, the last eight treating of Dēvīpūjā.

Begins on fol. 41*a*. The other works herein are : Kulārṇava 1*a*, Ṛgvēdarcaḥ 105*a*, Brahmaṇōgnisaṁvidhānasūktamantra 106*a*, Praṇavakalpa 109*a*, Lalitāsahasranāmāvali 144*a*.

After the 24th Adhyāya, Pūjāvidhāna is added.

---

## No. 2453. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, 7 × 1¼ inches. Pages, 245. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Adhyāyas 1 to 13 of the Māhātmya proper with Navāṅga.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2454. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 68. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 2*a*. The other work herein is Dēvīmānasikapūjā 1*a*.

Adhyāyas 3 + 13 + 3 with Navāṅga.

Same work as the above.

---

## No. 2455. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Pages, 74. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2409.

Adhyāyas 3 + 13 + 1 with Pūrvāṅga.

Complete.

Same work as the above.

Three leaves before the last leaf are lost; and hence Adhyāyas 15, 16, 17 and a portion of 18 are wanting.

---

## No. 2456. देवीमाहात्म्यपूर्वाङ्गः.

## DĒVĪMĀHĀTMYAPŪRVĀṄGAH.

Substance, palm-leaf. Size, $10\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 16. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kārtavīryārjunakavaca 9*a*, Tripurasundarīṣōḍaśīmantra 18*a*, Navākṣarīmantra 19*a*.

Incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2457. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Pages, 113. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 537.

Complete.

Adhyāyas 1 to 3 + 1 to 13 + 3 + 6 from the Mārkaṇḍēya-Purāṇa.

The MS. is dated: Thursday, the 5th of Āṣāḍha-Śuddha in the year Bhava. The scribe's name is given as Pāpayyaliṅga, son of Mājēṭi Sarvēśaliṅga.

---

## No. 2458. देवीमाहात्म्यम्.

## DĒVĪMĀHĀTMYAM.

Pages, 80. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 235.

Adhyāyas 1 to 3 + 1 to 13 + 3 + 5.

Same work as the above.

---

## No. 2459. देवीमाहात्म्यनवाङ्गः.

## DĒVĪMĀHĀTMYANAVĀṄGAḤ.

Substance, palm-leaf. Size, $8\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 28. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Svarṇākarṣaṇa bhairavamantra 14*b*.

Complete.

This describes the 9 items of worship to be gone through before commencing a religious reading of the Dēvī-Māhātmya; they are ध्यान. आवाहन, नाम, अर्गल, कीलक, कवच, दल, हृदय, and न्यास.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

अस्य श्रीदेवीमाहात्म्यस्य त्रयोदशाध्यायोक्तानं(नां) देवतानां मध्ये महिषासुरमर्दिनी प्र(धान)देवता, धूम्रलोचनचण्डमुण्डरक्तबीजसुम्भनिसुम्भ-मर्दिनी प्रत्यधिदेवता.

* * * *

ब्रह्माणी वदनेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघर्घरमुखी ऐन्द्री च वज्रायुधा
चामुण्डा सगणेशरुद्रसहिता रक्षन्तु मां मातरः ॥

**End :**

इदन्तु कवचं पुण्यं देवानामपि दुर्लभम् ॥
यो नरः पठते नित्यं त्रिसन्धि(न्ध्यं) श्रद्धयान्वितः ।
देवी प्रीता भवेत्तस्य त्रैलोक्येष्वपराजितः ॥

* * * *

देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥
तत्फलं समया(वा)प्नोति यावदाभूतसंप्लवम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥

---

No. **2460.** देवीमाहात्म्यम्.

DĒVĪMÂHÂTMYAM.

Substance, palm-leaf (Śrītāla). Size, 6¾ × 1¼ inches. Pages, 225. Lines, 7 on a page. Character, Malayāla. Condition, injured. Appearance, old.

Contains Adhyāyas 28, and 75 to 81 in the Varāhapurāṇa; Adhyāyas 8, 9, 19 to 25 in the Skānda Purāṇa; and Adhyāyas 84 to 86 of the Mārkaṇḍēya Purāṇa - these last corresponding to Adhyāyas 13 to 15 of the Dēvīmāhātmya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The subject-matter of the chapters is as follows:—

Varāha: Adhyāya 28—**देव्युत्पत्तिः वेत्रासुरवधश्च**; 75—**रुद्रमहिमा त्रिमूर्तिनिर्णयश्च**; 76—**रुद्रमहिमा सृष्टिस्तवः**; 77—**महिषासुरवधः**; 78 to 81—**रुद्रमहिमा**. Skānda: Adhyāya 8, 9, 19 to 21—**कात्यायनीसम्भवः** (Adhyāya 21 is incomplete); 22, 23—**निसुम्भवधः** (22 wants beginning); 24, 25—**कौशिक्यभिषेकः** ||

**Beginning:**

वराहपुराणस्थं देवीमाहात्म्यम्—

प्रजापालः—

कथं माया समुत्पन्ना दुर्गा कात्यायनी शुभा ।
आदिक्षेत्रे स्थिता सूक्ष्मा पृथक् मूर्त्या व्यजायत ॥

*　　*　　*　　*

पुनर्ब्रह्मान्वये जातस्सिन्धुद्वीपेति संज्ञितः ।
स तेपे परमं तीव्रं शक्रवैरमनुस्मरन् ॥

ततः कालेन महता नदी वेत्रवती शुभा ।
मानुषं रूपमास्थाय सालङ्कारं मनोहरम् ॥

आजगाम यतो राजा तेपे परमकं तपः ।
तां दृष्ट्वा रूपसंपन्नां राजान्त(:) क्षुब्धमानसः ॥

उवाच कासि सुश्रोणि तत्त्वं कथय भामिनि ।

नदी—

अहं जलपतेः पत्नी वरुणस्य महात्मनः ॥
नाम्ना वेत्रवती पुण्या त्वामिच्छन्ती समागता ।

*　　*　　*　　*

एवमुक्तस्तया राजा साभिलाषोपयुक्तवान् ॥
तस्यास्सद्योऽभवत्पुत्रो द्वादशार्कसमद्युतिः ।
वेत्रवत्युदरे जातो नाम्ना वेत्रासुरोऽभवत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

यावत्यस्ता महाशक्तयस्तावद्रूपाणि शङ्करः ।
कृतवांस्तांश्च भजते पतिरूपेण सर्वदा ॥
यश्चार(ा)धयते तास्तु तस्य रुद्रे तु तोषिते ।
सिध्यते (न्त्ये)तास्सदा देव्यो मन्त्रिणो नात्र संशयः ॥

**Colophon:**

इति श्रीवराहपुराणे रुद्रमाहात्म्ये एकाशीति[शत]तमोऽध्यायः ॥

स्कान्दपुराणस्थं देवीमाहात्म्यम्—

सनत्कुमारः—

या कण्ठनालकबलीकृतकालकूट-
च्छायेव विष्फुरति वक्षसि चन्द्रमौलेः ।
सा मे समस्तदुरितानि कटाक्षमाला
तुहि(दूरी)करोतु तुहिनाचलकन्यका या ॥

* * * *

बिभ्रती शिरसा देवी स्फुरितेन्दुसमत्विषा ।
उत्पन्नमात्रा गायत्री पुरा इव तपस्विभिः ॥
पार्वत्याः पार्श्वमागम्य तस्थौ प्रह्वाञ्जलिर्नता ।
तां करेणाथ संमृज्य देव्युत्पलसमत्विषा ॥
तन्वीं मधुरया वाचा प्रोवाच गिरिजाङ्गजाम् ।
ममाङ्गकोशात् संभूता कौशिकीति परिश्रुता ॥
भविष्यसि महाभागे कन्या कात्यायनीति च ।
आभ्यामेव परं द्वाभ्यां नामभ्यां ख्यातिमेष्याति(सि) ॥

**End:**

सा तु पिञ्छध्वजा देवी भूतैर्नानारसै(र)पि ।
अभिषेकमिमं प्राप्य विन्ध्ये निवसतेऽव्यया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वस्रा (सुः)सुरेन्द्रश्शुभया(स्य शुभा)सुरघ्न्या-
श्शृण्वन्ति तस्याः पुरतोऽभिषेकम् ।
ते पुत्रपौत्राभिह(दियु)ता धनाढ्याः
सुखानि विन्दन्ति परत्र हेतोः ॥

**Colophon :**

इति श्रीमत्स्कान्दपुराणे कौशिक्य[ा] भिषेको नाम पञ्चविंशोऽध्यायः ॥

---

No. **2461.** पञ्चक्रोशमाहात्म्यम्.

PAÑCAKRŌŚAMĀHĀTMYAM.

Substance, paper. Size, 9½ × 4⅛ inches. Pages, 39. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete in 5 Adhyāyas.

This is a portion of the Brahmavaivarta-Purāṇa and treats of the holiness of Kāśī and the surrounding regions within a radius of 5 Krōśas. It is said to have been taught by Kapila to the Siddhas as it had been formerly related by Mahādēva to Pārvati. Appears to be different from the work described on page 28 of Aufrecht's Bodleian Library Catalogue.

**Beginning :**

श्रीकपिल उवाच—

एवं सिद्धाः काशिकायां वसेद्यः
सर्वैर्धर्मैस्संयुतस्सोऽतिवन्द्यम् ।
तस्माद्धर्मास्सततं सिद्धिभूमौ
संसेव्याः स्युः पापकं नाल्पमत्र ॥
ये ये धर्मा मानवैस्संप्रयुक्ताः
काश्यान्ते तान्मोक्षसिद्धिन्नयन्ति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मात्सिद्धिः साधयेदात्मकार्यं
सद्भिश्शास्त्रैः श्रद्धया त्यागयोगैः ॥

काश्यां कृतानां पापानां पुण्यानां वा समृद्धयः ।
भवन्ति सततं नूनं सुक्षेत्रे ह्युप्तबीजवत् ॥

सिद्धा ऊचुः—

देवदेवारविन्दाक्ष साङ्ख्ययोगप्रवर्तक ।
कथं मुच्येत मनुजः काश्यामेव कृतैरघैः ॥
मोक्षं प्राप्नोति च कथं कथं वा जीवने सुखम् ।
आनन्दकानने ह्यस्मिन् कथमानन्दभाग्भवेत् ॥

कपिल उवाच—

इदमेव पुरा पृष्टः पार्वत्या भगवान्भवः ।
पापनाशं धर्मवृद्धिरविलम्बेन मोचनम् ॥

पार्वत्युवाच—

दीनानाथैकशरण देवदेव दयानिधे ।

* * * *

पापं कृत्वा मृता ये च तेषां मुक्तिः कथं भवेत् ।
कृपया देव(वद)देवेश प्रायश्चित्तमशेषतः ॥

महादेव उवाच—

शृणु पार्वति वक्ष्यामि यद्गोप्यं मम सर्वतः ।
पुण्यवद्भिः पापवद्भिः कर्तव्यं काशिवासिभिः ॥
न कोऽपि दृष्टो मनुजः विना पापं शरीरभाक् ।

**End :**

तथा साहसमालम्ब्य काशीमनुगतो भवेत् ॥
गुरुद्रोहपरो यस्तु विप्रद्रोहपरस्तथा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न तस्य काशी सिद्ध्येत बहुभिस्साधनैर्युता ॥
क्षेत्रसन्न्यासिनामेवं क्रमः प्रोक्तो मयानघे ।

प्रदक्षिणायास्तु महान् महापापहरः परः ॥

**Colophon:**

इति श्रीब्रह्मवैवर्ते महापुराणे तृतीयविभागे पञ्चक्रोशीमहिमावर्णनं नाम पञ्चमोऽध्यायः ॥

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ।
काशीसंस्कृतमुद्रायामङ्कितोऽयं शिलाक्षरैः ॥

---

## No. 2462. पञ्चक्रोशमहिमा काशीगीता.

### PAÑCAKRŌŚAMAHIMĀ *or* KĀŚĪGĪTĀ.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 29. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Prakaraṇas 1 to 5, complete. Same work as the above.

The MS. is dated: Saturday, the 3rd of Mārgaśira-śuddha in the year Tāraṇa.

---

## No. 2463. पञ्चनदक्षेत्रमाहात्म्यम्.

### PAÑCANADAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 246. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

This describes in 30 Adhyāyas the holiness of the Pañcanadakṣētra, known as Tiruvaiyār, which is a village in the Tanjore district of the Madras Presidency. Sumantu is made to relate it to king Dēvavarman.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

वन्दे महेश्वरं शम्भुं विघ्नेशं षण्मुखं गुरुम् ।
गणेशं नन्दिमुख्यांश्च शिवभक्तान् महामुनीन् ॥
सूतः—
देववर्माभिधो राजा सूर्यवंशसमुद्भवः ।
सुमन्तुं परिपप्रच्छ शिवभक्तं द्विजोत्तमम् ॥
(देवव)र्मा—
उक्तं समस्तं भवता सुमन्तो तीर्थमुत्तमम् ।
कावेर्या महिमा प्रोक्ता वृद्धाद्रीशस्य वैभवम् ॥
मायूरक्षेत्रमाहात्म्यं विस्तरेण त्वयोदितम् ।
इदानीं श्रोतुमिच्छामि श्रीमत्पञ्चनदस्य वै ॥
माहात्म्यं कथ्यतां विद्वन् कौतूहलपरस्य मे ।
श्रीसूतः—
देववर्मनृपेणैवं स सुमन्तुर्महामुनिः ॥
संपृष्टः प्रजगादैवं राजानं मुनिपुङ्गवाः ।
सुमन्तुः—
साधु पृष्टन्त्वया राजन् सर्वलोकसुखावहम् ॥
(त्व)मेव भूतले धन्यो यस्मात्पञ्चनदेशितुः ।
महिमश्रवणे सक्तः प्रयाति परमां गतिम् ॥
नैतत् स्थानं विजानन्ति भाग्यहीनः पुराभवे ।
श्रीमत्पञ्चनदस्थाने सदा सन्निहितश्शिवः ॥
यथा पृष्टन्त्वया राजन् तथा गौर्या महेश्वरः ।
पृष्टोऽवदत् स्थलस्यास्य श्रीमत्पञ्चनदस्य वै ॥
गौरी—
देवदेव महादेव ममेश प्राणवल्लभ ।
युष्मन्मुखाम्बुजाच्छ्रोतुमिच्छामि शु(सु)शुभाः कथाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वया प्रसङ्गात्कथितं जप्येशस्थानवैभवम् ।
विस्तरेण मम ब्रूहि श्रीमत्पञ्चनदेशितुः ॥

**End:**

पठितव्यं विशेषेण दातव्यञ्च विजानता ।
श्रुत्वा माहात्म्यमेतच्च दत्वा च श्रावकाय वै ॥
प्रणतार्तिहरे शम्भौ देहान्ते लयमाप्नुयात् ।
सन्देहो नात्र कर्तव्यः सत्यमेव मयोदितम् ॥

**Colophon:**

इति श्रीब्रह्मकैवर्ताख्ये महापुराणे तीर्थप्रशंसायां पञ्चनदमाहात्म्ये त्रिषष्टितमोऽध्यायः ॥

नाथशर्मा—

अनवद्ये पञ्चनदं महा . . . . . ।
सद्यो मुक्तिप्रदं पुण्यं श्रीमज्जप्येश्वरं शुभम् ॥

* * * *

श्रीसूतः—

मुनीश्वरा मया प्रोक्तमेवं वः पापनाशनम् ॥
श्रीमत्पञ्चनदस्थानमाहात्म्यं शम्भुकीर्तितम् ।
दुःस्वप्ननाशनन्धन्यं शृण्वतां पठतामपि ॥
अत्र प्रामाण्यकृन्मर्त्यः शिवलोकं समश्नुते ।
अत्राप्रमाणवादी तु नरकाण्यश्नुते ध्रुवम् ॥

---

No. **2464.** पट्टीशक्षेत्रमाहात्म्यम्.

PAṬṬĪŚAKṢETRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16⅝ × 1¼ inches. Pages, 323. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 44 Adhyāyas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This is a portion of the Skānda-Purāṇa and is to be found in the Kumārasaṁhitā in Tīrthayātrākhaṇḍa. It treats of the greatness and holiness of the Śaiva shrine at Paṭṭīśvara, a village four miles from Kumbaconum in the Tanjore district of the Madras Presidency.

The MS. is dated: Wednesday, the 8th of Mārgaśira-Bahula in the year Parābhava.

**Beginning :**

गजवक्त्रं महाबाहुं पाशाङ्कुशधरं सदा ।
नमामि गणनाथन्तं सर्वविद्याप्रदायकम् ॥
शुद्धस्फटिकसङ्काशामक्षमालाधरां शिवाम् ।
सर्वविद्याप्रदां नित्यं तां वन्दे श(ा)रदां शिवाम् ॥
तेजोराशिमहातेजो(जः)कलाधरकलाधरम् ।
शकलीकृतपापौघं भजामि सशिवं शिवम् ॥

ऋषयः—

सूत सूत महाभाग सर्वपापप्रभञ्जन ।
श्रुतानि धर्मशास्त्राणि चे(से)तिहासानि सर्वशः ॥
पुनस्तच्छ्रोतुमिच्छामो मुनयो ब्रह्मवादिनः ।
तीर्थानि सर्वरूपाणि सर्वपापहराणि च ॥
दैवासुराणि दिव्यानि आर्षाणि च शुभानि च ।
कथयस्व महाभाग तीर्थानामुत्तमोत्तमम् ॥
वैष्णवानि च दिव्यानि श्रुतं तव मुखाम्बुजात् ।
शैवानामपि क्षेत्राणां संवदस्व महामते ॥

सूतः—

शृणुध्वं मुनयस्सर्वे क्षेत्रमाहात्म्यमुत्तमम् ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केदारं बदरीश्चैव नारायणमतः परम् ।
महानारायणश्चैव सदा देवैश्च पूजितम् ॥

* * * *

अगस्ते(स्त्ये)शमिति ख्यातं रामेश्वरमतद्व(तः प)रम् ।
मार्कण्डेशमिति ख्यातं मृत्युबाधानिवारणम् ॥

पट्टीश्वरं महादेवं महापातकहारिणम् ।
हत्याकोटिविनाशञ्च सर्वकामफलप्रदम् ॥

यं नत्वा मुनयस्सर्वे महायोगसमन्विताः ।
ते यान्ति परमं स्थानं पुनरावृत्तिवर्जितम् ॥

काशीराजादयो भूपा महापातकदूषिताः ।
भद्राख्ये कुण्डिके स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥

**End :**

व्यासं वसिष्ठनप्तारं साक्षान्नारायणांशकम् ।
यद्ग्रन्थानि समालोक्य श्रुत्वा मोक्षमवाप्नुयुः ॥

सर्वान् मुनीश्वरान्विद्यात् प्रमथान् शम्भुरूपिणः ।
नमामि दोषनाशाय वर्णाक्षरपदक्रमात् ॥

**Colophon :**

इति श्रीस्कन्दपुराणे कुमारसंहितायां मन्त्रखण्डे शङ्करकुमारसंवादे पञ्चवीरेश्वरोपाख्याने पट्टीस(श)क्षेत्रकथनं नाम चतुश्चत्वारिंशोऽध्यायः ॥

The following is the subject-matter of the chapters in this work :

| | |
|---|---|
| १. दत्तात्रेयतीर्थसश्चरणम्. | ५, ६. |
| २. पट्टीशक्षेत्रमाहात्म्यम्. | ७. शिवरात्रिवर्णनम्. |
| ३. गौतमीमाहात्म्ये नानातीर्थकथने पट्टीशक्षेत्रकथनम्. | ८. शिवरात्रिमाहात्म्यम्. |
| | ९. |
| ४. पट्टीशक्षेत्रमाहात्म्यम्. | १०. वालिशतहत्यादिनाशनम्. |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११.
१२. तीर्थयात्राप्रसङ्गः.
१३.
१४. परशुरामचरित्रे, परशुरामस्थापितवीरेश्वरवायुरूपभार्गवतपःकृतहरिहर(रव)रलब्धम्.
१५. परशुरामोपाख्यानम्.
१६. परशुरामस्वर्गलोकगमनराक्षसवधः.
१७. परशुरामदेवलोकगमनराक्षसविजयशतानीकवधः.
१८. कार्तवीर्यजमदग्निधेनुहरणम्.
१९. परशुरामसङ्गरम्.
२०. परशुरामसङ्गरम्.
२१. परशुरामसङ्गरम्.
२२. परशुरामकार्तवीर्ययुद्धकार्तवीर्यसुदर्शनरूपप्रवेशवैकुण्ठगमनम्.
२३.
२४. भास्करप्रतिष्ठिततेजोमयवीरलिङ्गकथने गौतमीभरद्वाजमध्यशिवलिङ्गप्रतिष्ठा.
२५. भास्करशापविमोचने मुनिबृन्दक्षेत्रकथने आदित्यप्रतिष्ठा तैजसलिङ्गवीरेश्वरप्रतिष्ठा.
२६. सूर्यस्तोत्रम्.
२७. प्रसादनिर्माणम्.
२८. वीरेश्वरमहिमानुवर्णितनरनारायणजन्मकुशद्वीपगमनसहस्राननसहस्रकौच(कवच)बलविनाशनम्.
२९. सहस्राननयुद्धविजयः.
३०. नरनारायणविजयः.
३१. आहिलिङ्गप्रतिष्ठा.
३२. आकाशवीरेश्वरप्रशंसा.
३३. श्रीरामचरित्रे पञ्चवीरेशस्थान दर्शनम्.
३४.
३५. कुमारविजयः
३६.
३७. प्रह्लादजननम्.
३८. भीष्मचरित्रः.
३९. परशुरामयुद्धकथनम्.
४०. परशुरामभीष्मसंवादः.
४१. नानातीर्थकथने विचित्रकथाकथनम्.
४२. दत्तात्रेयपञ्चवीरेश्वरदर्शनम्.
४३. पञ्चवीरेश्वरप्रसङ्गः.
४४.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2465. पादतीर्थमाहात्म्यम्.

## PĀDATĪRTHAMĀHĀTMYAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 764.

Complete.

This treats of the purifying efficacy of the holy water used in washing the feet of the devotees of Śiva.

---

## No. 2466. पिनाकिनीमाहात्म्यम्.

## PINĀKINĪMĀHĀTMYAM.

Pages, 36. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 2369.

Complete in 12 Adhyāyas.

This is a portion of the Brahmāṇḍa-Purāṇa and treats of the holiness of the country bordering on the Pinākinī river—the Pennār of the Nellore district in the Madras Presidency—and of the shrines therein. Described on page 1246 of the India Office Library Catalogue (I.O.)

**Beginning :**

वन्दे देवेशमानन्दज्ञानदेहं रमापतिम् ।
ऋषीणां मनसा ध्येयं सर्वतीर्थनिवासिनम् ॥
निमिर्नाम महातेजा गोदावर्यास्तटे शुभे ।
पप्रच्छ मुनिशार्दूलं वसिष्ठं ब्रह्मनन्दनम् ॥
यज्ञार्थं समुपायान्तं निमे राज्ञो महात्मनः ।

* * * *

नारसिंह(ह)सुतायास्तु राजन् द्विगुणिताधमा ।
पिनाकिनी महापुण्या भीमरथ्या समा मता ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

एवमुक्त्वा ऋषिस्सूतः ऋश्यशृङ्गादिकान् द्विजान् ।
पिनाकिन्यां कृतस्नातो गङ्गातीरं ययौ मुनिः ॥
ऋश्यशृङ्गादयस्तस्यां स्नानं कृत्वा यथाविधि ।
पूजयित्वा यथा सूतं वस्त्रकाश्चनभूषणैः ॥
इतिहासस्य वक्तारं पूजयेयुः फलार्थिनः ।
ततो वै शुद्धचित्तास्ते सिधि(द्धि)मापुः परां शुभाम् ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे पिनाकिनीमाहात्म्ये तीर्थकु(ख)ण्डे द्वादशोऽध्यायः ॥

---

## No. 2467. पिनाकिनीमाहात्म्यम्.

## PINĀKĪNĪMĀHĀTMYAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 33. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Gaṇēśapūjāvīdhāna 18*a*, Gaṇēśāṣṭōttaraśatanāmāvali 21*b*, Gaṇēśāṣṭōttarasahasranāmāvali 22*a*.

Breaks off in the 5th Adhyāya.

Same work as the above.

---

## No. 2468. पुण्डरीकपुरमाहात्म्यम्.

## PUṆḌARĪKAPURAMĀHĀTMYAM.

Pages, 52. Lines, 22 on a page.

Begins on fol. 46*a* of the MS. described under No. 2429: Adhyāyas 53 to 61 in the Śaivapurāṇa.

Complete.

This treats of the holiness of Cidambara and of the Śaiva shrine therein.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

नमश्शिवाय साम्बाय सगणाय ससूनवे ।
सनन्दिने सगङ्गाय सवृषाय नमो नमः ॥

ऋषय ऊचुः—

भगवन् सर्वशास्त्रार्थतत्त्वज्ञ करुणानिधे ।
पुण्डरीकपुरस्यास्य माहात्म्यं सङ्ग्रहाच्छ्रुतः(म्) ॥

पुनश्च विस्तरात् श्रोतुं वाञ्छा नो महती गुरो ।
वयन्ते यद्यनुग्राह्या वद सूत घृणानिधे ॥

युष्मद्वक्त्राब्जसंभूतां पीत्वा वाक्यसुधां मुहुः ।
तृष्णा विवर्धतेऽस्माकमैवयस्से(से)वामृतजुषः(षाम्) ॥

सूतः—

नात्याश्चर्यमिदं विप्राः शम्भुपादाब्जसेविनाम् ।
शृण्वताञ्च(ा)स्य माहात्म्यं तृष्णा यद्वर्ततेतराम् ॥

यूयं धन्यतमा लोके ब्रह्मादीनां सुदुर्लभा ।
क्षेत्रमाहात्म्यशुश्रूषा येषां जाता सुनिश्चला ॥

शेषोऽपि नास्य माहात्म्यं विस्तराद्गति(दि)तुं क्षमः ।
वक्ष्यामि सङ्ग्रहेणाहं शृणुत[ा]श्रद्धया सह[ा] ॥

पुराब्रवीद्गुरुम्म(र्म)ह्यं रहस्येतत् गृ(घृ)णानिधे ।

**End :**

चिदम्बरसमाख्याता विद्यैषा मुक्तिदा नृणाम् ।
मया नोक्ता त्वितः पूर्वं सच्छिष्याभावतोऽनघौ ॥

युवयोरद्य वक्ष्यामि देवपादाब्जभक्तयोः ।
भवन्तावपि सश्रद्धं शृणुतं(ा) भाग्यवत्तमौ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इत्यादिमहापुराणे श्रीशैवे एकादशरुद्रसंहितायां व्यासजैमिनिसंवादे पुण्डरीकपुरमाहात्म्ये एकषष्टितमोऽध्यायः ॥ नवमोऽध्यायः ॥

---

No. **2469.** पुराणार्थसङ्ग्रहः.

PURĀṆĀRTHASAṄGRAHAḤ.

Substance, paper. Size, $13\frac{1}{4} \times 8$ inches. Pages, 288. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 30.

**This work seems to be also called Lakṣmīnārāyaṇam. It is by Vēṅkaṭarāyasūri, son of Vaḍamala and Alumēlumaṅgā of Garga family.**

This professes to give a brief and comprehensive survey of some of the main topics dealt with in the Purāṇas. Those topics are mentioned here in the extracts from the beginning of the work.

**Beginning :**

श्रीमन्तं श्रीलसत्कण्ठजगद्रूपं जगद्गुरुम् ।
विष्णुं महेश्वरं वन्दे नीलं श्वेतरुचिं विभुम् ॥

ऋषभयोगी—

देवसेनापते स्कन्द षडानन शिवार्भक ।
श्रीमन्नारायणो लक्ष्मै (क्ष्म्यै)सर्वधर्मानदीधरत् ॥
प्रीत्या कथं तद्वृत्तान् (त्त्वं)वक्तुमर्हसि मे प्रभो ।

स्कन्दः—

ऋषभाहं प्रतुष्टोऽस्मि त्वद्भक्त्या त्वत्प्रपूजया ॥
वेदशास्त्रार्थनिर्णीतान् विष्णुधर्मान् ब्रवीमि ते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वन्त्रिमूर्तिभेदश्च प्रथमे तदनन्तरे ॥
लोकसृष्टिर्लोकजनाः स्वाराज्यं जातिरूपणम् ।
पिशाचमेघजन्तूनां भूसृष्टिश्च(श्च)निगद्यते ॥
तृतीये सप्त पातालाशेषलोकाश्च नारकाः ।
तद्वासिदुःखं तत्पापशेषरोगाश्च तद्भिदा ॥
तन्निस्तु(ष्कृ)तिक्रमश्चैव तुरीये भुवनोच्छ्रयः ॥ १ ॥
भूम्यस्थ(ण्ड)विस्तृतिश्चैव जम्बूदी(द्वी)पं च पञ्चमे ।
तत्रत्यनिम्नगाभूभृद्देशविष्णुशिवालयाः ॥ २ ॥
षष्ठेऽर्कताराग्रतयः चन्द्रोत्पत्त्युपरागकौ ।
कालस्सर्वजनायुश्च सप्तमे दिननिर्णयः ॥ ३ ॥
दैवः पित्र्यस्तथालभ्ययोगस्तद्दै(द्दे)वताबलिः ।
अष्टमे मानसी सिद्धिः शूद्रवैश्योक्तकर्म च ॥ ४ ॥
नवमे क्षत्रियोत्पत्तिः सामुद्रिकविलोकनम् ।
दशमे जातकफलं नीतिरेकादशे स्मृता ॥ ५ ॥
द्वादशे रत्नजातिश्च तेषानिघस(न्निकष)निर्णयः ।
त्रयोदशे गजाश्वादिलक्षणञ्चाप्यलक्षणम् ॥ ६ ॥
चतुर्दशे यागभेदास्स्मार्ताग्नेरपि वैभृतः(भवः) ।
(तथा)पञ्चदशे दिव्यवह्नेर्यजनतत्फले ॥ ७ ॥
षोडशे विप्रमहिमा चतुष्षष्टिकलाभिधा ।
तथाह्निकं सप्तदशे कपिलामहिमापि च ॥ ८ ॥
अष्टादशे देवपूजासालग्रामपरीक्षणम् ।
शिवलिङ्गपरीक्षा च पूजाया वैभवन्तथा ॥ ९ ॥
एकोनविंशे त्वातिथ्यं विंशे भोजनवैभवम् ।
स्त्रीसङ्गमप्रकारश्च रूपितो ह्येकविंशके ॥ १० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सदसत्स्वप्नजफलं गृहस्थाश्रमलक्षणम् ।
वानप्रस्थयतीनान्तु द्वाविंशे लक्षणं स्मृतम् ॥ ११ ॥

त्रयोविंशे ज्ञानकाण्डं द्वैताद्वैतम(त)स्थितिः ।
मुक्तिभेदश्चतुर्विंशे प्रोक्तस्सङ्करनिर्णयः ॥ १२ ॥

पञ्चविंशे तु नारीणां पातिव्रत्यस्य लक्षणम् ।
पुत्रोत्पत्तिनिदानञ्च तथा सत्पुत्रलक्षणम् ॥ १३ ॥

षड्विंशे पुत्रकृत्यञ्च प्रायश्चित्तनिरूपणम् ।
पितृतच्छ्राद्धतल्लोकास्सप्तविंशे तु देवताः ॥ १४ ॥

दानानां वैभवञ्चोक्तमष्टाविंशे च वर्णितम् ।
दशावतारमहिमाप्येकोनत्रिंशके हरेः ॥ १५ ॥

नारायणस्य विभवस्तोत्रं लक्ष्मीविकुण्ठयोः ।
त्रिंशे त्रिपुरसंहारः कल्याणं गिरिजेशयोः ॥ १६ ॥

अविमुक्तिस्थलाख्यस्य काशीक्षेत्रस्य वैभवम् ।
गङ्गाया वैभवञ्चैव विश्वनाथस्य वैभवम् ॥ १७ ॥

शिवस्योत्कर्षनिष्कर्षः ग्रन्थस्यास्य फलश्रुतिः ।
इयतीहपुराणार्थपद्धतिर्विष्णुनोदिता ॥ १८ ॥

* * * *

त्वत्तोऽहं श्रोतुमिच्छामि सर्वधर्मान् ततोऽधिकान् ।
प्रपञ्चसृष्टिं जातीनां भेदं वर्णाश्रमोदितम् ॥ १ ॥

धर्मञ्च वद यच्चान्यत् अज्ञातञ्च तथा वद ।
त्वद्वागमृतपानेन मच्छ्रोत्रं तुष्टिमाप्नुयात् ॥ २ ॥

इदमेव वरं मेऽद्य दातुमर्हसि मत्प्रिय ।
तच्छ्रुत्वा प्रावदद्विष्णुः तथा वक्ष्ये श‍ृणु प्रिये ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुतिस्मृतिपुराणेषु वाल्मीकीये च भारते ।
बोधायनादिधर्मेषु सारमुद्धृत्य सर्वतः ॥ ४ ॥
प्रपञ्चसृष्टिं लोकानां धर्मान् वक्ष्ये शृणु प्रिये ।
इत्युक्त्वाचिन्तयत् सर्वं वेदशास्त्राणि चेतसा ॥ ५ ॥

**End:**

लक्ष्मीः—

शिवस्तोत्रप्रकारश्च वद मे प्राणवल्लभ ।

नारायणः—

शिवस्तुतिं प्रवक्ष्यामि सर्वाभीष्टफलप्रदाम् ॥

* * * *

. . . वेपूज्यः बुद्धिमानभवं प्रभो ॥

इत्येवमुक्त्वा ऋषभो महात्मा स्कन्दं समामन्त्र्य गुरुं प्रसन्नम् ।
ययौ मुनीनां निकटं पुराणं प्रवक्तुकामः परिपूर्णकामः ॥

**Colophon:**

इति वेङ्कटरायविरचिते पुराणार्थसङ्ग्रहे लक्ष्मीनारायणसंवादे त्रिंशोऽध्यायः ।

प्रासूत यं वडमलाख्यबुधोऽलुमेलु-
मङ्गा च गर्गकुलकल्पतरुप्रबन्धम् ।
आलोच्य शास्त्रमखिलं स चकार लक्ष्मी-
नारायणाख्यमिह वेङ्कटरायसूरिः ॥

इदंग्रन्थं लोकनाथशास्त्रिणा लिखितम् ।

अस्य ग्रन्थस्य ग्रन्थसङ्ख्या चतुस्सहस्रम् ।
पत्रसङ्ख्या चतुश्चत्वारिंशदधिकशतं संपूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2470. पुरुषार्थसुधानिधिः.

## PURUṢĀRTHASUDHĀNIDHIḤ.

Substance, paper. Size, 13⅛ × 8¼ inches. Pages, 505. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete, but imperfect.

This MS. is a copy of the one described under the next number.

The work contains four Skandhas: धर्मस्कन्ध, Adhyāyas 1 to 34; अर्थस्कन्ध, Adhyāyas 1 to 23; कामस्कन्ध, Adhyāyas 1 to 14; मोक्षस्कन्ध, Adhyāyas 1 to 19.

This is a compilation from the Purāṇas classified under the heads of the four objects of human pursuit. Bukka, having requested his minister Mādhava to instruct him about the objects of human pursuit in the words of Vyāsa as found in the Purāṇas and the Mahābhārata, Mādhava directed his younger brother to quote and explain to the king the various extracts from the Purāṇas about धर्म, अर्थ, काम and मोक्ष. Sāyaṇa is described herein as the younger brother of Mādhava and as the expounder of the work composed by Mādhava. But at the end Mādhava himself is spoken of as the person who instructed the king.

The worth of this work cannot be over-estimated. From the miscellaneous mass of the Purāṇas much useful and important information is culled and collected in this work, which is given almost in the very words of the Purāṇas.

**Beginning:**

सत्यैकस्थविवेकवान् द्विगुणधीस्त्र्यर्थी चतुर्वेदिता
पञ्चस्कन्धकृतिष्षडन्वयदृढस्सप्ताङ्गसर्वार्थगः ।
अष्टव्याप्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययः
स्मार्तोच्छ्रायधुरन्धरो विजयताच्छ्री(तां श्री)बुक्कपृथ्वीपतिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैब्यस्य मेधातिथिः
धौम्यो धर्मसुतस्य वैन्यनृपतेस्स्वाज्ञा(स्वौजा)निमेर्गौतमः ।

प्रत्यक्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः ॥

तं सर्वविद्यानिलयं तत्त्वविद्बुक्कभूपतिः ।
सत्कथाकौतुकी हर्षादवोचद्राजशेखरः ॥

श्रुतानि त्वन्मुखादेव शास्त्राणि विविधानि च ।
पुराणोपपुराणानि भारतञ्च महामते ॥

सर्वाण्येतानि विप्रेन्द्र गहनान्यल्पमेधसाम् ।
ज्ञातुं कचिन्न शक्यन्ते पुरुषार्थार्थिनामपि ॥

तस्मादाख्यानरूपाणि सुखोपायानि सुव्रत ।
पुरुषार्थोपयोगीनि व्यासवाक्यानि मे वद ॥

तस्य तद्वचनं श्रुत्वा यत्नार्थं बुक्कभूपतेः ।
प्रशस्य तं मुदा युक्तो माधवः प्रत्यभाषत ॥

शृणु त्वं भव्यया बुद्ध्या वाचं मे पुरुषार्थदाम् ।
अयं हि कृतिनामाद्यस्सायणार्यो ममानुजः ॥

पुराणोपपुराणेषु पुरुषार्थोपलिप्सुना ।
उपदिष्टो मया राजन् कथास्ते कथयिष्यति ॥

इति प्रसाद्य राजानं सायणार्यमुदैष(क्ष)त ।
सायणार्योऽग्रजन्मत्वात्प्राह बुक्कमहीपतिम् ॥

साधु साधु महाराज बुद्धिस्ते धर्मदर्शिनी ।
वदामि व्यासवाक्यानि लोकानां हितकाम्यया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपाख्यानानि कृष्णेन कथितान्यतिविस्तरात् ।
तान्येवात्रैव युक्तानि संक्षिप्य कथयामि ते ॥
अयं वेदार्थसमितः पुरुषार्थसुधानिधिः ।
भुक्तिं मुक्तिञ्च कुरुते शृण्वतां पठतामपि ॥
नमो व्यासाय गुरवे महते महतामपि ।
संसारानलतप्तानां यस्य सूक्ती रसायनम् ॥
ब्रह्माणं विष्णुमीशानं गणेशं वागधीश्वरम् ।
श्रीकण्ठञ्च भजन्वक्ष्ये पुरुषार्थसुधानिधिम् ॥
पुरा हि नैमिशारण्ये सत्रे द्वादशवार्षिके ।
निवृ(र्वृ)त्ते मुनयस्सूतमपृच्छन् रो(रौ)महर्षणिम् ॥

ऋषयः—

अस्मिन् बहुक्रियामन्त्रे सत्रे सर्वविदां वर ।
कथास्त्वयोदितास्सम्यगस्माभिर्नावधारिताः ॥
तास्तास्संक्षिप्य कथय कर्मैतत्सफलं भवेत् ।

सूतः—

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ॥
पराशरात्मजं वन्दे शुकतातन्तपोनिधिम् ॥
शृण्वन्तु मुनयस्सर्वे समाधाय दृढं मनः ।
यत्पृष्टमिह युष्माभिरधुना तद्ब्रवीमि वः ॥
स एष हि चतुष्कन्धः पुरुषार्थसुधानिधिः ।
तत्रादौ धर्ममाहात्म्यं ब्राह्मणानां प्रशंसनम् ॥
तन्निन्दाद्रोहकथनं बन्धोक्तिः पूर्वकर्मणः ।
गार्हस्थ्यञ्च सतीधर्मो ह्यातिथ्यं पञ्चयज्ञकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निकुञ्जपञ्जरे भक्तिरन्नदत्यागदूषणम् ।
पितरौ च गुरुस्वामिभार्यापुत्रा इति क्रमात् ॥
पञ्च तीर्थानि पूजार्हातिक्रमस्तरुपुत्रिता ।
ब्रह्मस्वहानिनो(रिणो)दोषो(ष) ऋतुकालस्य पालनम् ॥
गुरोरधर्मवचनोल्लङ्घनेन च दुष्कृतम् ।
गुरावननुकूलेऽपि निर्वाहः शुभकर्मणाम् ॥
देवतालयनिर्माणं तस्य सम्मार्जनस्तुतिः ।
स्नानगन्धप्रसूनानां माहात्म्यं धूपदीपयोः ॥
नैवेद्यञ्च तथा नित्यं जपं मन्त्रं प्रदक्षिणम् ।
ध्वजारोपणमाहात्म्यं शिवपूजाफलन्तथा ॥
तिलान्नगोभूकन्यानां दानानि च गृहस्य च ।
विद्यादानं तटाकस्य निर्माणं पादरक्षणम् ॥
तत्रादौ धर्ममाहात्म्यं शृण्वन्तु प्रवदामि वः ।
शौनकेन पुरा प्रोक्तं चित्रकेतुमहीभुजे ॥

**End :**

तस्मात्सर्वप्रयत्नेन प्रदक्षिणपरो भवेत् ।
प्रदक्षिणफलेनैव सर्वसिद्धिमवाप्नुयात् ॥

**Colophon :**

इति धर्मस्कन्धे चतुस्त्रिंशोऽध्यायः ॥

धर्मस्कन्धस्समाप्तः ॥

अर्थस्कन्धे राजधर्माः—

**Beginning :**

श्रीसूतः—

एवमुक्तो मया विप्रा धर्मस्कन्धो महत्तरः ।
अर्थस्कन्धमथो वक्ष्ये पुरुषार्थसुधानिधौ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थे प्रोक्ता राजधर्मास्सप्तव्यसननिन्दनम् ।
सत्सभावर्णनञ्चैव दुस्सभाया विनिन्दनम् ॥

विश्वासघातके निन्दा निजव(भ)क्तेष्ववञ्चनम् ।
अशाद(काल)कृतकार्यस्य हानिर्भीतस्य लक्षणम् ॥

ऋणसंबन्धकथनं पुरोपकरणक्रमम् ।
कूटसाक्ष्यप्रयोगश्च प्रार्थनादोषभाषणम् ॥

स्वाश्रयस्य परित्यागं कृतघ्नस्य च दूषणम् ।
आशानिन्दाप्रकथनम् असमीक्षितकारिता ॥

तत्रादौ सम्प्रवक्ष्यामि राजधर्मं द्विजोत्तमाः ।
इदमेव पुराप्राक्षीन्मनुर्मत्स्याकृतिं हरिम् ॥

**End:**

तस्मात्कार्यमकर्तव्यमसमीक्ष्य विशारदैः ।
असमीक्ष्य तु कारी तु नरः श्रेयो न विन्दति ॥

**Colophon:**

इत्यर्थस्कन्धे महाभारते असमीक्ष्यकारिनिन्दा नाम त्रयोविंशोऽध्यायः ॥

(पुरुषार्थसुधानिधौ कामस्कन्धः)—

श्रीसूतः—

अर्थस्कन्धस्समाख्यातः कामस्कन्धोऽद्य उच्यते ।
कामस्कन्धे तु संप्रोक्तो लक्षणस्त्रीपरिग्रहः ॥

सत्सौन्दर्यप्रशंसोक्तिररिषड्वर्गदूषणम् ।
अन्यासक्ताङ्गनासङ्गदूषणं कन्यकातपः ॥

कन्यकादूषणे दोषो ब्रह्महत्याविनिन्दनम् ।
अहङ्कारतिरस्कारः पुष्पापचयनिन्दनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूतः—

सदा गृही सुखं भुङ्क्ते स्त्री लक्षणवती यदि ।
ततस्सुखसमृद्ध्यर्थमादौ लक्षण(मी)क्षयेत् ॥

**End:**

तस्मात्पुष्पापचायं हि न कुर्याद्दुष्करं बुधः ।
यदि कुर्यात्प्रमादेन (न) प्राप्नोति पदं परम् ॥

**Colophon:**

इति कामस्कन्धे महाभारते पुष्पापचयनिन्दा नाम चतुर्दशोऽध्यायः ॥
कामस्कन्धस्समाप्तः ॥

(पुरुषार्थसुधानिधौ) मोक्षस्कन्धप्रारम्भः—

**Beginning:**

स्कन्धे तुर्ये सङ्गनिन्दा रागद्वेषविकुत्सनम् ।
विष्णुशङ्करयोर्नामस्मृति(:)तीर्थनिषेवणम् ॥
अहिंसाशि(शी)लमाहात्म्यं महापुरुषदर्शनम् ।
भस्मधारणमाहात्म्यं परिचर्या वृषध्वजे ॥
कर्मणा मोक्षकथनं दोषो निर्माल्यलङ्घने ।
शिवक्षेत्राधिका लोके शिवभक्तस्य पूजनम् ॥
नियमश्शोकनाशोक्तिः ज्ञानमाध्यात्मिकन्तथा ।

सूतः—

संहा(सा)राता(सा)रतां ज्ञात्वा विषयांश्चातिचञ्चलान् ।

**End:**

स सेतिहासः प्रथमः सर्वस्य भवतो जगत् ।
य इमं वेत्ति तत्त्वेन न स कर्मवशो भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति मोक्षस्कन्धे आत्मज्ञानकथनं नाम एकोनविंशोऽध्यायः ॥

सूतः—

इत्येवं कथितो विप्राः पुरुषार्थसुधानिधिः ।
भवतां भव्यचित्तानां पुरुषार्थोपपत्तये ॥
इत्युक्तं माधवार्येण पुरुषार्थसुधानिधिम् ।
श्रुत्वा श्रीबुक्कभूपालः प्रहर्षं प्रत्यपद्यत ॥
उवाच च महात्मानं माधवं स्वगुरुन्तथा ।
त्वत्कथागौरवेणाहं कृतार्थोऽस्मि सतां वर ॥
पुरुषार्थप्रदाश्चैव ज्ञातवानस्मि सत्कथाः ।
त्वमुपेन्द्रमिवेन्द्रस्य भुवि पु . . मनुजम् ॥
माधवाचार्यस्य मन्ये माहात्म्यदायकम् ।
श्रुत्वा त्वयोदितं विद्वन् पुरुषार्थसुधानिधिम् ॥
अनायासेन तस्यैव करस्थास्सर्वसिद्धयः ।

इति पुरुषार्थसुधानिधिः समाप्तः ॥

The following is a list of the subjects dealt with in the work.

धर्मस्कन्धः—

धर्ममाहात्म्यम् (स्कान्दम्).
ब्राह्मणमाहात्म्यम् (भारतम्).
ब्राह्मणावमानकथनम् (भविष्यत्पुराणम्).
पूर्वकर्मसंबन्धः (मार्कण्डेयपुराणम्).
गार्हस्थ्यश्रैष्ठ्यनिरूपणम् (वाराहम्)
पतिव्रताधर्मकथनम् (काशीखण्डः).
अतिथिसत्कारः (आग्नेयपुराणम्).
पञ्चमहायज्ञकथनम् (वराहपुराणम्).
गुरोरधर्मोल्लङ्घनदोषराहित्यकथनम् (भारतम्).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरोरननुकूलेऽपि शुभनिर्वाहकथनम् (आश्वमेधिकम्).
शिवालयनिर्माणकथनम् (स्कान्दम्).
शिवाभिषेकफलकथनम् (भविष्यत्पुराणम्.)
सुगन्धोपचारमाहात्म्यम् (स्कान्दम्).
पुष्पप्रशंसा.
दीपमाहात्म्यम् (गारुडम्).
षड्रसान्ननिवेदनफलम् (विष्णुधर्मोत्तरम्).
गीतफलकथनम् (वाराहम्).
स्तोत्रमाहात्म्यम् (स्कान्दम्).
प्रदक्षिणफलम्.

अर्थस्कन्धः—

राज्यधर्मकथनम् (मात्स्यपुराणम्).
स्त्रीव्यसननिन्दा (भारद्वाजसंहिता).
मृगयाव्यसननिन्दा (भारतम्).
पानदोषकथनम्.
वाग्दूषणकथनम् (भारतम्).
दण्डपारुष्यदूषणम् (पाद्मम्).
अर्थदूषणम्.
सत्सहायकथनम् (भारतम्).
सन्मित्रकथनम् (मार्कण्डेयम्).
दुष्टभृत्यनिन्दनम्.
विश्वासघातकनिन्दा (भारतम्).
निजभक्तवञ्चननिन्दा (पै(लै)ङ्गम्.)
अकाले कार्यकरणनिन्दा.
अभयप्रदानप्रशंसा (भारतम्).
ऋणसंबन्धकथनम्.
परोपकारप्रशंसा.
कूटसाक्ष्य.
अनुचितपदप्रार्थनादोषः (स्कान्दपुराणम्).
आश्रयापरित्यागप्रशंसा.
कृतघ्ननिन्दा (भारतम्).
आशानिन्दा (भारतम्).
असमीक्ष्यकारिनिन्दा (भारतम्).

कामस्कन्धः—

सलक्षणस्त्रीपरिणयम् (स्कान्दम्).
सौन्दर्यप्रशंसा.
अन्यासक्ताङ्गनादूषणम् (ब्रह्माण्डपुराणम्).
कन्यकातपःकथनम्.
कन्यकादूषणदोषः (वामनपुराणम्.)
ब्रह्महत्यादिदूषणम्.
अहङ्कारदूषणम् (मात्स्य).
पुष्पापचयनिन्दा (भारतम्).

मोक्षस्कन्धः—

सङ्गनिन्दा (ब्रह्माण्डम्).
रागद्वेषनिन्दा (भारतम्).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्णुनामस्मरणमाहात्म्यम् (भागवतम्).
पशुपतिनामोच्चारणमाहात्म्यम्.
तीर्थयात्राफलम्.
अहिंसाकथनम्.
शीलप्रशंसा (नारसिंहपुराणम्).
महापुरुषदर्शनम्.
विभूतिमाहात्म्यम् (पाद्मपुराणम्).
शिवपरिचर्याकथनम्.
कर्ममोक्षकथनम् (भारतम्).
नृसिंहनिर्माल्यलङ्घनदूषणम्.
शिवक्षेत्रमाहात्म्यकथनम् (स्कान्दपुराणम्).
शिवभक्तपूजामाहात्म्यम्.
नियमफलकथनम्.
शोककथनम्.
ज्ञानोपदेशकथनम् (विष्णुपुराणम्).
अध्यात्मज्ञानकथनम्.

---

## No. 2471. पुरुषार्थसुधानिधिः.

## PURUṢĀRTHASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 17¾ × 1⅛ inches. Pages, 282. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

There are a few omissions here and there in the manuscript.

Same work as the above.

---

## No. 2472. पुरुषोत्तमक्षेत्रमाहात्म्यम्.

## PURUṢŌTTAMAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 231. Lines, 7 on a page. Character, Telugu. Condition, good Appearance, new.

Complete in Adhyāyas 1 to 44.

This is a portion of the Skānda-Purāṇa, and treats of the holiness of the Puruṣōttamakṣētra (Jagannāth or Puri) and of the shrines therein. Described on pages 1326 to 1329 of the India Office Library Catalogue.

**Beginning:**

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
एषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥

मुनय ऊचुः—

भगवन् सर्वशास्त्रज्ञ सर्वतीर्थविदुत्तम[म] ।
कथितं यत्त्वया पूर्वं प्रस्तुते तीर्थकीर्तनम् ॥

पुरुषोत्तमं महाक्षेत्रं पुण्यं परमपावनम् ।
यत्रास्ते दारवतनुः श्रीशो मानुषलीलया ॥

दर्शनान्मुक्तिदस्साक्षात्सर्वतीर्थफलप्रदः ।
तन्नो विस्तरतो ब्रूहि तत्क्षेत्रं केन निर्मितम् ॥

ज्योतिःप्रकाशो भगवान् साक्षान्नारायणः प्रभुः ।
कथं दारुमयस्तस्मिन् आस्ते परमपूरुषः ॥

श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि नः ।
वद त्वं वदतां श्रेष्ठ सर्वलोकगुरो मुने ॥

जैमिनिः—

शृणुध्वं मुनयस्सर्वे रहस्यं परमं हि तत् ।
अवैष्णवानां श्रवणे भक्तिस्तत्र न जायते ॥

**End:**

एतद्रहस्यमाख्यातं पुराणेषु सुपूजितम् ।
वैष्णवेभ्यो विनान्येषु न तद्वाच्यं कदाचन ॥

कुतर्कोपहता ये च दुरधीतश्रुतागमाः ।
नास्तिका दाम्भिका नित्यं परदोषोपदर्शिनः ॥

ये वैष्णवा मोक्षजीवाः तेभ्यो योग्यं सदैव हि ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीस्कन्दपुराणे जैमिनिऋषिसंवादे श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये चतुश्चत्वारिंशोऽध्यायः ॥

पुरुषोत्तममाहात्म्यं शृण्वतां पापनाशनम् ।
संवत्सरे दुर्मुखाख्ये माघे दाशमिके तिथौ ॥
भानुवारे तु लिखितं पठतां पापनाशनम् ।

* * * *

संवत्सरे कीलकाख्ये ज्येष्ठे चासितपक्षके ।
अमायां गुरुवारे च लिखितं (व्यलिखत)वीरराघवः ॥

---

## No. 2473. पुरुषोत्तममाहात्म्यम्.

## PURUṢŌTTAMAMĀHĀTMYAM.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 77. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 79*a*. The other works herein are Vēṅkaṭagirimāhātmya 1*a*, Śrīraṅgamāhātmya 118*a*.

Complete.

Same work as the above.

---

## No. 2474. पुरुषोत्तमक्षेत्रमाहात्म्यम्.

## PURUṢŌTTAMAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 120. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 3 to 24, complete; 25th incomplete.

First two leaves containing the first 2 Adhyāyas are broken.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2475. पुरुषोत्तमक्षेत्रमाहात्म्यम्.

## PURUṢŌTTAMAKṢETRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 56. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 20 and 21.

This is a portion of Viṣṇurahasya in the Gāruḍa-Purāṇa, and treats of the holiness of Puruṣōttamakṣētra.

**Beginning :**

रक्ताम्भोरुहदर्पभञ्जनमहासौन्दर्यनेत्रद्वयम्
मुक्ताहारविलम्बिहेममकुटं रत्नोज्ज्वलत्कुण्डलम् ।
वर्षाभ्राभसमाननीलवपुषं ग्रैवेयहारान्वितं
शङ्खचक्रधरं प्रसन्नवदनं नीलाद्रिनाथं भजे ॥

नीलाद्रिस्त(न्त)त्र वर्तिभ्यो दातुमर्थचतुष्टयम् ।
अशरीरश्शरीरीव स्यातोयत्तं (प्राप्तो यस्तं)हरिं भजे ॥

मायामोहानलज्वालादग्धज्ञानाङ्कुरं नरम् ।
यत्क्षेत्रवासश्रवणान्मोचयेत्तं हरिं न(नु)मः ॥

नानागमश्रुतिपुराणमहाब्धिमध्यात्
उद्धृत्य बुद्धिमथनेन हरिप्रसादात् ।
वाक्यान्यमूनि विलिखामि विमुक्तदेहः
सन्तस्तदर्थमनिशं परिपालयन्तु ॥

विनाप्यष्टाङ्गयोगेन विनाप्यनशनादिभिः ।
मुक्तिचिन्तामणेर्घोषो मोक्षदस्सर्वदेहिनाम् ॥

**End :**

विराजते नीलगिरौ परः पुमान्
वटोपकण्ठे लवणाम्बुराशेः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रैलोक्यजन्मस्थितिभङ्गकृद्यो-
ऽप्यणोरणीयान् महतो महीयान् ॥
वन्दे नीलाचलाधीशं वन्दे नीलाचलाधिपम् ।
वन्दे नीलाचलाभासं वन्दे श्रीपुरुषोत्तमम् ॥

**Colophon:**

इति श्रीविष्णुरहस्ये श्रीपुरुषोत्तममाहात्म्ये महाप्रसादवैभवं नाम एकविंशोऽध्यायः ॥

इति श्रीमुक्तिचिन्तामणिस्समाप्तः ।

शुभकृद्वत्सरे चैव निजज्येष्ठे सितेतरे ।
पक्षे चैव चतुर्दश्यां भूमिपुत्रकवासरे ॥
पुरुषोत्तममाहात्म्यं दुलवेङ्कटसूरिणा ।
यथावल्लिखितं सर्वं जगन्नाथप्रसादतः ॥
बलरामसुभद्राभ्यां सहितः पुरुषोत्तमः ।
भगवान् प्रतिगृह्णातु भक्तसंरक्षणे रतः ॥

---

No. 2476. पुरुषोत्तममाहात्म्यम्.

PURUṢŌTTAMAMĀHĀTMYAM.

Pages, 88. Lines, 28 on a page.

Begins on fol. 306*b* of the MS. described under No. 2109. Adhyāyas 1 to 11, complete.

This treats of the greatness of the shrine at Jagannāth or Pūri, and is extracted from the Pādma-Purāṇa so far as the first seven Adhyāyas and the first portion of the eighth Adhyāya are concerned; the rest seems to be taken from various other Purāṇas.

The Adhyāyas end thus:—2. Vyāsadēvalasaṁvāda; 7. Nānāpurāṇadēvarṣyuktajagannāthasthiti; 8. Kṣētramāhātmya; 9. Jagan-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



nāthadarśana; 10. Jagannāthasnāna; 11. Jagannāthanirmālyamāhātmya.

**Beginning:**

श्रीशौनक उवाच—

सूतपुत्र महाभाग सर्वधर्मविदां वर ।
इतिहासपुराणानां वक्ता त्वदपरः कुतः ॥
प्राप्ते कलियुगे घोरे घोरकर्मैकशालिनि ।
लोक(के)ऽस्मिन् सत्वधोद्दे(सत्पथादे)ष्टा त्वदन्यः को भविष्यति ॥
कृष्ण[ः]द्वैपायनस्साक्षाद्भगवान् हरिरव्ययः ।
तस्य यत्प्रियशिष्यस्त्वं ज्ञाता धर्मस्य तत्परः ॥
स्वधर्मपरिहीनानां पापिनां ग(स)ङ्गदोषतः ।
मलिनानीह तीर्थानि कानि क्षेत्राणि साम्प्रतम् ॥
भगवान् सर्वभूतात्मा यत्र वा वसति स्वयम् ।

**End:**

ब्रह्माण्डपुराणे—

कुक्कुरस्य मुखाद्भ्रष्टं ममान्नं यदि जायते ।
इन्द्रादेरपि तद्भक्ष्यं भोग्यतो यदि लभ्यते ॥
शुष्कं पर्युषितं वापि नीतं वा दूरदेशतः ।
दुर्जनोवा(नेना)पि संस्पृष्टं सर्वथैवाघनाशनम् ॥

**Colophon:**

इति श्रीनानापुराणे पुरुषोत्तममाहात्म्ये जगन्नाथनिर्माल्यमाहात्म्यं नाम एकादशोऽध्यायः ॥

---

## No. 2477. बदरिकाश्रममाहात्म्यम्.

## BADARIKĀŚRAMAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 80 to 83, in the Skānda-Purāṇa; treats of the holiness and greatness of the Badarikāśrama on the Himālaya Mountains. This is a different work from the one described in the Descriptive Catalogue of the Sanskrit MSS. in the Library of the Calcutta Sanskrit College by Hrishīkeśa Śastri. This is said to have been taught by Sūta to the Ṛṣis in the manner in which Nārada had formerly related it to Indradyumna.

**Beginning :**

गायत्र्याख्यशिलायास्तु सर्वं विस्तरतो वद ।
साधु साधु महाप्राज्ञ सत्प्रसङ्गस्त्वदीरितः ॥
भवतामिह वक्ष्यामि तन्माहात्म्यमनुत्तमम् ।
श्रोतव्यमेतन्निखिलं वक्तृश्रोतृमलापहम् ॥
कायिकं वाचिकं वापि मानसं पातकं हरेत् ।
बदरीवनमाहात्म्यं वक्तुं वर्षशतैरपि ॥
चतुर्मुखोऽपि मुनयः समर्था नेतरे जनाः ।
किमु तस्य प्रवक्ष्यामि संक्षेपेणैव साम्प्रतम् ॥
व्यासप्रसादाद्भवतां तत्समीपे यथाश्रुतम् ।

* * * *

ब्रह्माणञ्च महाविष्णुं गौरीं लक्ष्मीं सरस्वतीम् ॥

सूतः—

नारदोक्तं पुरा विप्रा इन्द्रद्युम्नाय भूभुजे ।
तदत्र वक्ष्ये सर्वेषां भवतां हर्षणाय च ॥

**End :**

इन्द्रद्युम्नः—

माहात्म्यमिदमायुष्यं भवता संप्रकीर्तितम् ।
भवतः श्रुतमव्यग्रं श्रोतव्यन्नात्र विद्यते ॥
इत्युक्त्वा तं मुनिश्रेष्ठं नारदं राजसत्तमः ।
पूजयामास धर्मात्मा जगाम स यथागतम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूतः—

एतत्क्षेत्रस्य माहात्म्यमिन्द्रद्युम्नाय धीमते ।
नारदेनोक्तमधुना मया वस्समुदीरितम् ॥

मुनयः—

श्रोतव्यं भवतस्सर्वं श्रुतमस्माभिरादरात् ।
व्यासप्रसादाद्भवता कृतकृत्याश्च साम्प्रतम् ॥

**Colophon :**

इति स्कान्दे पुराणे बदरीवनमाहात्म्ये इन्द्रद्युम्ननारदसंवादे त्र्यशीतितमोऽध्यायः ॥

---

No. **2478.** बिल्वारण्यमाहात्म्यम्.

BILVĀRAṆYAMĀHĀTMYAM.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 45. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 9, complete.

This is a portion of the Gāruḍa-Purāṇa, and treats of the holy sanctity of the place known as Bilvāraṇya and of the shrine dedicated to Nṛsiṁha therein.

**Beginning :**

अथ (त्रैलोक्य) विख्यातं वनं नैमिशसंज्ञिकम् ।
सर्वाश्चर्यैकनिलयं सर्वभाग्यकरं नृणाम् ॥

नानाविधैर्मृगैर्जुष्टं नानापक्षिगणैर्युतम् ।
नानाविहङ्गनिनदैर्बधिरीकृतदिङ्मुखम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानावृक्षसमाकीर्णं नानाजनसमाकुलम् ।
तटाकैर्बहुभिश्चैव सरोभिः परिवारितम् ॥

* * * *

मुनयः—

सूत[:] पुण्य चिरञ्जीव कृपालो मुनिपुङ्गव ।
व्यासप्रसादात्सकलं भवान्वेत्ति न संशयः ॥

बिल्वारण्यस्य माहात्म्यं लक्ष्मीपुर्याश्च वैभवम् ।
विमानक्षेत्रयोश्चैव तीर्थानाञ्चैव यत्फलम् ॥

किमाश्चर्यतमन्तत्र के वृक्ष(ा)मुनिपुङ्गव ।
कृतादियुगधर्माश्च तत्र तत्र तपस्विनाम् ॥

आचारं किमु सर्वज्ञ[ा]भगवद्भक्तिलक्षणम् ।
किं वात्र सूत पुण्यात्मन् बिल्वारण्ये शुभावहे ॥

योगाख्यनरहरिः श्रीमान् स्वयमाविरभूद्वद ।
अत्रैव बिल्वकान्तारे वेदराजो जगत्प्रभुः ॥

किमागतो महाबाहुः श्रीपतिः श्रीद्रुमान्तिके ।
ब्रह्मणः पञ्चमः पुत्रो (त्रः) कर्दमाख्यः प्रजापतिः ॥

**End:**

बिल्वारण्यस्य माहात्म्यं य(ः पठे)द्विष्णुसन्निधौ ।
विष्णुभक्तिसमायुक्तः पुत्रपौत्रादिभिर्युतः ॥

भौमान् मनोरथान् भुड्त्वा(क्त्वा) सर्वैश्वर्यसमन्वितः ।
(इ)ष्टैः परिवृतो याति तद्विष्णोः परमं पदम् ॥

**Colophon:**

इति श्रीगारुडपुराणे उत्तरखण्डे शौनकादिमुनिसूतसंवादे बिल्वारण्य-माहात्म्ये नवमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2479.** बृन्दारण्यक्षेत्रमाहात्म्यम्.

BṚNDĀRAṆYAKṢETRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 40. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 8, complete ; 9th, incomplete.

Begins on fol 1*a*. The other work herein is Aṣṭakavarga 21*a*.

A portion of the Brahmāṇḍa-Purāṇa. This is the Sthala-purāṇa of the shrine at Triplicane in Madras

A reference made at the beginning of this work to the 108 holy Vaiṣṇava shrines in Jambūdvīpa shows the date of its composition to be comparatively late.

**Beginning :**

नारद उवाच—

देवदेव महादेव नीलकण्ठ जगद्गुरो ।
श्रुतं मयाखिलं सम्यक् माहात्म्यं विष्णुसंसदः ॥
न तृप्तिर्जायते मेऽद्य वैभवं शृण्वतो हरेः ।
स्थानानि त्वन्मुखाम्भोजनिःसृतं पापनाशनम् ॥
अधुना नैमिशारण्यं प्राप्तवानहमव्ययम् ।
पुण्यं पुण्यतमैर्नित्यं सेवितं मुनिसत्तमैः ॥
तत्राद्राक्षं मुनिवरान् सप्तर्षींश्च महात्मनः ।
अन्यानपि महाभागान् भगवद्भक्तिसंयुतान् ॥
सनत्कुमारो भगवान् तेषां मध्ये महात्मनाम् ।
आसीनश्च मया दृष्टो वसूनामिव वासवः ॥
तमप्रमेयविभवं तांश्च दृष्ट्वा महामुनीन् ।
तदाश्रमपदान्दिव्यं प्रविष्टो हृष्टमानसः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



. . . . देवेश बृन्दारण्यमिति श्रुतम् ।
स्थानं विष्णोर्महत्त्वञ्च मूर्तयः पञ्चकास्तथा ॥
तत्र किन्तीर्थमित्युक्तं प्रशस्तं मुनिभिर्भुवि ।
किन्तस्य वैभवञ्चापि तीर्थस्य च दयानिधे ॥
एतत्सर्वं मम ब्रूहि श्रोतुमिच्छामि तत्त्वतः ।

* * * *

**End :**

शङ्खचक्रधरं देवं वहन्तमभयं मुने ।
चिरमाराध्य विधिवत् वरदं प्रणमन् नृणाम् ॥
देहावसाने तद्दिव्यं पदं प्राप मुरद्विषः ।
सोऽपि सम्प्रति सर्वेषां प्राणिनां गोचरीभवन् ॥
वरदो नाम देवेशो दृश्यते तत्र वै हरिः ।
एवं पञ्चसमाख्याता मूर्तयो मुनिसत्तम ॥
याः पृष्टवानसि पुरा विष्णोस्तु दनुजद्विषः ।

**Colophon :**

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे बृन्दारण्यमाहात्म्ये अष्टमोध्यायः ॥

नारदः—

विज्ञाता मूर्तयः पञ्च विष्णोस्तत्र महात्मनः ।
तत्त्वतो वैभवञ्चापि वक्तुमर्हसि शङ्कर ॥

* * * *

तस्योर्ध्वं गच्छतस्तत्र व्योम्नि विश्वावसोर्मुनेः ।
दू(दु)र्वासस्य शरीरेषु छाया वै निपपात च ॥
ततः क्रुद्धो महाभागो दुर्वासा.

[1899-1900].

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2480. बृन्दावनमाहात्म्यम्..

## BṚNDĀVANAMĀHĀTMYAM.

Substance, palm-leaf. Size, 14½ × 1⅓ inches. Pages, 59. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 21*a*. The other works herein are Śrīraṅgamāhātmyam 1*a*, Bhagavadārādhanaślōka 20*a*.

Adhyāyas 1 to 10, complete.

This is a portion of the Brahmāṇḍa-Purāṇa, treating of the holiness of Bṛndāvana, the modern Bindraban near Muttra.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनन्तमाश्रये ॥

नारद उवाच—

देवदेव महादेव नीलकण्ठ जगद्गुरो ।
श्रुतं मयाखिलं सम्यक् माहात्म्यं विष्णुसंसदा(दः) ॥
न तृप्तिर्जायते मेऽद्य वैभवं शृण्वतो हरेः ।
अधुना नैमिशारण्यं प्राप्तवानहमव्ययम् ॥
पुण्यं पुण्यतमैर्नित्यं सेवितं मुनिसत्तमैः ।
तत्राद्राक्षं मुनिवरान् सप्तर्षींश्च महात्मनः ॥
अन्यानपि महाभागान् भगवद्भक्तिभावितान् ।
सनत्कुमारो भगवान् तेषां मध्ये महात्मनाम् ॥
आसीनश्च मया दृष्टो वसूनामिव वासवः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

ब्राह्मण[ा]स्तु समाकर्ण्य भक्त्या वेदान्तको(गो)भवेत् ।
विजयं लभते राजा वैश्यश्च धनमाप्नुयात् ॥
शूद्रस्तु सुखमाप्नोति पूज्यते स्वस्वबन्धुभिः ।
शृण्वताश्च नरा ये वै तो(तु)लसीवनवैभवम् ॥
उपकुर्वन्ति तेऽप्यस्तु(त्र) महीयन्ते हरेः पदे ॥
शृण्वन् पठन् लिखन् बिभ्रत् अथवा श्रावयन् परैः ।
तुलसीवनमाहात्म्यं वैकुण्ठे तु महीयते ॥

**Colophon :**

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे बृन्दावनमाहात्म्ये दशमोऽध्यायः ॥

---

No. **2481.** ब्रह्मगीता.

BRAHMAGĪTĀ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 60. Lines, 7 on a page. Character, Grantha. Condition, fair Appearance, old.

Begins on fol. 34*a*. The other work herein is Sūtagītā 1*a*.

Adhyāyas 1 to 5, complete; 6th, incomplete.

This is a portion of the Sūtasaṁhitā of the Skānda-Purāṇa, and occurs in the Uparibhāga of the Yajñavaibhavakhaṇḍa. This treats of the characteristics of the Supreme Being and of the identity of Siva with Him.

**Beginning :**

अवाच्य एव वेदार्थस्सर्वथा सर्वचेतनैः ।
तथापि वक्ष्ये भक्तानां युष्माकं शृ(णु)तादरात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मसंज्ञश्शिवश्शुद्ध एक एवाद्वयस्सदा ।
अग्रे सर्वमिदं देव आसीत्तन्मात्रमास्तिकाः ॥
ततो नान्यमि(न्मि)षत्किंचित्स पुनः कालपाकतः ।
प्राणिनां कर्मसंस्कारात् स्वशक्तिगतसत्त्वतः ॥
स ऐक्षत जगत्सर्वमुत्सृजा इति शंकरः ।
स पुनस्सकलानेतान् लोकानात्मीयशक्तितः ।
यथापूर्वं क्रमेणैव सुरा॰असृजत प्रभुः ॥
तं हरं केचिदिच्छन्ति केचिद्विष्णुं सुरोत्तमाः ।
केचिन्मामेव चेच्छन्ति केचिदिन्द्रादिदेवताः ॥

* * * *

अत्रैव लीयते सम्यक् सर्वमात्मतया स्वतः ।
घृतकाठिन्यवत्स्वप्नप्रपञ्चप्रतिभासवत् ॥
सर्वमेतदिति शोभनं परं केवलं करुणयैव भाषितम् ।
देवदेवचरणप्रसादतो नेतराद्धि कथ[ा]नीयमस्ति तत् ॥

**Colophon:**

इति सूतसंहितायां यज्ञवैभवखण्डे ब्रह्मगीतासु उपनिषत्सु पञ्चमोऽध्यायः ॥

ब्रह्मा—

अस्मिन् ब्रह्मपुरे वेश्म दहरं यदिदं सुराः ।
पुण्डरीकन्तु तन्मध्ये चाकाशो दहरस्थितः ॥

**End:**

ततस्सर्वाश्रयश्शम्भुः सर्वव्यापी स्वभावतः ।
एष आत्मा परो व्यापी पाप्मभिस्सकलैस्सदा ॥
असौ नोपहतस्साक्षी विमृत्युर्विरज(ा)स्सुराः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2482. ब्रह्मगीताव्याख्या.

## BRAHMAGĪTĀVYĀKHYĀ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 256. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sūtagītāvyākhyā 128*b*.

A commentary on the Brahmagīta, a portion of the Sūtasaṁhitā of the Skānda-Purāṇa, in 12 Adhyāyas; by Mādhavācārya.

**Beginning:**

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोहग्राहग्रासैकधर्मिणे ॥

एवमुपनिषदेकसमधिगम्यब्रह्मात्मैकत्वविज्ञानस्य निश्रेयससाधनत्वमुक्तम्। एतच्च सर्वशाखासम्मतमिति दर्शयितुमैतरी(रे)यकतैत्तिरियिकादिसमस्तोपनिषदर्थस्य साकल्येन प्रतिपादितां ब्रह्मगीतां वक्तुं मुनीनां प्रश्नमवतारयन्ति(ति) । अथ तां वक्तुं पुरावृत्तान्तमुदाहरति पुरेति । सर्वज्ञस्सर्वविदिति । सामान्यतः सर्वं जानातीति सर्वज्ञः; विशेषेणापि सर्वं वेत्तीति सर्ववित् । सर्वश्चासौ ज्ञश्चेति सर्वज्ञः—सर्वजगदात्मकः चिदेकशरीर इत्यर्थः । एवंरूपपरमशिव एव हि रजोगुणोपहितस्सन्निखिलजगत्सर्जनाय ब्रह्मा भवति । परमशिवस्य चैवंरूपमाम्नायते यस्सर्वज्ञस्सर्ववित्, यस्य ज्ञानमयं तपः इति । निर्मलावृतमिति – निर्मलैः[क]स्सनकादिदिव्ययोगिभिः परिवृतमित्यर्थः ।

**End:**

एवं ब्रह्मतत्त्वं प्रतिबोधयति । एष एव गुरुस्साक्षाद्गुरुर्नान्यः ; निश्शेषदुःखोच्छित्तिनिरतिशयानन्दावाप्तिलक्षणस्य पुरुषार्थस्य प्रापकत्वादित्यर्थः । एतदेव प्रपञ्चयति—दृश्यरूपमित्यादिना । गुरुर्गुरुरिति गुरवः पित्राद्याः तेषामप्यसौ विद्वान्गुरुः । प्रतिज्ञातार्थमर्थमुपसंहरति—सर्ववेदान्तेति । स्पष्टोऽर्थः । इति परशिवभक्त्येति कविवाक्यम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवा-परायणेन उपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखण्डस्योपरिभागे ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्यायां द्वादशोऽध्यायः ॥

---

## No. 2483. ब्रह्मगीताव्याख्या.

## BRAHMAGĪTĀVYĀKHYĀ.

Substance, palm-leaf. Size, 17⅛ × 1½ inches. Pages, 88. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

## No. 2484. ब्रह्मगीताव्याख्या.

## BRAHMAGĪTĀVYĀKHYĀ.

Substance, palm-leaf. Size, 13 × 1⅜ inches. Pages, 251. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 2485. ब्रह्मगीताव्याख्या.

## BRAHMAGĪTĀVYĀKHYĀ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 110. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Wants four leaves at the beginning.

Adhyāyas 2 to 12; the beginning of the second Adhyāya is wanting.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2486. भगवद्गीतामाहात्म्यम्.

## BHAGAVADGĪTĀMĀHĀTMYAM

Pages, 3. Lines, 14 on a page.

Begins on fol. 28*b* of the MS. described under No. 2046.

Only one Adhyāya in the Avanti-Khaṇḍa of the Skānda-Purāṇa.

This treats of the greatness and holiness of the Bhagavadgītā.

**Beginning :**

ऋषय ऊचुः—

ब्रह्मन् केन प्रकारेण सर्वपापक्षयो भवेत् ।
विना दानेन तपसा विना तीर्थैर्विना मखैः ॥
विना वेदैर्विना ध्यानैः विना चेन्द्रियनिग्रहैः ।
विना शास्त्रसमूहैश्च कथं मुक्तिरवाप्यते ॥
कथमुत्पद्यते भक्तिः केशवोपरि सर्वदा ।
निश्चला मुनिशार्दूल पुनर्जन्मनि जन्मनि ॥
स्मरणं देवदेवस्य कथमन्ते भवेन्मुनेः(त्पुनः) ।
वेदशास्त्रार्थकुशलं सर्वदा भगवन्मया ॥
वेदार्थमितिहासार्थे सर्वज्ञोऽसि महामुने ।

व्यास उवाच—

कथयामि मुनिश्रेष्ठ यत्पृष्टोऽहमशेषतः ।
प्रसादाद्देवदेवस्य नाज्ञातं मम विद्यते ॥
धनञ्जयाय कथितं देवदेवेन चाक्रिणा ।
सेनयोरुभयोर्मध्ये कुरुक्षेत्रे महात्मना ॥
तच्छ्रूयतां महाभागा वक्ष्याम्यहमनुत्तमम् ।
श्रवणान्मुच्यते जन्तुर्दुःखसंसारसागरात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

श्रोतव्या पठनीया च गीता विष्णुमुखोद्भवा ।
विहाय सर्वशास्त्राणि स्मरन्यत्ते(सर्वयत्ते)न भूसुरा(रैः) ॥
पठेद्विद्वान् सदा विद्वान् मनः कृष्णे निवेद्य च ।
गङ्गा गीता च गायत्री गोविन्दे च त्रियक्षरम् ॥
गोपीचन्दनपुण्ड्रञ्च पाविनां दुर्लभं तथा ।
पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ॥
नित्यं धारयते विप्रस्स मोक्षमधिगच्छति ।

**Colophon:**

इति श्रीस्कान्दपुराणे अवन्तीखण्डे प्रथमस्तोत्रे भगवद्गीतामाहात्म्यं नाम त्रयस्त्रिंशोऽध्यायः ॥

---

No. **2487.** भगवद्गीतामाहात्म्यम्.

BHAGAVADGĪTĀMĀHĀTMYAM.

**Pages,** 6. Lines, 8 on a page

Begins on fol. 25*a* of the MS. described under No. 2036

Complete.

A work similar to the last in subject matter.

**End:**

पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
नित्यं पठति यो विप्रः स मोक्षमधिगच्छति ॥
गीतानामसहस्रे द्वे स्थावराजो ह्यनुस्मृताः(?) ।
यस्य कुक्षौ तु वर्तन्ते स वै नारायणस्स्मृतः ॥

**Colophon:**

इति गीतामाहात्म्यं संपूर्णम् ॥

205

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2488. भगवद्गीतामाहात्म्यश्लोकाः.

## BHAGAVADGĪTĀMĀHĀTMYAŚLŌKĀḤ.

Substance, palm-leaf. Size, 12⅜ × 1⅜ inches. Pages, 2. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 30*a*. The other works herein are Dānaphalavrata 1*a*, Paramānnadānamantra 7*b*, Pūjāvidhāna 8*a*, Ṛṣipañcamīvrata 10*a*, Kēdāragaurivrata 19*a*, Durgāpūjā 23*a*, Śanitrayōdaśīvrata 24*a*

Incomplete.

These stanzas are generally repeated by pious and religious readers of the Gītā. They are laudatory stanzas in praise of Kṛṣṇa, of Arjuna and of the Gītā.

**Beginning:**

गीता सुगीता कर्तव्यं(व्या)किमन्यैश्शास्त्रसङ्ग्रहैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिस्सृता ॥
येकाशौ(एका गीता)देवकीपुत्रगीता एको देवो देवकीपुत्र एव ।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य कृष्णस्य सेवा ॥

**End:**

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहन्त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

---

## No. 2489. भागवतमाहात्म्यम्.

## BHĀGAVATAMĀHĀTMYAM.

Substance, paper. Size, 9¾ × 4⅝ inches. Pages, 74. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Explains the sanctity and the greatness of the Bhāgavata-Purāṇa and is said to be derived from the following sources:—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Vāyu-Purāṇa, Adhyāyas 22 and 23.
Brahmavaivarta-Purāṇarahasya, Adhyāyas 1 to 10.
Pādma-Purāṇa, Adhyāyas 1 to 25.

**Beginning :**

भागवतमाहात्म्यं वायव्यम्—

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

श्रीसूतः—

अधीत्य श्रीभागवतं कृष्णद्वैपायनान्महान् ।
शुकः पप्रच्छ पितरं किमस्याध्ययने फलम् ॥
संहितापठनाद्वा किं प्रतिश्लोकार्थवर्णने ।
येन श्रोता हि विधिना फलं साङ्गं लभेद्ध्रुवम् ॥
महिमा को विधिस्तस्य श्रुतं केन पुरा हरे ।
स्कन्धाध्यायश्लोकपादमात्रादेश्श्रवणे पृथक् ॥
फलं ब्रूहि नृणामस्य श्रोतॄणां जगदीश्वर ।
वक्तुः श्रोतुश्च नियमं समाप्तौ पूजनं च किम् ॥
सर्वं साकल्यतो मह्यं वर्णयस्व कृचा(पा)निये(धे) ।

* * * *

**Colophon :**

इति श्रीवायुपुराणे श्रीभागवतप्रशंसने द्वाविंशोऽध्यायः ॥

* * * *

इति श्रीमद्वायुपुराणे श्रीभागवतमाहात्म्यवर्णनं नाम त्रयोविंशोऽध्यायः ॥

**End :**

पुस्तकदानमन्त्रः—

व्यासबुद्ध्यालवालोत्थश्श्रुतिबीजसमुद्भवः ।
द्वादशस्कन्धविस्तारो मोक्षरूपफलाश्रयः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीभागवतकल्पद्रुः श्रेयसेऽस्तु सदा मम ।
श्रीमद्भागवतं दिव्यं पुरुषार्थैकसाधनम् ॥
विष्णोः प्राणात्प्रियतमं मम पापं व्यपोहतु ।
भागवतमाहात्म्यं ब्रह्मकैवर्तसारम्—

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
नैमिषेऽनिमिषक्षेत्रे मुनयश्शौनकादयः ।
सूतं धर्मविदां श्रेष्ठं परिपप्रच्छुरादरात् ॥
शौनकन्तु पुरस्कृत्य सर्वप्रश्नार्थकोविदम् ।
सूतस्याग्रे समासीनं भासमानं स्वरोचिषा ॥
सूतात्संशृण्वतां चैव ऋषीणां मध्यसंस्थितः ।
शौनकस्समुवाचेदं सूतं पौराणिकोत्तमम् ॥

शौनकः—

सूत सूत महाभाग सर्वधर्मविदां वर ;
नमस्ते विदुषां श्रेष्ठ नमस्ते करुणाकर ॥

*　　*　　*　　*

तेषामेतस्य को लभ्यः त्याज्यं ग्राह्यं भवेन्नु किम् ।
इमं प्रश्नं परिब्रूहि कृपाळो दीनवत्सल ॥

*　　*　　*　　*

**Colophon:**

इति श्रीब्रह्मकैवर्तपुराणरहस्ये शौनकप्रश्नं(श्नो) नाम प्रथमोऽध्यायः ॥

**End:**

पापमेतत्स विज्ञाय तं जघान नराधमम् ।
सा तु भीताविशद्वह्निं ततो वृष्टिर्व्यजायत ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूतः—

इत्थं भागवतस्यायं महिमा वर्णितो द्विज ।
त्वस्ता(श्चा)पि श्रद्धया युक्तो(क्तः) तत्र निष्ठां समाचर ॥

**Colophon :**

इति श्रीब्रह्मवैवर्तपुराणरहस्ये श्रीभागवतश्रवणमाहिमानुवर्णनं नाम दशमोऽध्यायः ॥

पाद्मपुराणस्थं भागवतमाहात्म्यम्—

**Beginning :**

यं प्रव्रजन्तमनुपेतमपेतकृत्य-
द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवो विनेदुः
तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

शौनकः—

अज्ञानध्वान्तविध्वंसकोटिसूर्यसमप्रभम् ।
सूताख्याहि कथासारं मम कर्णरसायनम् ॥
भक्तिज्ञानविरागाप्तिविवेको वर्धते यथा ।
इह घोरे कलौ प्राप्ते जीवश्चासुरतां गतः ॥
क्लेशाक्रान्तस्य तस्यैव शोधने किं परायणम् ।
श्रेयसां यद्भवेच्छ्रेयः पावनानाञ्च पावनम् ॥
कृष्णप्राप्तिकरं शश्वत् साधनं तद्वदाधुना ।

सूतः—

चिन्तामणिर्लोकसुखं सुरद्रुः स्वर्गसम्पदम् ।
प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रीतिश्शौनक चित्ते ते गुरून्नत्वा वदामि च ।
सर्वसिद्धान्तनिष्पन्नं संसारज्वरनाशनम् ॥

भक्तिः प्रवर्धते यच्च ब्रह्म सन्तोषहेतुकम् ।
तदहं तेऽभिधास्यामि सावधानतया शृणु ॥

कालव्याळमुखग्रासत्रासनिर्यासहेतवे ।
श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥

एतस्मादपरं किञ्चित् मनश्शुद्धौ न वर्तते ।
जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत् ॥

* * * *

**Colophon:**

इति श्रीमत्पाद्मपुराणे उत्तरखण्डे सूतशौनकसंवादे श्रीमद्भागवतमाहात्म्यनिरूपणे वैकुण्ठदर्शनं नाम प्रथमोऽध्यायः ॥

**End:**

इदं निश्चित्य मनसि सर्वकर्मपराङ्मुखः ॥
पुरश्चरणमेतस्य कुरु कारय वाथवा ।

भक्तोऽसि सात्वताग्र्योऽसि यदुक्तं च मयाखिलम् ॥

सूतः—

एवमुक्त्वा हृषीकेशो नरायैव प्रतिस्फुटम् ।
ययौ द्वारवतीं शुभ्रां ब्रह्मरुद्रादिसेविताम् ॥

एतद्वः कथयति सात्वतां पुरस्तात्
शुद्धान्तःकरणनिविष्टसत्कथानाम् ।

सारूप्यं व्रजति स सात्वतर्षभस्य
शृण्वन्तो भवजलधेः प्रयान्ति पारम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीपाद्मपुराणे उत्तरभागे पाताळखण्डे धर्मारण्यनिरूपणे श्रीमद्भागवतमाहात्म्ये पुरश्चरणविधिकथनं नाम पञ्चविंशोऽध्यायः ॥

सानन्दं लिखितं मया चिरतरं दृष्ट्वा हरेर्धाचयेत्
यस्तस्मै द्विजबालगोहननजं काशीप्रभासा(यागा)दिषु ।
पापं पङ्कजनाभ एष दिशतु स्वर्णादिचौर्योद्भवं
किञ्चैतस्य विशेषपुण्यमखिलं व्यर्थं तनोतु प्रभुः ॥

---

## No. 2490. (सप्ताह) भागवतमाहात्म्यम्.

## (SAPTĀHA) BHĀGAVATAMĀHĀTMYAM.

Pages, 148. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 2100.

Describes the meritoriousness of reading the Bhāgavata-Purāṇa from the beginning to the end in seven days.

Compiled from the following Purāṇas—

Skānda, 4 Adhyāyas.

Pādma, 6 Adhyāyas.

Brahmavaivarta.

Gaurītantra, 5 Paṭalas.

Vāyu-Purāṇa—for extracts see under No. 2489.

**Beginning:**

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

ऋषय ऊचुः—

वज्रं श्रीमाथुरे देशे स्वपौत्रं हस्तिनापुरे ।
अभिषिच्य गते राज्ञि तौ कथं किञ्च चक्रतुः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीसूत उवाच—

महापथं गते राज्ञि परीक्षित्पृथिवीपतिः ।
जगाम मधुरां विप्रा वज्रनाभदिदृक्षया ॥

पितृव्यमागतं दृष्ट्वा वज्रः प्रेमपरिप्लुतः ।
अभिगम्याभिवाद्याथ निनाय निजमन्दिरम् ॥

परिष्वज्य स तं वीरः कृष्णैकगतमानसः ।
रोहिण्याद्या हरेः पत्नीर्ववन्दायतनागतः ॥

ताभिस्संमानितोऽत्यर्थं परीक्षित्पृथिवीपतिः ।
विश्रान्तस्सुखमासीनो वज्रनाभमुवाच ह ॥

* * * *

**Colophon :**

इति श्रीस्कान्दे पुराणे अखिलेष्टदश्रीभागवतमाहात्म्ये प्रथमोऽध्यायः ॥

**End :**

एवं कृते विधाने तु लभते वाञ्छितं फलम् ।
दारागारसुतात्राज्यन्धनादि च यदीप्सितम् ॥

परन्तु शोभते नात्र सकामत्वविडम्बनम् ।

**Colophon :**

इति स्कान्दे पुराणे श्रीभागवतमाहात्म्ये अखिलेष्टप्रदे चतुर्थोऽध्यायः ॥

स्कान्दे मार्गशीर्षमाहात्म्ये भगवद्वचनम्—

श्रीमद्भागवतं नाम पुराणं पठते नरः ।
प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम् ॥
श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ।
पठेच्छृणोति यो भक्त्या गोसहस्रफलं लभेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यः पठेत्प्रयतो नित्यं श्लोकं भागवतं सुत ।
अष्टादशपुराणानां फलमाप्नोति मानवः ॥

* * * *

यत्र यत्र भवेत्पुत्र शास्त्रं भागवतं कलौ ।
तत्र तत्र सदैवाहं भवामि त्रिदशैस्सह ॥

तत्र सर्वाणि तीर्थानि नदीनदसरांसि च ।

पाद्मे श्रीभागवतमाहात्म्यम् —

**Beginning :**

नैमिशे सूतमासीनमभिवाद्य कृताञ्जलिः ।
कथामृतरसास्वादकुशलश्शौनकोऽब्रवीत् ॥

श्रीशौनकः—

अज्ञानध्वान्तविध्वंसकोटिसूर्यसमप्रभम् ।
सूताख्याहि कथासारं मम कर्णरसायनम् ॥

भक्तिज्ञानविरागाप्त्यै विवेको वर्धते कथम् ।
मायामोहनिरासश्च वैष्णवैः क्रियते यथा ॥

इह घेरे कलौ प्रायो जनाश्चासुरतां गताः ।
क्लेशाक्रान्ताश्च ते पापाश्शोधने किं परायणम् ॥

श्रेयसां यद्भवेच्छ्रेयः पावनानाञ्च पावनम् ।
कृष्णप्राप्तिकरं यन्मे साधनं तद्वदाशु भो(ः) ॥

सूतः—

धन्योऽसि गुरुवर्योऽसि स्मारितोऽस्मि कथामिमाम् ।
सर्वसिद्धान्तसंयुक्तं वैष्णवानां हितं वरम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्तिप्रवाहलहरीवीचीप्रेम्णैव सादरम् ।
कृष्णामृतसुधासिन्धुसारसिद्धान्तसन्धितम् ॥
कालव्याळमुखग्रासगीर्णनिर्णा(र्या)सहेतवे ।
श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥

* * * *

**Colophon:**

इति पाद्मे पुराणे उत्तरखण्डे सप्ताहश्रीभागवतमाहात्म्ये भक्तिनारद-संवादे कलिवर्णनं नाम प्रथमोऽध्यायः ॥

**End:**

रसप्रवाससंस्थेन श्रीशुकेनेरिता कथा ।
कण्ठे सम्बध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥
इति च परमगुह्यं सर्वसिद्धान्तसिद्धं
सपदि निगदितं ते शास्त्रपुञ्जं विलोक्य ।
जगति शुककथातो निर्मलं नास्ति किञ्चित्
पिबत रमत नित्यं द्वादशस्कन्धसारम् ॥
एनां यो नियततया शृणोति भक्त्या
यश्चैनां कथयति साधु वैष्णवाग्रे ।
तौ सम्यग्विधिकरणात्फलं लभन्ते(भेते)
याथार्थ्ये न हि भुवने किमप्यसाध्यम् ॥
कायेन वाचा मनसेन्द्रियैर्वा . . नारायणायेति समर्पयामि ॥

**Colophon:**

इति पाद्मपुराणे उत्तरखण्डे भागवतमाहात्म्ये सप्ताहयज्ञविधिकथनं नाम षष्ठोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

ब्रह्मकैवर्ते सूतम्प्रति शौनकवचनम्—

श्रुतं भागवतं तत्र महाभारतमेव च ।
तत्र भागवतं ज्ञानं भगवद्भक्तिवर्धनम् ॥

अवतारा हरेः प्रोक्ता द्वादशस्कन्धसम्मिते ।
ज्ञानोपदेशो यन्तु(त्तु)ल्यो नास्ति कुत्रापि कीर्तितः ॥

श्रवणादेव यस्य स्यात्सर्वार्तिशमनं परम् ।

भर्तृव्याधिखिन्नां पतिव्रताम्प्रति स्वप्ने विप्रवचनम्—

वैद्योऽहमस्मि सुश्रोणि भेषजं प्रवदामि ते ।
अत्र देवालयश्चैकं वासुदेवस्य वर्तते ॥

तत्रैकं पुस्तकश्चास्ति श्रीमद्भागवताभिधम् ।
तदेतद्बहुकालीनं सह देवेन पूज्यते ॥

तत्र गत्वा प्रतिदिनं ताळपत्रे तु लेखितम् ।
जलं क्षिप्त्वा तदुपरि पात्रे धृत्वा तु तज्जलम् ॥

देवदेवस्य निर्माल्यं तत्र क्षिप्त्वा तु पायय ।
स्वभर्तुस्तेन तद्व्याधिः प्रशमं याति निश्चितम् ॥

श्रीसूतवचनम्—

अष्टादश पुराणानि पुण्यदानि श्रुतानि तु ।
तेषां भागवतं श्रीमत्पुण्यदं सर्वतो नृणाम् ॥

**End:**

गुरुर्हि परमं मित्रं गुरोरन्यस्सुहृन्न च ।
गुरुर्यस्य हि तुष्टस्स्यात्तस्य तुष्यन्ति देवताः ॥

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ वा यतिः ।
गुरुं सेवेत सततमात्मनो हितकाङ्क्षया ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

गौरीतन्त्रस्थभागवतमाहात्म्यम्—

कैलासशिखरारूढं भक्तिशास्त्रविशारदम् ।
सदाशिवं नमस्कृत्य गौरी पप्रच्छ सादरम् ॥

श्रीगौर्युवाच —

सदाशिव शिवाधार शङ्कर श्रीधरप्रिय ।
गिरीशाखिलसद्गोष्ठीनीराजितपदाम्बुज ॥

किञ्चित्पृच्छामि भो देव ब्रूहि कृत्वा कृपां मयि ।
श्रीभागवतमाहात्म्यं श्रोतुं कौतूहलं मम ॥

श्रीसदाशिव उवाच —

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतमं शिवे ।
श्रीभागवतमाहात्म्यं सर्वपापविनाशनम् ॥

* * * *

**Colophon :**

इति श्रीगौरीतन्त्रे सदाशिवगौरीसंवादे श्रीभागवतमाहात्म्ये प्रथमः पटलः ॥

**End:**

श्रीभागवतमाहात्म्यं त्वयि स्नेहात्प्रकाशितम् ।
न वक्तव्यं न वक्तव्यं न वक्तव्यं बहिर्मुखे ॥

अन्तर्मुखे तु वक्तव्यं यत्नतः प्रणवं शुभे ।
य इदं शृणुयाद्देवि पठेद्वा नित्यशः प्रिये ॥

स वै श्रीहरिपादाब्जे रतिं परमिकां लभेत् ।

**Colophon :**

इति श्रीगौरीतन्त्रे सदाशिवगौरीसंवादे भागवतमाहात्म्ये पञ्चमः पटलः ॥

भागवतमाहात्म्यं संपूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2491. मङ्गलगिरिमाहात्म्यम्.

## MAṄGALAGIRIMĀHĀTMYAM.

Substance, paper. Size, $8\frac{7}{8} \times 6\frac{5}{8}$ inches. Pages, 230. Lines, 19 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vêṅkaṭêśasthalamāhātmya 231*a*.

Adhyāyas 1 to 30, in the Brahmavaivarta-Purāṇa.

This work describes the origin and sanctity of the shrine dedicated to Nṛsiṁha at Maṅgalagiri, a place near Bezwada in the Krishna district of the Madras Presidency.

**Beginning :**

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

पार्वत्यौ(त्यु)वाच—

महादेव महाभाग नारदाद्या महर्षयः ।
जीवन्मुक्तिमवापुस्ते परमेश्वरभक्तितः ॥

प्राक् त्वन्मुखाम्बुजाच्छ्रुत्वा स्वयंव्यक्तस्थलादिकम् ।
सर्वपापहरं दिव्यमस्ति जीवसुपावनम् ॥

श्रीरङ्गमाद्यं श्रीमुष्णं नैमिशं पुष्करन्तथा ।
सालग्रामाद्रिस्तोताद्रिः वेङ्कटाद्रिस्तथा महान् ॥

नरनारायणावासो दिव्यो बदरिकाश्रमः ।
यक्षगन्धर्वगरुडकिन्नरोरगसेवितः ॥

एते ह्यष्ट स्वयंव्यक्ता भूलोके नन्दिशङ्कर ।
एतेषां चरितं वक्तुं त्वमर्हसि ममाधुना ॥

**End :**

न वक्तव्यं न वक्तव्यं विकल्पापहतात्मने ।
नित्ययुक्ताय लोकाय वाच्यं विश्वसितात्मने ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति ब्रह्मकैवर्ते भवानीशङ्करगीतायां परतत्त्वनिरूपणयोगो नाम त्रिंशोऽध्यायः ॥

The contents of the chapters as given in the colophons are :—

नमुचिमर्दन १.
तोताद्रिवर्णन २.
मुक्तच्यद्रिवर्णन ३.
धर्माद्रिवर्णन ४, ५.
मङ्गलाद्रिवर्णन ६, ७, ८.
वैष्णवाश्रमवर्णन ९.
लक्ष्मीकल्याणसरोवर्णन १०, ११, १२.
कीटतीर्थवर्णन १३.
चक्रतीर्थवर्णन १४.
वटतीर्थवर्णन १५, १६.
मुक्तितीर्थवर्णन १७, १८.
तीर्थदानवर्णन १९.
दीपसंस्थापनवैभव २०.
मुक्तिविभागनिर्णय २१.
विधिक्रम २२.
नवाह्निकवर्णनोपक्रमण २३.
मदनोत्पत्तिकथन २४.
नवाह्निकाविधि २५.
नवाह्निकवर्णन २६.
पल्लवोत्सववर्णन २७.
चातुर्मास्योत्सव २८.
प्रपन्नोत्सव २९.
वैभववर्णन.
परतत्त्वनिरूपणयोग ३९.

---

## No. 2492. मन्दाकिनीधराचलमाहात्म्यम्.

## MANDĀKINĪDHARĀCALAMĀHĀTMYAM.

Substance, palm-leaf. Size, $20\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 121. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Adhyāyas 1 to 11 complete.

Begins on fol. 1*a* The other works herein are Bhaviṣyōttarapurāṇa (Tīrthakāṇḍa) 61*a*, Śivagaṅgāmāhātmya 67*b*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This is a portion of the Tīrthakāṇḍa of the Skānda-Purāṇa, and treats of the sanctity of a number of rivers and springs to be found on the Himalayas.

**Beginning:**

सूतः—

इदं वः कथितं विप्राः श्रीगिरेर्वैभवं शुभम् ।
कर्माणीशः परं श्रुत्वा भुक्त्वाचम्य ततः परम् ॥

यास्येऽहमाश्रमपदं नित्यकर्म निवर्त्त्य च ।
आयास्येऽहं पुनस्तत्र युष्माकं महदाश्रमम् ॥

पुनः किं श्रोतुमिच्छध्वं मां पृच्छथ मुनीश्वराः ।
ततः सूतमुखात्सर्वे शौनकाद्या महर्षयः ॥

* * * *

इत्येवं कथितं विप्रा वैभवं तत् ककुद्गिरेः ।
य इदं श्रु(शृ)णुयान्मर्त्यो सो(त्यस्सोऽ)श्वमेधफलं भवे(लभे)त् ।
सर्वपापविनिर्मुक्ता यास्यन्ति शिवमन्दिरम् ॥

**Colophon:**

इति स्कन्दपुराणे तीर्थकाण्डे मन्दाकिनीधराचलमाहात्म्ये पर्वतोत्पत्तिकथ(नं)नाम प्रथमोऽध्यायः ॥

ऋषयः—

सूत धर्मार्थतत्त्वज्ञ सर्वभूतदयापर ।
मन्दाकिनीधरगिरेर्माहात्म्यं पापनाशनम् ॥
वक्तुमर्हसि चास्माकं भूयः कलिमलापहम् ।

श्रीसूतः—

श्रु(शृ)ण्वन्तु रु(ऋ)षयस्सर्वे तथा ये श्रवणेच्छवः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

यः पठेदिदमध्यायं श्रु(शृ)णुयाद्वा मुनीश्वराः ।
स स्नातस्सर्वतीर्थेषु सर्वपुण्यफलं भवे(लभे)त् ॥

पुण्यानां परमं पुण्यं पावनानां च पावनम् ।
सर्वतीर्थोत्तमं प्रोक्तं नात्र कार्या विचारणा ॥

**Colophon:**

इति श्रीस्कन्दपुराणे तीर्थकाण्डे मन्दाकिनीधराचलमाहात्म्ये गङ्गातीर्थप्रशंसायां ज्ञानगुणमुक्तिकथनं नाम एकादशोऽध्यायः ॥

१. पर्वतोत्पत्तिकथन.
२. गन्धर्वशापविमोक्षण.
३. पराशरतीर्थप्रशंसा.
४. मैत्रेयतीर्थप्रशंसायां गजेन्द्रमोक्ष.
५. मैत्रेयतीर्थप्रशंसायां पैशाचदेहविमोक्षण.
६. ब्रह्मनारदसंवादे सदाशिवस्तोत्रकथन.
७. कणादतीर्थप्रशंसायां पाञ्चालस्य नष्टराज्यप्राप्ति.
८. कपिलतीर्थप्रशंसायां पिशाचमोक्षण.
९. मौद्गल्यतीर्थप्रशंसायां मौद्गल्यमोक्षकथन.
१०. मौद्गल्यतीर्थप्रशंसायां रामस्य पुत्रप्राप्ति.
११. गङ्गातीर्थप्रशंसायां ज्ञानगुणमुक्तिकथन.

---

## No. 2493. माघमाहात्म्यम्.

## MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 223. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 37.

This is a portion of the Pādma-Purāṇa, and treats of the sanctifying meritoriousness of the morning bath in the Māgha month (January–February).

Adhyāyas 1 to 22 of this work correspond with Adhyāyas 219 to 240 of the Uttarakhaṇḍa of the Pādma-Purāṇa (Ānandāśrama edition).

**Beginning :**

आरब्धुं नैमिशारण्ये सत्रं द्वादशवार्षिकम् ।
आजग्मुरखिल(ला)स्तत्र मुनयस्त(यो) ब्रह्मवादिनः ॥
आनीतो देवलो व्यासः सुमन्तुः पैल एव च ।
सुमत(ति)र्वामदेवश्च जाबालिः काश्यपो भृगुः ॥
पर्वतः शरभङ्गश्च सुतीक्ष्णोऽगस्त्य एव च ।

* * * *

वेदान्तशास्त्रनिरताः पञ्चयज्ञपरायणाः ।
आगत्य नैमिशारण्यम् अशेषगुणसंयुताः ॥
कर्तुमारेभिरे सत्रम् अथ सूतस्समाययौ ।
तमाश्रममनुप्राप्तं जटावल्कलसंयुतम् ॥

* * * *

नैमिशीया महात्मानो महाभक्तिसमन्विता(:) ।
चित्राश्श्रोतुं कथास्तत्र परिवव्रुस्समन्विताः ॥
अभिवाद्य मुनीन्द्रांस्तान् सर्वानेव कृताञ्जलिः ।
अपृच्छत् स तपोवृद्धिम् ऋषिभिश्चाभिनन्दितः ।
अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु ॥

* * * *

श्रोतुकामाः कथां पुण्याम् इदं वचनमब्रुवन् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋषयः—
ब्राह्मं पुराणं प्रथमं वैष्णवं पाद्ममेव च ।
* * * *
तस्मिन् पुराणे भवता माघमासस्य वैभवः ॥
अग्रतो वर्णितोऽस्माकं तं भूयो वक्तुमर्हसि ।
एतेषामत्र सर्वेषां विस्मृतप्राय एव नः ॥
इदानीमपि नैद्री(नेदी)यान्माघस्तस्मात् कृपानिधे
तं भूयश्श्रोतुकामानाम् अस्माकं वर्णयाग्रतः ॥
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोऽब्रवीत् ।
* * * *
इति श्रीपद्मपुराणे माघमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

स्नानेनानेन दानेन माहात्म्यश्रवणेन च ।
प्रीणयन्ते सुरगणा प्रीयताम्मे दिवाकरः ॥
इति सम्पूज्य सन्तर्प्य गोभूतिलगवादिभिः ।
आन्दोलिकायामारोप्य छत्रचामरसंयुतम् ॥

**Colophon:**

इति श्रीपद्मपुराणे उत्तरखण्डे वसिष्ठदिलीपसंवादे माघमाहात्म्ये सप्तत्रिंशोऽध्यायः ॥

समाप्तोऽयं ग्रन्थः ॥

---

No. **2494.** माघमाहात्म्यम्.

MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 240. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 40.

Same work as the above.

The MS. is dated: the 3rd of Phālguna-śuddha in the year Pramādin.

For Private and Personal Use Only

## No. 2495. माघमाहात्म्यम्.

## MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, $19\frac{3}{8} \times 1\frac{3}{4}$ inches. Pages, 181. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

First leaf is wanting. Adhyāyas 1 to 35.

Same work as the above.

---

## No. 2496. माघमाहात्म्यम्.

## MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 321. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 34.

Same work as the above.

---

## No. 2497. माघमाहात्म्यम्.

## MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 254. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 33; 34th, incomplete.

First five leaves broken.

Same work as the above.

---

## No. 2498. माघमाहात्म्यम्.

## MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 282. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 29th Adhyāya.

Same work as the above.



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2499. माघमाहात्म्यम्.

### MĀGHAMĀHĀTMYAM.

**Substance**, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 210. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Adhyāyas 1 to 26, complete; 27th incomplete.

Same work as the above.

---

## No. 2500. माघमाहात्म्यम्.

### MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 118. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Aṅkurārpaṇa 60*a*.

Breaks off in the 19th Adhyāya.

Same work as the above.

---

## No. 2501. माघमाहात्म्यम्.

### MĀGHAMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 9⅜ × 1¾ inches. Pages, 58. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the 8th Adhyāya.

Same work as the above.

---

## No. 2502. माघमाहात्म्यम्.

### MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 22. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 12*a*. The other works herein are Siddharūpa 1*a*, Yājñavalkyasmṛti 4*a*.

Adhyāyas 3 and 4, complete; 5th, incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2503. माघमाहात्म्यम्.

## MĀGHAMĀHĀTMYAM.

Substance, palm-leaf. Size, 14 × 1⅜ inches. Pages, 280. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 1 to 30

This is a portion of the Vāyu-Purāṇa, and treats of the sanctity of the month of Māgha.

**Beginning :**

श्रीनारदः—

संसारे क्लिश्यमानानां जन्तूनां पापकर्मणाम् ।
कर्मणा भ्राम्यमाणानां का गतिः कमलोद्भव ॥

सुखमिच्छन्ति ते मूढा नेच्छन्ति सुखकारणम् ।
नेच्छन्ति दुःखलेशं वा तद्धेतौ सततं यताः ॥

* * * *

कार्त्तिकं सर्वमासेभ्यः सहस्रफलदं विदुः ।
तस्माल्लक्षगुणो माघ इति प्राह जनार्दनः ॥

न माघस्नानात् परमोऽस्ति धर्मः
संसारदुःखं विनिवर्तते कलौ ।
यथा कलौ विष्णुकथा परा गतिः
तथैव स्नानं मकरे दिवाकरे ॥

पापानि विलयं यान्ति तमांसीव भगोदये ।
समागच्छन्ति पुण्यानि यथा गुरुकृपोदये ॥

जन्मकोटिसहस्रेषु यत्पापं समुपार्जितम् ।
तत्पापं सकलं घोरं माघस्नानेन नश्यति ॥

* * * *

इति श्रीवायुपुराणे माघमाहात्म्ये प्रथमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

किमत्र बहुनोक्तेन मोक्षार्थी मोक्षमाप्नुयात् ।
इति श्रुत्वा शौनकाद्या माघमाहात्म्यमुत्तमम् ॥
सन्तोषमतुलं प्रापुः विस्मयोत्फुल्ललोचनाः ।
सूतं पौराणिकं ते तु पूजयामासुरञ्जसा ॥

**Colophon:**

इति श्रीवायुपुराणे माघमाहात्म्ये त्रिंशोऽध्यायः ॥
समाप्तं माघमाहात्म्यम् ॥

---

No. **2504.** मालतीवनमाहात्म्यम्.

MĀLATĪVANAMĀHĀTMYAM.

Substance, paper. Size, 8¼ × 6¾ inches. Pages, 83. Lines, 15 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 60 to 67, complete; 68th, incomplete in the Mārkaṇḍēyasaṁhitā.

This is a portion of the Bhaviṣyōttara-Purāṇa, and treats of the sanctity of the Mālatīvana (or Mālatīpura) and of the Śaiva shrine therein.

**Beginning:**

पावने नैमिशारण्ये शौनकाद्या मुनीश्वराः ।
द्वादशाब्दक्रतुं चक्रुर्लोकपावनरूपिणः ॥
तत्राजग्मुर्महात्मान ऋषयोऽन्ये नृपा द्विजाः ।
वेदशास्त्रार्थनिपुणाः सर्वधर्मविशारदाः ॥
द्रष्टुं क्रतुप(व)रं दिव्यं महापातकनाशनम् ।
सर्वमङ्गळदं नृणां चतुर्वर्गप्रदायकम् ॥
तथैव सूतो धर्मज्ञः पुराणार्थविचक्षणः ।
रुद्राक्षाभरणोपेतः भूत्यलङ्कृतविग्रहः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदेपदे शम्भुपदारविन्दं स्मरन् समस्ताघहरं सुमङ्गळम् ।
सर्वत्र पश्यत्(न्)भुवि शङ्करं सदा समागतो व्यासकृपाभिपूर्णः ॥
तमागतं पुराणज्ञं सर्वसंशयभेदकम् ।
सुवाक्यैः पूजयामासुश्शौनकाद्या ऋषीश्वराः ॥
योग्योपचारं कृत्वा ते दत्वा व्यासासनं परम् ।
शौनकं पुरतः कृत्वा कुलाचार्यमुनीश्वरम् ॥
पप्रच्छुरादरात्सर्वे शिवतत्त्वं परं शिवम् ।

* * * *

श्रुतं तत्वो(त्वत्तो) विशेषेण मालतीशस्य वै प्रभोः ।
मालतीपुरनाथस्य माहात्म्यं सदृशं भुवि ॥
द्रष्टुं(दृष्टं) श्रुतं नैव मया तत्क्षेत्रं सर्वमङ्गळम् ।
तद्वदस्व महाभाग मालतीपुरवैभवम् ॥

* * * *

**Colophon:**

इति श्रीमद्भविष्योत्तरपुराणे शिवक्षेत्रवैभवखण्डे मार्कण्डेयसंहितायां मध्यम[हा]भागे सूतशौनकसंवादे मालतीपुराणमाहात्म्ये षष्टितमोऽध्यायः ॥

* * * *

इति श्रीमद्भविष्योत्तरपुराणे मालतीवनमाहात्म्ये शिवरात्रिमहिमनिरूपणं नाम सप्तषष्टितमोऽध्यायः ॥

सूतः—

शिवधर्मन्तु यः कुर्यान्मालतीशस्य सन्निधौ ।
सर्वपापविशुद्धात्मा कैलासे मोददे(ते) चिरम् ॥
शिवधर्मं कर्तुकामो याचितुं यस्तु गच्छति ।
ग्रहाद्बहिस्त्वेकपदं यज्ञायुतफलं लभेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

मालतीक्षेत्रवेश्याया गृहं गत्वा द्विजाधमः ।
दत्वा वित्तानि बहुशः तस्यास्संगमतत्परः ॥

सदा तस्याः पृष्ठभागमनुसृत्य च गच्छति ।
वीथिकायामाम(ल)ये वा सभायां वापि शौनक ॥

तसर्वेत(सर्वतस्त)स्या वेश्यायाः पृष्ठभागसमाश्रितः ।
गच्छति स कदा चित् सा शिवागारं ययौ द्विजः ॥

---

No. **2505.** मौक्तिकोपाख्यानम्.

MAUKTIKŌPĀKHYĀNAM.

Substance, palm-leaf (Śrītāla). Size, $18\frac{3}{8} \times 2\frac{3}{8}$ inches. Pages, 16. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Śrīraṅgamāhātmaya 9*a*, Vēṅkaṭagirimāhātmya 17*a*, Hastigirimāhātmya 24*a*, Yādavagirimāhātmya 38*a*.

Adhyāyas 1 to 10 in the Brahmāṇḍa-Purāṇa, giving an account of the caste of persons who deal in pearls. They are here called Āryakṣattriyas.

The contents of the various chapters are:

१, २, ३, जानुमण्डलवरप्रसादनम्, ४, ५, ६, ७, चित्रकशापविमोचनम्, ८. मुक्तऋषिपुत्रीविवाहकथनम्, ९. मौ(क्तिक)पुत्रशापसंभवः, १०. मौक्तिकवंशविस्तारकथनम् ॥

**Beginning:**

हे ब्रह्मन् श्रोतुमिच्छामि कारणं जगतां यतः ।
यस्मादुत्पद्यते लोके तस्माद्वै वैदिकाः क्रियाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्राह्मणादिषु वर्णेषु क्रियाभेदं(दः) कथं भवेत् ।
एतद्धितमहं ज्ञातुमिच्छामि कमलासन ॥

* * * *

इदानीं श्रोतुमिच्छामि मौक्तिकानां कुलोद्भवम् ।
चातुर्वर्ण्येषु वा नो चेत्कथमष्टादशेषु वा ॥
तद्भेदं श्रोतुमिच्छामि वक्तुमर्हसि मे प्रभो ।

ब्रह्मोवाच—

एवं वदन्तं मौनीन्द्रं नारदं लोकविश्रुतम् ।
शृणु नारद वक्ष्यामि मौक्तिकानां कुलोद्भवम् ॥
महादेवमनोद्भूतं कुलं मौक्तिकनामकम् ।
वेदोक्तनामसंयुक्तमार्यक्षत्रियनामकम् ॥

**End:**

उपकारं प्रकुर्वन्ति त्रिमूर्तीनां महौजसः ।
तान्पुत्रान्प्रतिशिक्षन्ति चित्रकर्माणि सर्वदा ॥
स्वर्णरञ्जकविद्यासु ते केचन विचक्षणाः ।
चित्रलेखनविद्यायां प्रवीणाः केचन स्मृताः ॥
इति पुत्रान्विशेषेण सर्वकर्मसु निश्चिताः ।
इति तान् बोधयित्वाथ ऋषिपुत्रान्प्रवर्तते ॥

* * * *

युगपर्यायरूपेण वर्तन्ते पृथिवीपते ।
तेषाङ्कुले महाप्राज्ञ आर्यक्षात्रियनामकः ।

**Colophon:**

इति श्रीब्रह्माण्डपुराणे वर्णवैभवखण्डे ब्रह्मनारदसंवादे मौक्तिकोपाख्याने मौक्तिकवंशविस्तारकथनं नाम दशमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2506. यादवगिरिमाहात्म्यम्.

## YĀDAVAGIRIMĀHĀTMYAM.

Pages, 35. Lines, 15 on a page.

Begins on fol. 38*a* of the MS. described under No. 1505.

Adhyāyas 1 to 12, complete.

A portion of the Nārada-Purāṇā treating of the sanctity and the greatness of Yādavagiri, a hill in the Mysore territories, now known as Mēlkōṭe, and of the shrine dedicated to Viṣṇu thereon.

**Beginning:**

एकदा मुनयस्सर्वेऽप्येकान्तेन व्यवस्थिताः ।
प्रापुर्नारायणन्देवं नरनारायणाश्रमे ॥

* * * *

कलिरद्य महीं सर्वामाक्रम्य खलु वर्तते ।
अतस्तद्दोषनिर्मुक्तस्थानं त्वं वक्तुमर्हसि ॥

* * * *

अस्ति दक्षिणदेशीयः कश्चिदास्तिकसंश्रयः ।
नारायणगिरिर्नाम संसारार्णवतारणः ॥

सह्याद्रेस्स गिरिः पूर्वं सह्यजायास्तथोत्तरः ।
दूरादालक्ष्यते शृङ्गैर्दुःखसागरसेतुभिः ॥

* * * *

अत्रोपदेष्टृरूपेण वर्ते बदरिकाश्रमे ।
उपदेष्टव्यरूपेण वर्ते तत्र महीधरे ॥

* * * *

दक्षिणोत्तरभेदेन द्वावेतौ हि ममाश्रमौ ।
सत्त्वोत्तराणां भूयस्त्वं स तु सर्वोत्तरो गिरिः ॥

गुणत्रितयभेदेन प्रकृतिर्भिद्यते नृणाम् ।
नारायणाद्रिनिष्ठानां न रजोऽस्ति कुतस्तमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीरङ्गे वृषभाद्रौ च क्षेत्रे सत्यव्रते मम ।
विष्णुलोके च या प्रीतिः सा प्रीतिस्तत्र जायते ॥

तत्र शेषश्च तनुते शेषवृत्तिं युगे युगे ।
अशेषशेषिणो मह्यं शेषाशनमुखैस्सह ॥

अनन्तः प्रथमं रूपं लक्ष्मणस्तु ततः परम् ।
बलभद्रस्तृतीयश्च कलौ कश्चिद्भविष्यति ॥

**End:**

यादवाचलमाहात्म्यं यस्य गेहेऽपि वर्तते ।
आयुरारोग्यमैश्वर्यं सर्वं सम्पत्स्यते नरैः ॥

**Colophon:**

इति श्रीनारदीयपुराणे ज्ञानकाण्डे श्रीमद्यादवगिरिमाहात्म्ये वीरध्वजोपाख्यानं नाम द्वादशोऽध्यायः ॥

यादवाचलमहात्म्यं संपूर्णम् ॥

The contents of the chapters are :—

१, २. विश्वसृष्ट्यादिकथनम्; ३. भगवदाविर्भावः; ४. भगवदागमनम्; ५. सुचरितोपाख्यानम्; ६. भगवदंशागमनम्; ७. हरितोपाख्यानम्; ८. चतुर्वेदिमोक्षप्रदः; ९. शाण्डिल्यपराशरसंवादः; १०. विष्णुचित्तोपाख्यानम्; ११. रोमशोपाख्यानम्; १२. वीरध्वजोपाख्यानम् ॥

---

## No. 2507. यादवगिरिमाहात्म्यम्.

## YĀDAVAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, $21\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 155. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 12 Adhyāyas.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2508. यादवगिरिमाहात्म्यम्.

## YĀDAVAGIRIMĀHĀTMYAM.

Pages, 79. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No 2191.

Complete.

Same work as the above.

The MS. is dated thus :

श्रीमत्कीलकवत्सरे नभसि तत्पक्षे च तद्वासरे
चात्रेयान्वयतिम्मळार्यशिशुना श्रीयादवाद्रिप्रभोः ।
पादाम्भोरुहयुग्मके मृदुकथासंफुल्लसू(क्त्या)र्पितं
माहात्म्यात्मकदामम(चा)र्पितमहो भाग्याय ह्याय मे ॥

---

## No. 2509. यादवगिरिमाहात्म्यम्.

## YĀDAVAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 16½ × 1⅜ nches. Pages, 164. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

With Kanarese notes.

Adhyāyas 3 to 9.

Same work as the above.

---

## No. 2510. यादवाचलप्रशंसा.

## YĀDAVĀCALAPRAŚAṀSĀ.

Substance, palm-leaf. Size, 16 × 1⅛ inches. Pages, 14. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 63*a*. The other works herein are : Rāmanavamīpūjāvidhi 1*a*, Sandhyāvandanavidhi 3*a*, Acyutaśataka (Prākṛta) and (Saṁskṛta) 8*a*, Saptatiratnamālikā 21*a*, Taddhitabhāga

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



29*a*, Bhāratasāvitrī 33*a*, Varṣaphaṇicakra 45*a*, Arghakāṇḍa 77*a*, Vaiśvadēvaprayōga 83.

Adhyāyas 1 to 3.

A portion of Kāśīmāhātmya; treats of the sanctity of the above-mentioned Yādavagiri.

**Beginning:**

पार्वत्युवाच—

न काशीसदृशं क्षेत्रं वैष्णवं जन्मपावनम् ।
इति श्रुतं त्वया कान्त तन्मे विस्तरतो वद ॥
न तेऽस्ति सदृशः कश्चित् विष्णुशास्त्रप्रवर्तकः ।
तद्दासस्तत्परो नित्यं तदीयाराधने रतः ॥
न तेऽस्त्यविदितं किञ्चित् त्रिषु लोकेषु सर्वशः ।
अतो निस्संशयं ब्रूहि काशी येनाधिका पुरी ॥
इति पृष्टस्तया देवश्शङ्करो लोकशङ्करः ।
प्रत्याह मुदितः प्रीत्या प्रीणयन्निव पार्वतीम् ॥

शङ्करः—

विष्णुक्षेत्राणि सर्वाणि रङ्गक्षेत्रमुखानि च ।
स्वांशेन वसतिं यत्र तन्वन्ति वरवर्णिनि ॥
तेन क्षेत्रमतिख्यातं काशीक्षेत्रं रसातले ।

पार्वती—

कानि पुण्यानि शस्तानि विष्णोरायतनानि च ॥
तन्मे ब्रूहि महाबाहो विस्तरेण कृपाकर ।
इत्युक्तः प्रियया प्रीत्या तद्वक्तुमुपचक्रमे ॥

* * * *

प्रयागं च महाक्षेत्रं समुद्रस्सरितां पतिः ।
निवसन्ति यतोऽशेन तेन वाराणसी वरा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूतः—

इत्यादिक्षेत्रमहिमाकर्णनाद्द(हृ)ष्टमानसा ।
पप्रच्छ विस्मयोत्फुल्लनयना सा शुभानना ॥

पार्वती—

स्वामिन् किञ्चिदिदा(ह) ख्यातं यादवाचलसंज्ञितम् ।
न वर्णितस्तन्महिमा तं पुनर्वक्तुमर्हसि ॥

शङ्करः—

साधु साधु महाभागे विष्णुभक्तगणाधिके ।
यादवाचलमाहात्म्यं श्रोतुमिच्छा तवाधुना ॥

* * * *

**Colophon :**

इति श्रीकाशीमाहात्म्ये पूर्वखण्डे ब्रह्मक्षेत्रप्रसङ्गे गौरीशङ्करसंवादे यादवाचलप्रसङ्गो नाम प्रथमोऽध्यायः ॥

**End :**

हरिरत्रैव वैकुण्ठसुखं यच्छति नान्यथा ।
अत्र मुक्तास्तु बहुशो निवसन्ति समन्ततः ॥

महाप्रळयकालेऽपि नाशो नास्याति(स्ति) भामिनि ।
अतः क्षेत्रमिदं श्रेष्ठं षोडशेनांशकेन हि ॥

वाराण्यां(णस्यां)सन्निहितं तेन वाराणसी वरा ।
क्षेत्राण्यन्यानि भागेनाकू(पू)रयेने(दि)ति निश्चयम् ॥

**Colophon :**

इति काशीमाहात्म्ये पूर्वखण्डे ब्राह्मे क्षेत्रवैभवप्रशंसायां गौरीशङ्करसंवादे यादवाचलप्रशंसा नाम तृतीयोऽध्यायः ॥

कल्यब्दे दिव्यकुम्भे बुधजनवितते वत्सरे पिङ्गळाख्ये
चैत्रे मासे गतेषु द्वियि(यु)तदशदिनेष्वेधमाने हिमांशौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चम्यार्द्रासमेते सुरगुरुदिवसे कर्कटाख्ये च लग्ने
श्रीमान्रामानुजार्यस्समजनि निगमान्तार्थसंरक्षणार्थम् ॥

---

## No. 2511. रुक्माङ्गदचरित्रम्.

## RUKMĀṄGADACARITRAM.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 138. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first leaf is broken at the right end.

Adhyāyas 1 to 43 complete ; 44th incomplete.

A portion of the Nāradīyapurāṇa (Upapurāṇa) : gives the story of Rukmāṅgada in illustration of the sanctity of the Vaiṣṇava fast, the Ekādaśīvrata.

A work of this name is described on page 1209 of the India Office Library Catalogue.

**Beginning :**

शुक्लाम्बरधरं विष्णुं . . शान्तये ॥

मान्धा(तो वाच)—

(पापेन्धनस्य घोरस्य शुष्क)स्यार्द्रस्य भूरिशः ।
को वह्निर्दहने शक्तः तं च त्वं वक्तुमर्हसि ॥
नाज्ञातं त्रिषु लोकेषु चतुर्मुख मुखो(द्भव) ।
(विद्यते तव विप्रेन्द्र त्रिविधस्य सु)निश्चये ॥
अज्ञातं पातकं शुष्कं ज्ञातं चार्द्रमुदाहृतम् ।
एष्याद्रा(ष्यं चा)प्यथवातीतं वर्तमानं वदस्व मे ॥

* * * *

(सं)प्राप्य वासरं विष्णोः यो नरस्संयतेन्द्रियः ।
उपवासपरो भूत्वा पूजयेन्मधुसूदनम् ॥
(मान्धातर्दानसहितो रात्रौ जागरणा)न्वितम्(:) ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशोधि(ध)यति पापानि कितवस्य(स्तु)धनं यथा ॥
एकादशीसमुत्थेन वह्निना पातकेन्धनम् ।
* * * *
इति श्रीनारदीयपुराणे रुक्माङ्गदचरिते प्रथमोऽध्यायः ॥
वसिष्ठः—
इद(म)मेव पुरा प्रश्नं नैमिशारण्यवासिनः ।
पप्रच्छुर्मुनयः सूतं व्यासशिष्यं महामतिम् ॥
स तु पृष्टो महातेजा एकादश्यास्सविस्तरम् ।
माहात्म्यं कथयामास उपवासविनिश्चियम् ॥

---

No. 2512. रुक्माङ्गदचरित्रम्.
RUKMĀṄGADACARITRAM.

Pages, 48. Lines, 10 on a page.
Begins on fol. 1*a* of the MS. described under No. 1952.
Adhyāyas 3 to 44.
Same work as the above.

**End:**

देवं पूजयते शक्त्या शङ्खचक्रगदाधरम् ।
जागरं कुरुते रात्रौ पुराणश्रवणं तथा ॥
वाद्यगीतविनोदेन वेदश्येनै(घोषै)स्सुशोभनैः ।
वसिष्ठवचनाद्राजा तत्रैवं विष्णुतत्परः ॥
जगाम तत्परं ब्रह्म यत्र गत्वा न शोचति ।

**Colophon:**

इति श्रीनारदीये महापुराणे तृतीयस्कन्धे रुक्माङ्गदचरिते एकादशी-माहात्म्यं नाम चतुश्चत्वारिंशोऽध्यायः ॥

---

No. 2513. रुक्माङ्गदचरित्रम्.
RUKMĀṄGADACARITRAM.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 112. Lines, 9 on a page. Character, Grantha. Condition, much injured Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



In the beginning 11 leaves are lost; the last leaf is broken.

Begins with the colophon of 9th Adhyāya and contains Ahdyāyas 10 to 44.

The MS. is dated thus:

तारणाब्दे माघमासे प्रथमायां सिते तथा ।
भानुवारे शतभिषङ्नक्षत्रे वा . . न लिख्यते ॥
कौशिकगो(त्र)संभूत श्रीनिवासस्य पुस्तकम् ॥

No. 2514. ललितोपाख्यानम्.

LALITŌPĀKHYĀNAM.

Substance, paper. Size, 10⅞ × 8⅜ inches. Pages, 576. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 33.

A portion of the Brahmōttarakhaṇḍa. Notes in English and Latin are found interlined. This work treats of the greatness of Dēvī under the name of Lalitā, describes how she destroyed Bhaṇḍāsura, and concludes with the marriage of Dēvī Lalitā with Śiva.

**Beginning:**

पाशपाणि सृणिपाणि भावये
चापपाणि शरपाणि दैवतम् ।
यत्प्रभापटलपाटलं जगत्
पद्मरागमणिमण्टपायते ॥

अस्तु नः श्रेयसे नित्यं वस्तु वामाङ्गसुन्दरम् ।
यतस्तृतीयं विदुषां तुरीयं त्रैपुरं महः ॥

अगस्त्यो नाम देवर्षिर्वेदवेदाङ्गपारगः ।
सर्वसिद्धान्तसारज्ञो ब्रह्मानन्दरसात्मकः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चचाराद्भुतहेतूनि तीर्थान्यायतनानि च ।
शैलारण्यापगामुख्यान् सर्वान् जनपदानपि ॥

तेषु तेष्वखिलान् जन्तून् अज्ञानतिमिरावृतान् ।
शिश्नोदरपरान् दृष्ट्वा चिन्तयामास तान्प्रति ॥

तस्य चिन्तयमानस्य चरतो वसुधामिमाम् ।
प्राप्तमासीन्महापुण्यं काश्चीनगरमद्भुतम् ॥

तत्र वारणशैलेन्द्रमेकाम्रनिलयं शिवम् ।
कामाक्षीं कलिदोषघ्नीमपूजयदथात्मवान् ॥

लोकहेतोर्दयार्द्रस्य चिन्तयानस्य धीमतः ।
चिरकालेन तपसा तोषितोऽभूज्जनार्दनः ॥

**Colophon:**

इति श्रीब्रह्मोत्तरखण्डे हयग्रीवागस्त्यसंवादे श्रीललितोपाख्याने प्रथमोऽध्यायः ॥

**End:**

एतान्स्त्रि(तांस्त्रि)कोणान्तरेण परितो हृदि विन्यसेत् ।
नित्या तु षोडशी साक्षात् महात्रिपुरसुन्दरीम् ॥

हृन्मध्ये विन्यसेद्देवीमखण्डजगदात्मिकाम् ।
चक्रेश्वरीं हृदि न्यस्य कृत्वा चक्रसमर्पणम् ॥

मुद्रां प्रदर्श्य योन्याख्यां सर्वानन्दमनुं न्यसेत् ।
इत्यात्मन्यस्तचक्रस्तु साक्षाद्देवी भविष्यति ॥

**Colophon:**

इति श्रीब्रह्मोत्तरखण्डे हयग्रीवागस्त्यसंवादे श्रीललितोपाख्याने न्यासविधिर्नाम त्रयस्त्रिंशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2515. ललितोपाख्यानम्.

## LALITŌPĀKHYĀNAM.

Substance, paper. Size, $10\frac{3}{4} \times 8\frac{3}{8}$ inches. Pages, 576. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 33, complete.

Same work as the above.

---

## No. 2516. ललितोपाख्यानम्.

## LALITŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 178. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 32; the 33rd is wanting.

Same work as the above.

A note in Tamil at the end gives the number of lines in a leaf to be 20, the number of Granthas in a line to be $1\frac{3}{4}$, and the total number of Granthas to be 1,550.

---

## No. 2517. ललितोपाख्यानम्.

## LALITŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 312. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, new.

Adhyāyas 1 to 32; 33rd is not found.

Same work as the above.

The scribe's name is here given as Vēṅkaṭaramaṇayya.

---

## No. 2518. ललितोपाख्यानम्.

## LALITŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 242. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Begins on fol. 1*a*. The other work herein is Vṛṣṭilakṣaṇa 134*a*; on fol. 133, Sītācakra is given.

Adhyāyas 4 to 32.

Same work as the above.

---

No. **2519**. विदुरप्रजागरः.

VIDURAPRAJĀGARAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 38. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Sandhyāvandanamantrārtha 20*a*, Kāvyalakṣaṇa 25*a*, Haristuti 28*a*.

Incomplete.

This consists of Adhyāyas 33 to 40 in the Udyōgaparvan of the Mahābhārata. It is also called Prajāgaraparvan. This MS. omits many stanzas in the beginning and the end of several Adhyāyas. This work contains the teaching of Dharma imparted by Vidura to Dhṛtarāṣṭra on the night of the arrival of Sañjaya from the Pāṇḍava camp, and the Parvan is so named as Dhṛtarāṣṭra could not then sleep through anxiety and fearful suspense.

**Beginning :**

अभियुक्तं बलवता दुर्बलं हि न साधनम् ।
हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः ॥
कच्चिदेतैर्महादोषैर्न स्पृष्टोऽसि नराधिप ।
कच्चिन्न परवित्तेषु गृध्नन्न परितप्यसे ॥

धृ(तराष्ट्र) :—

सञ्जयो विदुरप्राप्तो गर्हयित्वा च मां गतम् ।
अजातशत्रोः श्वो वाक्यं सभामध्ये स वक्ष्यति ॥
तस्यास्य पाण्डुपुत्रस्य न विज्ञातं वचो मया ।
दहन्मे सर्वगात्राणि तदकार्षीत्प्रजागरम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

ऋतं ब्रुवन् गुरवे कर्म कुर्वन् न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥
अधीत्य वेदान् परिसंस्तीर्य चाग्निमिष्ट्वा यज्ञैः पालयित्वा प्रजाश्च ।
गोब्राह्मणार्थे शस्त्रपूतान्तरात्मा हतस्संग्रामे क्षत्रियस्स्वर्गमेति ॥

---

No. **2520.** वीरमाहेश्वरक्रमः.

VĪRAMĀHĒŚVARAKRAMAḤ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 64. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 80 to 85 of the Śaṅkarasaṁhitā of the Skānda-Purāṇa.

This describes the manner of worship to be conducted by the Liṅgāyats, and the kind of life that is to be led by their ascetics. They are called Vīramāhēśvaras, and are enjoined to carry with them these things, namely, विभूति, घण्टा, भिक्षापात्र, दण्ड and कमण्डलु.

**Beginning:**

भगवन् श्रोतुमिच्छामो वीरमाहेश्वरक्रमम् ।
त्वमस्माकं महाभाग वक्तुमर्हसि सत्तम ॥

सूतः—

वक्ष्ये युष्माकमद्याहं शृणुध्वं श्रद्धयान्विताः ।
महेश्वरमुखोद्गीतं वीरमाहेश्वरक्रमम् ॥
पुरा कैलासशिखरे नानामुनिगणावृते ।
विद्याधरसमाकीर्णे देवगन्धर्वसेविते ॥

* * * *

पुरमस्ति महारम्यं रत्नतोरणमण्डितम् ।
उपकण्ठमहोद्यानवनमालाविभूषितम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रास्ति मन्दिरं दिव्यं चित्रभित्तिसमन्वितम् ।
नानारत्नौघखाचितं सहस्रस्थूल(ण)सम्मितम् ॥

* * * *

समासीनं महादेवं योगिध्यानैकगोचरम् ।
गिरिजाश्रितवामाङ्गं स्वात्मानन्दाम्बुधिस्थितम् ॥
सुरसीमन्तिनीहस्तपर्यस्तसितचामरम् ।

* * * *

ज्ञानशास्त्रमुनीन्द्राणां व्याकुर्वन्तं सुनिर्मलम् ॥
भक्त्या प्रणम्य देवेशं पप्रच्छ शिखिवाहनः ।
सर्वलोकोपकारार्थं भगवन्तं त्रिलोचनम् ॥

स्कन्दः—

भगवन् श्रोतुमिच्छामि सर्वप्राणिहितं परम् ।
केचिल्लिङ्गार्चनं पीठे प्रशस्तन्तु प्रचक्षते ॥
केचिच्छैवागमाभिज्ञाः प्राणलिङ्गार्चनापराः ।
लिङ्गे प्राणं समाधाय करपीठे शिवार्चनम् ॥
प्रशंसन्त्युत्तमं देवं ब्रूहि किं मुख्यमेतयोः ।
संशयं मे महत्तत्त्वं छेत्तुमर्हसि शङ्कर ॥

शङ्कर उवाच—

साधु पृष्टं त्वया वत्स वक्ष्याम्येतद्विशेषतः ।
वेदागमपुराणेषु सारं गोप्यं मनोहरम् ॥

* * * *

इति श्रीमत्स्कान्दे महापुराणे शङ्करसंहितायां वीरमाहेश्वरप्रसङ्गो नामाशीतितमोऽध्यायः ॥

**End:**

य इमं श्रु(शृ)णुयान्नित्यमध्यायं शिवभक्तिमान् ।
शिवलिङ्गार्चनाकाले स सम्यक् ज्ञानवान् भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीस्कान्दे महापुराणे शङ्करसंहितायाम् उप(रि)भागे महेश्वरस्य लौकिकचर्यो(र्या) नाम पञ्चाशीतितमोऽध्यायः ॥

The MS. is dated Friday, the 14th Vaiśakha-Bahula in the year Pramādin. Copied by Dulla Paṭṭābhirāma for Gōvindanāyaka.

---

## No. 2521. वीरमाहेश्वरक्रमः.

## VĪRAMĀHĒŚVARAKRAMAḤ.

Substance, palm-leaf. Size, 13¼ × 1⅝ inches. Pages, 72. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same work as the above.

The MS. is dated: Friday, the 3rd of Āṣāḍhā-Śuddha. Copied by Caṅgaṭṭi Gaurayya.

---

## No. 2522. वेङ्कटगिरिमाहात्म्यम्.

## VĒṄKAṬAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 397. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Vēṅkaṭēśasahasranāmastōtra 183*b*.

This MS. contains descriptions relating to the greatness and sanctity of the Tirupati hills and of the shrines thereon: the work is said to be made up of extracts from the following Purāṇas:—

Mārkaṇḍēya-Purāṇa, Adhyāyas 1 to 5.
Harivaṁśa, Adhyāya 1 (47th).
Brāhma-Purāṇa, Adhyāyas 1 to 10.
Brahmāṇḍa-Purāṇa, Adhyāyas 1 to 10.
Vāmana-Purāṇa 20 to 44.
Varāha-Purāṇa 33 to 62 Adhyāyas.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Skānda-Purāṇa 1 to 17 and 7 to 10 Adhyāyas.
Pādma-Purāṇa 24 to 34 Adhyāyas.
Gāruḍa-Purāṇa, Adhyāya 63.
Brahmōttara-khaṇḍa, Adhyāyas 50 and 51.
Bhaviṣyat-Purāṇa, Adhyāya 80.
Skānda-Purāṇa 37, 1 and 2.
Varāha-Purāṇa 1 to 10.

The copying of the MS. is said to have been completed on the 5th of Kārtika-Śuddha in the year Pramōdūta.

ऋषय ऊचुः—

सूत सर्वार्थतत्त्वज्ञ वेदवेदान्तपारग ।
वेङ्कटाचलमाहात्म्यं वदस्व मुनिपुङ्गव ॥

श्रीसूतः—

पुरा मृकण्डुतनयः पुरुषोत्तमसेवया ।
दीर्घमायुरवाप्याथ मुदा परमया मुनिः ॥
स्वमाश्रमपदं गत्वा तपस्विजनसंन्निधौ ।
मातुः पितुस्स मतिमान् प्रणाममकरोत् भुवि ॥
अतस्ताभ्यां यथावृत्तमाख्याय मुनिपुङ्गवः ।
श्रेयस्करं किञ्चिदिच्छन् कर्तुं वै वाक्यमब्रवीत् ॥
मातः पितर्ममेष्टं यच्छ्रु(च्छृ)णुतं ब्रुवतो मम ।
देवतानुग्रहार्थाय परिपूर्णमभूत्किल ॥
पुण्यस्थलेषु तीर्थेषु चरितुं विद्यते मतिः ।

* * * *

पुण्यदेशो वेङ्कटाद्रेस्तुल्यो नैव महीतले ।
स्वामिपुष्करिणीतीर्थतुल्यं भुवि न विद्यते ॥
इत्युक्त्वा गरुडस्तत्र वेङ्कटाचलमागतः ।
स मुनिर्गारुडागिरा विस्मयाविष्टमानसः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो श्रुतमहो पुण्यस्थलं तीर्थं गरुत्मता ।
उक्त्वा तदद्रिसेवायामभवच्चाभिलाषवान् ॥

इति मार्कण्डेयपुराणे गरुडमार्कण्डेयसंवादे श्रीवेङ्कटाचलमाहात्म्ये प्रथमोऽध्यायः ॥

**End :**

वेङ्कटाद्रेस्तु माहात्म्यं कुमारसरसस्तदा ।
शृणोति वा पठति वा तस्य पुण्यमनन्तकम् ॥

कुमारधारिकातीर्थे तीरे पठति यस्त्विदम् ।
शृणोति वा तस्य तस्य सर्वाभीष्टप्रदो हरिः ॥

**Colophon :**

इति मार्कण्डेयपुराणे वेङ्कटाचलमाहात्म्ये पञ्चमोऽध्यायः ॥

(हरिवंशस्थवेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

युधिष्ठिरः—

वेदव्रत महाबुद्धे सुरसिन्धुसुत प्रभो ।
श्रीनिवासस्य माहात्म्यं वद नो वदतां वर ॥

वैकुण्ठवासी लोकेशो विष्णुस्सर्वगत(:)प्रभुः ।
कथं पाप्रोवि (प्राप्तो वृ)षगिरिं तन्मे त्वं कृपया वद ॥

**End :**

यानि क्षेत्राणि पुण्यानि तीर्थान्यायतनानि च ।
तानि सर्वाणि सेवन्ते श्रीनिवासं जगन्मयम् ॥

य इदं पुण्यमाख्यानं शृणोति श्रद्धया नरः ।
तेषां मुक्तिः करस्थैव गतानां किमु वैभवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इत्याश्चर्यपर्वाणि हरिवंशे शेषधर्मे वेङ्कटाचलमाहात्म्यं नाम सप्तचत्वारिंशोऽध्यायः ॥

(ब्रह्मपुराणस्थवेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

श्रीसूतः—

राजा (दु)र्वाससं प्राह दिलीपो गृहमागतम् ।
श्रुत्वा श्रीरङ्गमाहात्म्यं श्रीमुष्णस्य च वैभवम् ।
वेङ्कटाचलमाहात्म्यं वदस्वेति च सादरम् ।

* * * *

इति श्रीब्रह्मपुराणे वेङ्कटाचलमाहात्म्ये दीलीपदुर्वासस्संवादे प्रथमोऽध्यायः ॥

**End :**

वेङ्कटेशस्य माहात्म्यं यस्य गेहे प्रवर्तते ।
आयुरारोग्यमैश्वर्यमन्ते विष्णुपदं लभेत् ॥

श्रीसूतः—

इति श्रुत्वा दिलीपो वै वैभवं परमाद्भुतम् ।
आनन्दाम्बुधिसंमग्नो न वेद परमर्षिणा ॥

**Colophon :**

इति श्रीब्रह्मपुराणे वेङ्कटाचलमाहात्म्ये दशमोऽध्यायः ॥

(ब्रह्माण्डपुराणे तीर्थखण्डे श्रीवेङ्कटगिरिमाहात्म्यम्)—

**Beginning :**

अञ्जनाद्रिर्वृषाद्रिश्च शेषाद्रिर्गरुडाचलः ।
(नारायणाद्रिस्सिंहाद्रिः श्रीशैलो वेङ्कटाचलः) ॥
तीर्थाद्रिः श्रीनिवासाद्रिश्चिन्तामणिगिरिस्तथा ।
वृषभाद्रिर्वराहाद्रिर्ज्ञानाद्रिः कनकाचलः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनन्दाद्रिश्च नीलाद्रिस्सुमेरुश्शिखराचलः ।
वैकुण्ठाद्रिः पुष्कराद्रिः इति नामानि विंशतिः ॥
ब्राह्मण(:) क्षत्रियो वैश्यः शूद्रश्चेतरजातयः ।
तन्नामानि पठेन्नित्यं मुच्यते पापबन्धनात् ॥

ऋषयः—

कथितानि महाभाग पुण्यक्षेत्राण्यनेकशः ।
प्रशस्तानि च तीर्थानि तानि तानि महामते ॥

* * * *

इति ब्रह्माण्डपुराणे तीर्थखण्डे श्रीवेङ्कटाचलमाहात्म्ये भगवन्नारदसंवादे प्रथमोऽध्यायः ॥

**End :**

इत्येवं भृगवे तस्मै कथयामास नारदः ।
वेङ्कटाचलमाहात्म्यं परं व्यासेन कीर्तितम् ॥

भृगुरपि वृषभाचलप्रभावं
मुनिवरकथितं निशम्य भूयः ।
तदनु स च विलोकितुं रमेशं
स्थिरतरमस्य(नसा) ययौ गिरीन्द्रम् ॥

**Colophon :**

इति श्रीब्रह्माण्डपुराणे तीर्थखण्डे भृगुनारदसंवादे श्रीवेङ्कटगिरिमा(हात्म्ये) कृष्णशर्मवृत्तान्तकथनं नाम दशमोऽध्यायः ॥

(वामनपुराणस्थं वेङ्कटगिरिमाहात्म्यम्)—

**Beginning :**

श्रीसूतः—

यच्छरीरन्त्रयो वेदा यश्चेष्टाथर्वणस्स्मृताः ।
यदङ्गानि षडङ्गानि तस्मै वागात्मने नमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यासः—

कदाचिद्दुःखितः प्राह जनको मिथिलाधिपः ।
शतानन्दं महाभागं सर्वज्ञं तत्त्वदर्शिनम् ॥

* * * *

इति श्रीवामनपुराणे क्षेत्रखण्डे श्रीवेङ्कटगिरिमहात्म्ये प्रयागमाहात्म्यं नाम विंशोऽध्यायः ॥

**End :**

एतच्छ्रुत्वाथ जनकश्शतानन्दोदितन्तदा ।
प्रहर्षमतुलं लब्ध्वा मन्त्रिभिस्सहितो नृपः ॥
गत्वा वृषाचलं शीघ्रं स्वामिपुष्करिणीजले ।
स्नात्वा द्रष्टा च देवेशं श्रीभूमिसहितं ततः ॥
तत्र स्थित्वा चिरङ्कालं सर्वान्कामानवाप्य च ।
आगत्य मिथिलां राजा शशास पृथिवीमिमाम् ॥

**Colophon :**

इति श्रीमद्वामनपुराणे श्रीवेङ्कटाचलमाहात्म्ये चतुश्चत्वारिंशोऽध्यायः ॥

(वराहपुराणस्थवेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

श्रीमते भूवराहाय नमः कृत्स्ना वसुन्धरा ।
उद्धृता येन पाताळाद्वासार्थं सर्वदेहिनाम् ॥

* * * *

पुण्यं पवित्रमायुष्यं सर्वमङ्गळकारकम् ।
वाराहकल्पवृत्तान्तं शेषाचलसमाश्रयम् ॥

* * * *

इति श्रीवराहपुराणे वेङ्कटाचलमाहात्म्ये त्रयस्त्रिंशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

वेङ्कटाचलमाहात्म्यं कल्पकोटिशतैरपि ।
वक्तुं न शक्यं साहस्रैश्शेषाणाश्च सहस्रकैः ॥
उक्तं तथापि माहात्म्यं कीर्तितं किञ्चिदेव हि ।
पुण्यं पवित्रमायुष्यं माहात्म्यमिदमुत्तमम् ॥
यः पठेत्प्रयतो भक्त्या श्रु(शृ)णुयाद्वा लिखेदपि ।
सर्वान्कामानवाप्नोति संप्राप्नोति च मङ्गळम् ॥

**Colophon :**

इति श्रीवराहपुराणे श्रीवेङ्कटाचलमाहात्म्ये द्विषष्टितमोऽध्यायः ॥
श्रीवराहपुराणे वेङ्कटाचलमाहात्म्यं संपूर्णम् ॥

(स्कान्दपुराणस्थवेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

श्रीसूतः—

अथातस्संप्रवक्ष्यामि स्वामिपुष्करिणीं शुभाम् ।
लक्षीकृत्य कथामेकां पवित्रां द्विजसत्तमाः ॥
काश्यपाख्यो द्विजः पूर्वमस्मिन् तीर्थवरे शुभे ।
स्नात्वातिमहतः पापाद्विमुक्तो नरकःपु(प्र)दात् ॥

ऋषयः—

मुने काश्यपनामासौ अकरोत्किं हि पातकम् ।
स्नात्वा तीर्थवरेऽप्यत्र यस्मान्मुक्तोऽभवत्क्षणात् ॥
एतन्नः श्रद्धधानानां ब्रूहि सूत कृपाबलात् ।
त्वद्वचोऽमृततृप्तानां न पिपासा विपद्यते ॥

श्रीसूतः—

कुमारपुष्करिण्याश्च माहात्म्यप्रतिपादकम् ।
इतिहासं प्रवक्ष्यामि पठतां पापनाशनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति स्कन्दपुराणे श्रीवेङ्कटाचलमाहात्म्ये काश्यपदोषनिवृत्तिर्नाम प्रथमोऽध्यायः ॥

**End :**

वेङ्कटाद्रेस्तु माहात्म्यं श्रुत्वा ते ऋषयस्ततः ।
व्यासप्रसादसंपन्नं सूतं पौराणिकोत्तमम् ॥
पूजयित्वा यथान्यायं प्रहर्षमतुलङ्गताः ।

**Colophon :**

इति श्रीस्कान्दपुराणे वेङ्कटाचलमाहात्म्ये सप्तदशोऽध्यायः ॥

स्कन्दपुराणं समाप्तम् ॥

(अपरं स्कान्दपुराणस्थं वेङ्कटाचलमाहात्म्यम्—)

**Beginning :**

भरद्वाजः—

सुवर्णमुखरी तत्र सङ्गता मङ्गलप्रदा ।
कल्या नाम नदी पुण्या कालिन्दी जाह्नवीमिव ॥
वृषभाचलसम्भूता तीर्थराजविराजिता ।
नदीनामुत्तमा कल्या कलुषौघविनाशिनी ॥

* * * *

योजनोत्सेधसहितो विख्यातो वेङ्कटाचलः ।
सर्वेषामिव तीर्थनां रत्नानामिव संश्रयः ॥
अञ्जनानन्तवृषभनीलकेसरिपोत्रिणः ।
एतान्युपपदान्यद्रेः स्युर्नारायणवेङ्कटौ ॥

* * * *

इति श्रीस्कान्दे पुराणे श्रीवेङ्कटाचलमाहात्म्यकथनं नाम सप्तमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

वेङ्कटाचलमाहात्म्यं सङ्क्षिप्य कथितं तव ।
अतः परं महानद्याः प्रभावः कथ्यतेऽर्जुन ॥

**Colophon :**

इति श्रीस्कन्दपुराणे सुवर्णमुखरीमाहात्म्ये वेङ्कटगिरिप्रशंसायामगस्त्य-शङ्काविर्भावो नाम दशमोऽध्यायः ॥

(पाद्मपुराणस्थं वेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

देवलः—

देवदर्शन देवर्षे ब्रह्मभूयकरं परम् ।
मुकुन्दानन्दकं ब्रूहि धर्मं कर्मविमोचनम् ॥

देवदर्शनः—

साधु देवल भूदेव यत्पृष्टोऽहमिह त्वया ।
शृणु विद्वन् विशेषेण वक्ष्यामि तव सुव्रत ॥

* * * *

इति श्रीपाद्मे पुराणे श्रीवेङ्कटगिरिमाहात्म्ये देवलदेवदर्शनसंवादे शुकस्य पद्मसरःप्राप्तिर्नाम चतुर्विंशोऽध्यायः ॥

**End :**

श्रीवेङ्कटाद्रिमाहात्म्यं श्रुत्वा पद्मसरो वरम् ।
प्राप्य कृत्वा सर(तप)स्तीव्रं सरोऽम्बुजद्रकैः कृती ॥

* * * *

देवलः—

देवदर्शन सर्वज्ञ कृतार्थोऽस्मि नमोऽस्तु ते ।
नास्ति श्रोतव्यमेतस्मात् संशयो विगतो मम ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीपाद्मे पुराणे क्षेत्रकाण्डे श्रीवेङ्कटगिरिमाहात्म्ये देवलदेव-दर्शनसंवादे पद्मसरोमाहात्म्यकथनं नाम चतुस्त्रिंशोऽध्यायः ॥

(गारुडपुराणस्थं वेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

अरुन्धती समस्तानामङ्गला(ना)नां पतिव्रता ।
पतिं स्वं पलि(रि)पप्र(प्र)च्छ लोकानां हितकाम्यया ॥

अरुन्धती—

ब्रह्मात्मज नमस्तुभ्यं विज्ञापनमिदं शृणु ।
पतिशुश्रूषणादन्यत् स्त्रीणां धर्मो न विद्यते ॥

* * * *

यथान्धे भर्तरि स्त्रीणां सौन्दर्यं सकलं वृथा ।
सावधानमना भूत्वा शृणु तस्माद्वचो मम ॥
सुवर्णमुखरीतीरे कश्चिदस्ति महीधरः ।
वेङ्कटाचलनामासौ सर्वभूभृत्कुलोत्तमः ॥

**End :**

य इदं पठति ध्यायं श्रु(यञ्छृ)णुयाद्वा समाहितः ।
घोणतीर्थस्नानफलं प्राप्नोति हि न संशयः ॥

**Colophon :**

इति श्रीगारुडपुराणे श्रीवेङ्कटगिरिमाहात्म्ये त्रिषष्टितमोऽध्यायः ॥

(ब्रह्मोत्तरखण्डस्थं वेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

ऋषयः—

सूत वेदार्थतत्त्वज्ञ वेदव्यासकृपानिधे ।
ब्रूहि नस्सर्वतीर्थेषु तीर्थं सर्वाघनाशनम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति पृष्टस्ततो ब्रह्मा विचार्य हृदये हरिम् ।
वेङ्कटेशं नमस्कृत्य वसिष्ठमिदमब्रवीत् ॥

काश्या दक्षिणदेशे वै कश्चिदस्ति महीधरः ॥
वेङ्कटाद्रिरिति ख्यातो विश्वलोकैकसम्मतः ॥ *

* * * *

इति श्रीब्रह्मोत्तरखण्डे श्रीवेङ्कटाचलमाहात्म्ये पञ्चाशोऽध्यायः ॥

**End :**

नारदेन सहैव त्वं पूतो मत्कीर्तनं कुरु ।
यत्र फाल्गुनपौर्णम्यां स्नानदानादि कुर्वते ॥

इह लोके परत्रापि तेषामिष्टं ददाम्यहम ।
इत्युक्ता(क्त्वा)स्तुम्बुरुमुखास्तुष्टा याता यथागतम् ॥

**Colophon :**

इति श्रीब्रह्मोत्तरखण्डे तीर्थमाहात्म्ये एकपञ्चाशोऽध्यायः ॥

(भविष्यत्पुराणस्थः वेङ्कटेश्वररहस्याध्यायः)—

**Beginning :**

सूत उवाच—

शृणुध्वं मुनयस्सर्वे शौनकाद्यास्तपोधनाः ।
तद्विष्णोर्वेङ्कटेशस्य रहस्यानुभवं परम् ॥

ब्रह्माण्डे यानि तीर्थानि स्वयंव्यक्तानि यानि च ।
चिरन्तनानि क्षेत्राणि पुण्यारण्यानि पर्वताः ॥

**End :**

यं यं (यां यां)कामयते सिद्धिं तं त(तां ता)माप्नोति स द्विजः ।
वेङ्कटाद्रौ परां प्रीतिं लभते सोऽपि भक्तिमान् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीभविष्यत्पुराणे श्रीवेङ्कटेश्वरानुभवरहस्यं नाम अशीतितमोऽध्यायः ॥

(स्कान्दपुराणस्थं वेङ्कटाचलमाहात्म्यम् )—

**Beginning :**

ऋषय ऊचुः—

सूत सर्वार्थतत्त्वज्ञ वेदवेदान्तपारग ।
अस्माकमेव ब्रूहि त्वं कृपया व्यासशासतः ॥
पुरा वै नारदः श्रीमान् ब्रह्मपुत्रो महानृषिः ।
दिष्ट्या वै नैमिशारण्यं संप्राप्तो द्विजसत्तमः ॥

* * * *

भारद्वाजस्य वाक्यं तच्छ्रुत्वा वै वेदसम्मितम् ।
शिरसा तं प्रणम्याथ ययौ वेङ्कटपर्वतम् ॥
तं गत्वा वेङ्कटं शैलं स्वामिपुष्करिणीजले ।
सुतेन साकं विप्रेन्द्रो(न्द्रः) सस्नौ नियमपूर्वकम् ॥

* * * *

इति स्कान्दपुराणे श्रीवेङ्कटाचलमाहात्म्ये सूतशौनकसंवादे कटाह्तीर्थप्रशंसा नाम सप्तत्रिंशोऽध्यायः ॥

श्रीसूतः—

पुत्रहीनाञ्जना पूर्वं दुःखिता तपसि स्थिता ।
तां दृष्ट्वा मुनिशार्दूलो मतङ्गो विष्णुतत्परः ॥
अञ्जनां तामुवाचेदं मतङ्गस्तपासि स्थिताः(म्) ।
समुत्तिष्ठाञ्जने देवी किमर्थं तपसि स्थिता ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति स्कन्दपुराणे श्रीवेङ्कटाचलमाहात्म्ये प्रथमोऽध्यायः ॥

श्रीसूतः—

अञ्जनापि वरं लब्ध्वा भर्त्रा साकं मुमोद ह ।
ब्रह्मादीनागतान् दृष्ट्वा विस्मयाविष्टमानसा ॥

**End :**

इत्येतत्कथितं पूर्वं व्यासेनैव महात्मना ।
शृणुयाद्वा पठेद्वापि कृतकृत्यो भविष्यति ॥
तस्यैव वंशजास्सर्वे मुक्तिं यान्ति न संशयः ।

**Colophon :**

इति श्रीस्कन्दपुराणे वेङ्कटाचलमाहात्म्ये मतङ्गाञ्जनासंवादे द्वितीयोऽध्यायः ॥

(अपरं वराहपुराणस्थं वेङ्कटाचलमाहात्म्यम्)—

**Beginning :**

ऋषय ऊचुः—

रोमहर्षण सर्वज्ञ पुराणार्थविशारद ।
माहात्म्यं श्रोतुमिच्छामो गिरीन्द्राणां महीतले ॥
ब्रूहि त्वं नो महाभाग के प्रधाना महीधराः ।

* * * *

क्रोशद्वयार्धमात्रे तु हरिचन्दनशोभिते ।
श्रीवेङ्कटाचलो नाम वासुदेवालयो महान् ॥

* * * *

इति श्रीमद्वराहपुराणे भूगोलोपाख्याने धरणीवराहसंवादे श्रीवेङ्कटाचलमाहात्म्ये प्रथमोऽध्यायः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

श्रीसूतः—

इत्युक्ता देवदेवेन सभविष्यं सहोत्तरम् ।
शृणुयाद्यः पठेद्भक्त्या कथा(थां) पुण्यां पुरातनीम् ॥
स तु भक्त्याखिलान् कामान् अन्ते विष्णुपदं व्रजेत् ।

**Colophon:**

इति श्रीमद्वराहपुराणे भूगोलोपाख्याने धरणीवराहसंवादे श्रीवेङ्कटाचलमाहात्म्ये भविष्यद्वर्णने तोण्डमान्चक्रवर्तिचरितं नाम दशमोऽध्यायः ॥

वेङ्कटाचलमाहात्म्यं संपूर्णम्. ग्रन्थः ९८१५ ॥

---

No. **2523.** वेङ्कटाचलमाहात्म्यम्.

VEṄKAṬĀCALAMĀHĀTMYAM.

**Substance**, palm-leaf. Size, 17⅛ × 1¼ inches. Pages, 386. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Vēṅkaṭēśasahasranāmastōtram 194*a*, Vaiṣṇavaguruparamparādhyāna 202*a*, Kaṭhavallyupaniṣad 205*a*.

This is a collection of extracts from the following Purāṇas, and treats of the greatness and holiness of the Viṣṇu shrine at Tirupati.

Skānda-Purāṇa, Adhyāyas 1 to 17; Adhyāyas 7 and 17 are wanting: the 17th is wrongly arranged.

Mārkaṇḍēya-Purāṇa, Adhyāyas 1 to 5.
Vāmana-Purāṇa, Adhyāyas 32 to 44.
Varāha-Purāṇa, Adhyāyas 1 to 10.
Brahmōttarakhaṇḍa, 51st Adhyāya.
Skānda-Purāṇa, Adhyāyas 1 and 2.
Gāruḍa-Purāṇa, 63rd Adhyāya.
Bhaviṣyat-Purāṇa, Adhyāyas 80.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Skānda-Purāṇa, 37th Adhyāya.
Harivaṁśa, 47th Adhyāya.
Brahma-Purāṇa, Adhyāyas 1 to 10.
Varāha-Purāṇa, Adhyāyas 33 to 62.

श्रीवचनभूषणसंयुक्तमुडुम्बश्रीमत्श्री(च्छ्री)वत्सगोत्रोद्भवस्य श्रीवीरराघवस्य कुमारस्य श्रीलक्ष्मीनारायणश्रीचरणारविन्दयोः प्रलीनस्य तिरुवेङ्कटदासस्य वेङ्कटाचार्यस्य इदं पुस्तकम् ॥

---

## No. 2524. वेङ्कटगिरिमाहात्म्यम्.

## VĒṄKAṬAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 94. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other works herein are Kumāratātagurumaṅgaḷāśāsana 48*a*, Śyāmaḷādaṇḍaka 50*a*, Kṛṣṇāṣṭōttaraśatanāma stōtram 55*a*, Rāmāyaṇa, Uttarakāṇḍa, Sargas 71 and 72, 58*a*.

This Māhātmya is extracted from the following Purāṇas :—
Brahmāṇḍa-Purāna, Adhyāyas 3 to 9.
Varāha-Purāṇa, Adhyāyas 1 to 11.
Mārkaṇḍēya-Purāṇa, Adhyāyas 1 to 5.
Brāhma-Purāṇa (breaks off in the 8th Adhyāya).

Deals with the same subject as the above work.

---

## No. 2525. वेङ्कटेश्वरस्थलमाहात्म्यम्.

## VĒṄKAṬĒŚVARASTHALAMĀHĀTMYAM.

Pages, 370. Lines, 19 on a page.

Begins on fol. 231*a* of the MS. described under No. 2491.

The Māhātmya is extracted from Mārkaṇḍēya-Purāṇa, Adhyāyas 1 to 5 ; Brahmāṇḍa-Purāṇa, Adhyāyas 1 to 10 ; Vāmana-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Purāṇa, Adhyāyas 34 to 44 ; Varāha-Purāṇa, Adhyāyas 33 to 49 (49th incomplete).

Same as the above.

---

## No. 2526. वेङ्कटेश्वरस्थलमाहात्म्यम्.

## VEṄKAṬĒŚVARASTHALAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17⅛ × 1⅜ inches. Pages, 218. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, new.

Extracted from the following Purāṇas :—

Vāmana-Purāṇa, Adhyāyas 12 to 25 (begins in the course of the 12th Adhyāya).

Varāha-Purāṇa, Adhyāyas 33 to 62.

Skānda-Purāṇa, Adhyāyas 7 to 10.

Pādma-Purāṇa, Adhyāyas 24 to 34.

Varāha-Purāṇa, Adhyāyas 1 to 5, (6th incomplete).

---

## No. 2527. वेङ्कटगिरिमाहात्म्यम् आन्ध्रटीकासहितम्.

## VEṄKAṬAGIRIMĀHĀTMYAM (WITH TELUGU ṬĪKĀ).

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Pages, 42. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, new.

This is the 34th Adhyāya in the Pādma-Purāṇa. A work similar in subject-matter to the above.

The MS. is dated 26th of Tai in the year Rudhirōdgāri.

---

## No. 2528. वेङ्कटगिरिमाहात्म्यम्.

## VEṄKAṬAGIRIMĀHĀTMYAM.

Pages, 70. Lines, 5 on a page.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Begins on fol. 45*a* of the **MS.** described under No. 2038.

The first 14 ślōkas are wanting. Breaks off in the 11th Adhyāya.

A portion of the Brahmāṇḍa-Purāṇa.

भृगुः—

जगदत्यक्कृतं सर्वं भगवन्नारद त्वया ।
तेन जानासि जगतां वृत्तान्तमखिलं मुने ॥
क्षेत्राणामधिकं क्षेत्रं तीर्थानां तीर्थमुत्तमम् ।
वद(रं) स्त्रि(त्रि)भुवि विप्रेन्द्र तन्मे ब्रूहि तपोधन ॥

* * * *

श्रीनारदः—

शृणुष्वैकमना ब्रह्मन्नात्त(न्मत्तः) कथयतो मुने ।
क्षेत्राणां क्षेत्रमुत्कृष्टं तीर्थानां तीर्थमुत्तमम् ॥
वेङ्कटेशगिरिर्नाम पुण्यक्षेत्रं महीतले ।
सर्वपापप्रशमनं सर्वपुण्यविवर्धनम् ॥
वक्तुं न तस्य माहात्म्यं ब्रह्मणापि सुरैरपि ।
शक्यते वा तथा स्मर्तुं मनसापि महामुने ॥

* * * *

**Colophon:**

इति ब्रह्माण्डपुराणे तीर्थकाण्डे श्रीवेङ्कटगिरिमाहात्म्ये भगवन्नारदसंवादो नाम प्रथमोऽध्यायः ॥

**End:**

इत्येवं भृगवे तस्मै कथयामास नारदः ।
वेङ्कटाचलमाहात्म्यं परं व्यासेन कीर्तितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भृगुरपि वृषभाचलप्रभावं
मुनिवरकथितं निशम्य भूयः ।
तदनु स च विलोकितुं रमेशं
स्थिरतरमनसा ययौ गिरीन्द्रम् ॥

इति श्रीब्रह्माण्डपुराणे भृगुनारदसंवादे तीर्थकाण्डे दशमोऽध्यायः ॥

---

No. **2529.** वेङ्कटगिरिमाहात्म्यम्.

VEṄKAṬAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 36. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 10.

Said to be a portion of the Brahmāṇḍa-Purāṇa. This is a different version though professing to be from the same Purāṇa.

**Beginning:**

ऋषय ऊचुः—

कथितानि महाभाग पुण्यक्षेत्राण्यनेकशः ।
प्रशस्तानि च . . . . ॥
तेभ्योऽधिकतमं पुण्यं क्षेत्रं पापविनाशनम् ।
यच्चास्ति तादृशं तीर्थं तन्नो ब्रूहि सुनिश्चितम् ॥
यस्मिन् वसति धर्मात्मा माधवो भक्तवत्सलः ।
विहरन्नुदितो नित्यं श्रिया भूम्या च नीलया ॥
यस्मिंश्च वसतिं प्राप्य दुष्कर्मभवसागरम् ।
सुखेन जन्तुस्तरति प्राप्तवित्तश्शुचं यथा ॥
विस्तरेण समाख्याहि परमस्मास्वनुग्रहात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

विहरन् रमया सार्धं ससारं तत्र भूधरे ।
वसिष्यति प्रहृष्टात्मा सुरसिद्धनिषेवितः ॥

श्रीसूतः—

इत्येवं भृगवे तस्मै कथयामास नारदः ।
वेङ्कटाचलमाहात्म्यं परं व्यासेन कीर्तितम् ॥

भृगुरपि वृषभाचलप्रभावं मुनिवरकथितं निशम्य भूयः ।
तदनु स च विलोकितुं रमेशं स्थिरतरमनसा ययौ गिरीन्द्रम् ॥

इति श्रीब्रह्माण्डपुराणे तीर्थकाण्डे भृगुनारदसंवादे वेङ्कटगिरिमाहात्म्ये कृष्णशर्मकथाकथनो(नं) नाम दशमोऽध्यायः ॥

---

## No. 2530. वेङ्कटगिरिमाहात्म्यम्.

## VĒṄKAṬAGIRIMĀHĀTMYAM.

**Pages**, 31. **Lines**, 7 on a page.

Begins on fol. 76*a* of the **MS.** described under No. 2369.

Adyāyas 1 to 10.

A portion of the Brahmāṇḍa-Purāṇa.

Same work as the above.

---

## No. 2531. वेङ्कटगिरिमाहात्म्यम्.

## VĒṄKAṬAGIRIMĀHĀTMYAM.

**Substance**, palm-leaf. **Size**, 16⅝ × 1⅜ inches. **Pages**, 32. **Lines**, 6 on a page. **Character**, Telugu. **Condition**, injured. **Appearance**, old.

Adhyāyas 1 to 10.

A portion of the Brāhma-Purāṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2532. वेङ्कटगिरिमाहात्म्यम्.

### VĒṄKAṬAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, $8\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 112. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Breaks off in the 19th Adhyāya.

A portion of the Vāmana-Purāṇa.

---

## No. 2533. वेङ्कटगिरिमाहात्म्यम्.

### VĒṄKAṬAGIRIMĀHĀTMYAM.

Pages, 156. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2473.

Adhyāyas 20 to 44.

A portion of the Vāmana-Purāṇa.

---

## No. 2534. वेङ्कटगिरिमाहात्म्यम्.

### VĒṄKAṬAGIRIMĀHĀTMYAM.

Substance, palm-leaf. Size, $17 \times 1\frac{1}{4}$ inches. Pages, 42. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 12th Adhyāya.

A portion of the Vāmana-Purāṇa.

**Beginning**:

सूत उवाच—

यच्छरीरं त्रयो वेदा यच्चेष्टाथर्वणस्स्मृतः ।
यदङ्गानि षडङ्गानि तस्मै वागात्मने नमः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यास उवाच—

कदाचिद्दुःखितः प्राह जनको मिथिलाधिपः ।
शतानन्दं महाभागं सर्वज्ञं तत्त्वदर्शिनम् ॥
ब्रह्मात्मन् बाधते दुःखं यत्सीतादर्शजं महत् ।
येन दुःखमिमं त्यक्ष्ये य आराध्योऽघनाशनः ॥
दुष्टात्मा रावणो रक्षःपतिर्वैश्रवणानुजः ।
हरेदयोनिजां सीतां किन्नु न ज्ञास्यते मया ॥
यमाराध्य महाभाग लप्स्ये जामातरं परम् ।

**End:**

जनकः—

कथं प्रोक्ता पुरा ब्रह्मन् स्वामिपुष्करिणी शुभा ।
गङ्गाद्यैस्सकलैस्तीर्थैः समेति हरिणा पुरा ॥
एतद्ब्रह्मन् महाभाग याथार्थ्येनाद्य शंस मे ।
एतच्छ्रोतुमिहेच्छामि त्वत्तोऽहं मुनिसत्तम ॥

शतानन्दः—

येन पृष्टस्तदा तेन जनकेन महात्मना ।
मुनिः प्राह नरेन्द्रं तं वक्ष्येऽहं श्रूयतामिति ॥

इति श्रीवामनपुराणे क्षेत्रकाण्डे श्रीवेङ्कटगिरिमाहात्म्ये स्वामिपुष्करिणीमाहात्म्यं नाम एकादशोऽध्यायः ॥

---

## No. 2535. वेङ्कटगिरिमाहात्म्यम्.
## VĒṄKAṬAGIRIMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, $18\frac{3}{8} \times 2$ inches. Pages, 62. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Hastigirimāhātmya 33*a*, Paścimaraṅgamāhātmya 93*a*, Candrapuṣkariṇīmāhātmya 100*b*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Āśvāsas 1 to 9, complete; 10th, incomplete.

Extracted from the Brahmāṇḍa-Purāṇa. The text in Sanskrit and commentary in Kanarese.

---

No. 2536. वेणुगीता.

VEṆUGĪTĀ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 322.

Complete.

This is the 35th Adhyāya of the 10th Skandha of the Bhāgavata. It describes Kṛṣṇa's skill in playing on the flute.

**Beginning:**

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ।
कृष्णलीलां प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥

गोप्यः—

वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुः ।
कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥
व्योमयानवनितास्सह सिद्धैः विस्मितास्तदुपधार्य सलज्जाः ।
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥
हन्त चित्रमबलाः श्रृणुतेदं हारहास[पुट] उरसि स्थितविद्युत् ।
नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥

**End:**

यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते ।
मुदितवक्त्र उपयाति दुरन्तं मोचयन्(न्त्र)जगवां दिनतापम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीशुकः—

एवं व्रजस्त्रियो राजन् कृष्णलीला नु गायतीः ।
रेमिरेऽहस्सु तप्तास्ताः तन्मनस्का महोदयाः ॥

**Colophon :**

इति श्रीभागवते दशमस्कन्धे पञ्चत्रिंशोऽध्यायः ॥

---

## No. 2537. वेदारण्यमाहात्म्यम्.

## VĒDĀRAṆYAMĀHĀTMYAM.

Pages, 100. Lines, 9 on a page.

Begins on fol. 214*a* of the MS. described under No. 2302.

This is a work treating of the holiness of Vēdāraṇya, a place near Muttupet in the Tanjore district of the Madras Presidency.

Extracted from the following Purāṇas: Skānda-Purāṇa 92 to 96 Adhyāyas, 214*a*. Brahmakaivarta 1 to 11 (11th incomplete), 226*a*.

**Beginning :**

ब्रह्मन् समस्तधर्मज्ञ सर्वलोकहिते रत ।
भवता कथितस्सम्यक् सर्वधर्मार्थसंग्रहः ॥

वेदारण्यस्य माहात्म्यं संग्रहेण कथान्तरे ।
ईरितश्च त्वया ब्रह्मन् कृपया परमार्थवत् ॥

तत्स्थानवैभवं त्वं हि वेत्सि नान्योऽस्ति भूतले ।
आदिसेतुः कथं वा स्यात् सर्वलोकैकपावनः ॥

तत्सर्वमद्य नो ब्रह्मन् कथयस्व कृपां वहन् ।

नारदः—

सम्यक् व्यवसिता बुद्धिः तव राजर्षिसत्तम ।
त्वं हि वेदविदां श्रेष्ठस्सर्वलोकहिते रतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वक्ष्ये लोकोपकारार्थं त्वद्व्याजेनैव मानद ।
इतः पूर्वं न कस्यापि प्रोक्तं स्थानस्य वैभवम् ॥
श्रीवेदारण्यमाहात्म्यं महापातकनाशनम् ।
मातृहा पितृहा चापि भ्रूणहा गुरुहापि च ॥
स्त्रीहन्ता विप्रहन्ता च महापापरता जनाः ।
श्रवणादेव मुच्यन्ते माहात्म्यस्य नरर्षभ ॥

* * * *

**Colophon :**

इति श्रीस्कान्दे सनत्कुमारसंहितायां क्षेत्रमाहात्म्यखण्डे उपरिभागे वेदारण्यमाहात्म्ये कोलाहलविमोक्षणं नाम द्विनवतितमोऽध्यायः ॥

* * * *

सूतः—

श्रुत्वैतन्नारदेनोक्तं वेदारण्यस्य वैभवम् ।
परां गतिमनुप्राप्तो मान्धाता राजसत्तमः ॥
भवतामिदमाख्यातं सर्ववेदान्तसङ्ग्रहम् ।
कृतार्थोऽहं भवद्भिश्च यूयं चैव तथा कृताः ॥

**Colophon :**

इति श्रीस्कान्दे सनत्कुमारसंहितायां क्षेत्रमाहात्म्यखण्डे उपरिभागे वेदारण्यमाहात्म्ये विश्वामित्रतपस्सिद्धिर्नाम षण्णवतितमोऽध्यायः ॥

(ब्रह्मकैवर्तपुराणस्थवेदारण्यमाहात्म्यम्)—

**Beginning :**

दीर्घसत्रे समासीना नैमिशारण्यवासिनः ।
पप्रच्छुर्मुदितास्सूतमृषयो रौमहर्षणिम् ॥

ऋषयः—

व्यासशिष्य महाप्राज्ञ पुराणार्थविशारद ।
त्वत्तः श्रुतानि तीर्थानि शिवस्थानान्यनेकशः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्माकमादरेणाद्य श्रोतॄणां विश्वपावनम् ।
वेदारण्यस्य माहात्म्यमिदानीं ब्रूहि सत्तम ॥

* * * *

**Colophon :**

इति महापुराणे ब्रह्मकैवर्तके वेदारण्यमाहात्म्ये प्रथमोऽध्यायः ॥

**End :**

दत्तमात्रे ततस्सोऽपि नरकान्निस्सृतोऽभवत् ॥
भ्रातरौ रथमास्थाय तावुभौ वैश्यसत्तमौ ।
स्वर्गलोकं समारूढौ रामकोटिप्रभावतः ॥
अहो कोटेस्तु माहात्म्यं मया वक्तुं न शक्यते ।
एतस्य वैभवं वक्तुं शङ्करो वेत्ति वा न वा ॥

**Colophon :**

इत्यादिमहापुराणे ब्रह्मकैवर्ते वेदारण्यमाहात्म्ये तीर्थप्रशंसायां दशमोऽध्यायः ॥

* * * *

सर्वाणि पापानि च पातकानि नश्यन्ति सद्यः पुनरत्र विप्राः ।
त्रयीवनाधीश्वरभक्तिशून्यो बन्धाय भूया.

---

## No. 2538. वैशाखमाहात्म्यम्.

## VAIŚĀKHAMĀHĀTMYAM.

Substance, palm-leaf. Size, 18¼ × 1⅓ inches. Pages, 74. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 24.

A portion of the Skānda-Purāṇa.

This describes the great value of the worship of Viṣṇu and of certain religious duties, such as, the offering of gifts, conducted during the month of Vaiśākha (May-June).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

भूयोऽप्यब्जभुवं राजा ब्रह्मणः परमेष्ठिनः ।
पुण्यं माधवमासस्य माहात्म्यं पर्यपृच्छत ॥

अम्बरीषः—

सर्वेषामपि मासानां त्वत्तो माहात्म्यमञ्जसा ।
श्रुतं मया पुरा ब्रह्मन् यथा चोक्तं तथा त्वया ॥
वैशाखस्य च माहात्म्यं [माधव]माहात्म्यं माधवस्य च ।
श्रोतुं कौतूहलं विद्वन् कथं विष्णुप्रियो ह्यरे ॥
के च विष्णुप्रिया धर्माः कथं वा विष्णुवल्लभाः ।
किं दानं किं फलं तस्य कमुद्दिश्याचरेदिमान् ॥

* * * *

इति श्रीस्कन्दपुराणे वैशाखमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

पूजितन्त(न्त्व)ममामन्त्र्य नारदो भगवान् मुनिः ।
लोकान्तरं ययौ सि(श्री)मान् शापान्नैकप्र(त्र)संस्थितः ॥
अम्बरीषोऽपि राजर्षिः नारदोक्तानिमान् शुभान् ।
धर्मान् कृत्वा विलीनोऽभूत् परे ब्रह्मणि निर्मणि(ले) ॥

भू(सू)तः—

य इदं परमाख्यानं पापघ्नं पुण्यवर्धनम् ।
शृणुयाच्छ्रावयेद्वापि स याति परमां गतिम् ॥
लिखितं पुस्तकं येषां गृहे तिष्ठति मानद ।
तेषां मुक्तिः करस्था वा किमु तच्छ्रवणात्मनाम् ॥

**Colophon:**

इति श्रीस्कन्दपुराणे वैशाखमाहात्म्ये चतुर्विंशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2539. वैशाखमाहात्म्यम्.
## VAIŚĀKHAMĀHĀTMYAM.

Substance, palm-leaf. Size, 14⅞ × 1¼ inches. Pages, 243. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old

Begins on fol. 47*a*. The other works herein are—**Bhāgavata** 1*a*, Āhnikam 15*a*, Gāyatrīvarṇavinyāsa 28*a*, **Smṛticandrikā** 35*a*, Paitṛmēdhavidhi 121*a*, Ratirahasya 129*a*, **Agnyanugataprāyaścitta** 132*a*.

Complete.

Same work as the above.

## No. 2540. वैशाखमाहात्म्यम्.
## VAIŚĀKHAMĀHĀTMYAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 162. Lines, 4 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 11*a*. The other work herein is **Darśapūrṇamāsēṣṭi** 1*a*.

Breaks off in the 22nd Adhyāya.

Same work as the above.

## No. 2541. वैशाखमाहात्म्यम्.
## VAIŚĀKHAMĀHĀTMYAM.

Pages, 82. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2384.

Complete.

Same work as the above.

## No. 2542. वैश्यचारित्रम्.
## VAIŚYACARITRAM.

Substance, palm-leaf. Size, 13⅞ × 1⅝ inches. Pages, 215. Lines 7 on a page. Character, Telugu. Condition, good. Appearance old.

Adhyāyas 1 to 32.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This is said to occur in the Sanatsujātasaṁhitā in the Uttara-khaṇḍa of the Skānda-Purāṇa.

This describes the origin of the Vaiśya caste and explains the duties of Vaiśyas in the Kaliyuga. The subject is introduced as a conversation between Vaiśyamuni and Sālaṅkāyana. A list of the contents of the chapters is given at the end.

**Beginning:**

अत्यन्तपुण्यनिलये नैमिशारण्यनामके ।
महर्षिमण्डलैर्जुष्टे ब्रह्मघोषानुघोषिते ॥

तमालचूतपुन्नागतिलकाशोककाञ्चनैः ।
अश्वत्थमन्मथप्लक्षमधूकाद्यैर्महानगैः ॥

सर्वर्तुपुष्पितैस्सान्द्रैः फलिनैस्सर्वदा शुभे ।
पारेजलं महानद्याः सरस्वत्या महाश्रमे ॥

आरेभिरे महासत्रं मुनयो ब्रह्मवादिनः ।
वसिष्ठो गालवो व्यासः शुकश्शक्तिः पराशरः ॥

* * * *

समूहीभूय ते सर्वे कुर्वन्तस्सत्रमुत्तमम् ।
दीक्षिताश्शमसम्पन्ना वल्कलाजिनधारिणः ॥

ददृशुस्तपसां राशिं सूतं पौराणिकोत्तमम् ।
. . . . . . . थपरिशीलिनम् ॥

* * * *

तं दृष्ट्वा मुनयस्सर्वे प्रत्युत्थाय मुदान्विताः ।
यथावच्चक्रुरातिथ्यमर्घ्यपाद्यादिपूर्वकम् ॥

निवेशयित्वा तमृषिं विष्टरे कुशमण्डिते ।
समासीनास्ततस्ते च पप्रच्छुः कुशलं स्थितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आलोचन्नथ ते सर्वे श्रोतुकामाः कथाश्शुभाः ।
सूत सूत महाभाग व्यासशिष्य महामते ॥
उपन्यासः कथाः पुण्याः श्रोत्रपेयाः पुरातनीः ।
अष्टादश पुराणानि कथितानि त्वयानघ ॥
वैष्णवं ब्रह्मकैवर्तं ब्राह्मं भागवतं शुभम् ।
लैङ्गं शैवं नारदीयं ब्रह्माण्डं पाद्ममेव च ॥

* * * *

चरित्राण्यघहारीणि प्रत्यपादिषत त्वया ।
श्रोतव्यमेकमास्तेऽद्य वैश्यानां वंशकीर्तनम् ॥
कीदृग्वृत्ताः किमाधाराः प्रभवेयुः कलौ युगे ।

* * * *

**Colophon:**

इति श्रीमति स्कान्दे पुराणे उत्तरखण्डे सनत्सुजातसंहितायां . . . . . . वैश्यवंशानुवर्णने मुनिप्रश्नो नाम प्रथमोऽध्यायः ॥

दत्तावधान(ना)मुनयः सर्वे शृण्वन्तु भक्तितः ।
पुरासीत्तपसां राशिर्वेदवेदाङ्गपारगः ॥
. . . विजितक्रोधस्साक्षादिव पितामहः ।
नाम्ना शालङ्कायनकः प्रशान्तस्सत्यसङ्गरः ॥
गोदावर्यास्तटे रम्ये पुळिनद्रुमराजिते ।

**End:**

आख्यानमेतत्परमं सुशोभनं पवित्रमायुष्यमरोगकारकम ।
जीयाश्चि(च्चि)रं शाश्वतमादिवाकरं प्रवर्धमानं शिवया कृपारसैः ॥
यः शृणोति चरितं ममानघं यः करोति गुरुवर्यपूजनम् ।
तस्य नूनमहमेत्य मन्द(न्दि)रं सोदरीर(व)परिपालयामि तम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमति स्कान्दे उत्तरखण्डे विरूपाक्षपट्टाभिषेको नाम द्वात्रिंशोऽध्यायः ॥

Said to have been copied by Lakṣayya (80 leaves) and by Jvālāpati (27 leaves).

शालङ्कायनवैश्यमुनिसंवादे.

१. वैश्यवंशानुवर्णनम्.
२. वैश्यमुनिप्रश्नः.
३. चराचरोत्पत्तिकथनम्.
४. द्युत्तरशतगोत्रोपसङ्ख्यानम्.
५. वैश्यानां महीप्रवेशाज्ञापनम्.
६. वैश्यतपश्चरणम्.
७. वैश्यानां कैलासप्रवेशः.
८. वैश्यगन्धर्वपरस्परप्रकथनम्.
९. मन्मथदहनम्.
१०. मन्मथसञ्जीवनम्.
११. गौरीगुणकथनम्.
१२. उमामहेश्वरपरस्परप्रीतियोगः.
१३. वैश्यवंशानुवर्णनम्.
१४. शङ्करहिमवत्समागमः.
१५. गौरीकल्याणम्.
१६. वैश्यावतरणम्.
१७. कीर्तिकन्याजननम्.
१८. विष्णुवर्धनदिग्विजयवासवकन्यकाभियाचनम्.
१९. राजमन्त्रिवैश्यसंवादः.
२०. विष्णुवर्धननगरप्रवेशः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२१. द्वादशाधिकषट्छतगोत्रजपरस्परसम्बन्धबान्धवविभागयोगः.
२२. द्वादशाधिकषट्छतगोत्रिणां प्राणभीत्या पलायनम्.
२३. पूर्वोक्तगोत्रिणां देव्यास्साक्षात्कारः.
२४. मातुलधर्मगुरुवर्तनाचारानिर्णयः.
२५. वासवीकुसुम्भसंवादः.
२६. वासवीविश्वरूपसंदर्शनम्.
२७. वैश्यानां कैलासप्रापणम्.
२८. विष्णुवर्धनप्रयाणसन्नाहः.
२९. विष्णुवर्धनशिरःफलनम्.
३०. गोत्रलक्षणकथनम्.
३१. वैश्यवंशप्रतिष्ठापकसारसङ्ग्रहः.
३२. विरूपाक्षपट्टाभिषेकः.

---

No. **2543.** वैश्यचरित्रम्.

VAIŚYACARITRAM.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vaiśyasandhyāvandanavidhiḥ 4*a*.

Extracted from the 15th Adhyāya in the Kūrmapurāṇa. Here Nārada relates the story to Sālaṅkāyana.

**Beginning:**

ब्रह्मात्मजं महाभागं पुण्यं देवर्षिपुङ्गवम् ।
महातपोनिधिं सर्वे(वे)वेदशास्त्रार्थवेदिनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयान्तं नारदं दृष्ट्वा देवमद्योतनप्रभम् ।
ससंभ्रमं समुत्थाय सा(शा)लङ्कायनसन्मुनिः ॥

कृत्वाभिवादनं सम्यक् स्थापयित्वोचितासने ।
अर्घ्यादिभिस्समाराध्य कृताञ्जलिपुटोऽभवे(व)त् ॥

इत्युवाच मुनिश्रेष्ठो नारदं यमिनां वरम् ।
भवत्सन्दर्शनादद्य कृतार्थोऽस्मि महातपः ॥

* * * *

वणिक्पुराणमेतत् त्वं वक्तुमर्हस्यशेषतः ।
तत्कथाक्रममात्रेण संक्षेपेण द्विजोत्तम ॥

अस्य त्वमेव वक्तेति मह्यं ब्रह्मावदत्पुरा ।
तस्मात् त्वामहमुद्दिश्य वैश्यान्वयकथामिमाम् ॥

**End:**

आतिष्ठन्ते विशस्सर्वे शुभसौभाग्यमानसु(शु)ः ।
सुवर्णाचारनिरतास्सर्वधर्माश्रय(या)ः कलौ ॥

इतीदमुक्त्वा चतुराननात्मजो महातपो(पा)देवमुनिस(स्स) नारदः ।
तदाश्रमाया(वा)सि[न]महामुनीश्वरैः कृताभिवादस्स तथा तिरोदधे ॥

**Colophon:**

इति श्रीकूर्मपुराणे पञ्चदशोऽध्यायः ॥

आदौ ब्रह्मोरुजातास्तदनु घनतपःप्रीतशम्भुप्रसादात्
स्थित्वा कैलासशैले चिरमचलसुतावल्लभाज्ञाविशेषात् ।
गोकर्णेयास्ति(स्तु)रागा(ज्ञे)घनगिरिसहितग्रामवासादि(धि)राजान्(:)
कन्यादाप्यान(दानेऽप्य)सक्ता ययुरनलमुखान्मुक्तिमेते शतद्वान्(तं द्वौ) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2544. शङ्करगीता.

## ŚANKARAGĪTĀ.

**Pages**, 6. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 17.

Adhyāyas 1 and 2. This treats of the Māhātmya (greatness) and Lakṣaṇa (characteristics) of the Chāyāpuruṣa (the shadow or the spirit of man believed to become visible in the air).

**Beginning** :

आत्मदेहं महाकायं यः पश्यति खगोचरम् ।
उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥

पित्रोरुभयपक्षञ्च पत्नीपक्षं तथैव च ।
गुरु(रो)रेककुलं देवि सप्त गोत्राणि मानवाः ॥

शुक्लवर्णमिदं देहं छायाद्योल्ले(ध्याने)न सुन्दरीम्(रि) ।
यः पश्यति महाभागे तस्य पुण्यफलं शृणु ॥

ब्रह्मज्ञानेन यत्पुण्यं तत्पुण्यं कृष्णदर्शनम् ।
गयाश्राद्धे कृते येन दृष्टमात्रेण तत्फलम् ॥

* * * *

इति शङ्करगीतायां छायापुरुषमाहात्म्ये प्रथमोऽध्यायः ।

**End** :

अशिरो मासमरणं विना जङ्घैर्दिनेन वः(यः) ।
अष्टभिस्स्कन्दनाशे च छायानाचे(शे) न(स) तत्क्षणात् ॥

**Colophon** :

इति शङ्करगीतायामुमामहेश्वरसंवादे छायापुरुषलक्षणं नाम द्वितीयोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2545.** शिवगङ्गामाहात्म्यम्.

ŚIVAGAṄGĀMĀHĀTMYAM.

**Pages,** 31. Lines, 6 on a page.

Begins on fol. 63*b* of the MS. described under No. 2492.

Kalyāṇakāṇḍa, Adhyāyas 1 to 4; 5th, incomplete.

A portion of the Skānda-Purāṇa. This describes the greatness and sanctity of Śivagaṅgā, a town in the Madura district of the Madras Presidency, and of the shrine of Kakudgirīśa therein.

**Beginning:**

सनत्कुमारः—

नन्दीश्वर महाप्राज्ञ सर्वलोकप्रियङ्कर ।
ककुद्गिरीशमाहात्म्यं वद सर्वविदां वर ॥

नन्दी—

सनत्कुमार साधो त्वं सर्वलोकहिते रत ।
बुद्धिमानसि योगी त्वं सौख्यदं पृष्टवानसि ॥

यच्छ्रुत्वा मुच्यते जन्तुर्जन्मसंसारबन्धनात् ।
सर्वाभीष्टप्रदाख्यानं सर्वकामार्थमोक्षदम् ॥

* * * *

कोटिदानफलं विप्रा(प्रैः) श्रवणादेव लभ्यते ।
ककुद्गिरीशमाहात्म्यं शिवगङ्गार्थकारणम् ॥

वक्ष्यामि सकलं विप्र[ा] ककुद्भिकथनं शुभम् ।
सनत्कुमार चास्त्यन्यो महीध्रो दक्षिणादिशि ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीस्कन्दपुराणे कल्याणकाण्डे शिवगङ्गामाहात्म्ये प्रथमोऽध्यायः ॥

* * * *

इति श्रीस्कान्दे कल्याणकाण्डे शिवगङ्गामाहात्म्ये चतुर्थोऽध्यायः ॥

**End:**

इत्युक्त्वा भगवान् व्यासः शिष्याणामतिहर्षतः ।
गङ्गाधरं पूजयित्वा सर्वास्स्तुत्वा सुखी बभूत् ॥
अथ ते व्यासशिष्यास्तु पूजयित्वा कळाधरम् ।
कृतार्था ज्ञानमतुलं प्रापुश्शङ्करभक्तितः ॥
शिवमुद्दिश्य भक्त्यैव यत्किञ्चिदपि दीयते ।

---

## No. 2546. शिवगीता.

## ŚIVAGĪTĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 71. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, not new.

Complete in 16 Adhyāyas.

Said to be a portion of the Pādma-Purāṇa. The contents of the chapters are given under No. 61 in Aufrecht's Cat. Bodl. This work is intended to establish the superiority of Śiva as God.

**Beginning:**

सूत उवाच—

अतः परं प्रवक्ष्यामि शुद्धं कैवल्यमुक्तिदम् ।
अनुग्रहान्महेशस्य भवदुःखौघभेषजम् ॥
न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा ।
कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामाय दण्डकारण्ये पार्वतीपतिना पुरा ।
या प्रोक्ता शिवगीताख्या गुह्याद्गुह्यतमं(मा) हि सा ॥

यस्य श्रवणमात्रेण नृणां मुक्तिर्दृढा भवेत् ।
पुरा सनत्कुमाराय स्कन्देनाभिहिता हि सा ॥

सनत्कुमारः प्रोवाच व्यासाय ऋषिसत्तमाः ।
मह्यं कृपातिरेकेण प्रददौ बादरायणः ॥

**End :**

शिवगीतामतो नित्यं शृणुध्वमृषिसत्तमाः ।

ऋषय ऊचुः—

अद्यप्रभृति नस्सूत त्वमाचार्यः पिता गुरुः ।
अविद्यायाः परं पारं यस्मात्तारयिता स नः ॥

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
तस्मात्सूतात्मज त्वत्तः सत्यं नान्योऽस्ति नो गुरुः ॥

इत्युक्त्वा पूजयामासुस्सूतं सर्वार्थदर्शिनम् ।
वस्त्रालङ्कारभूषाद्यैः कृतार्था ऋषयस्तदा ॥

ऋषयः—

शिवगीतां नरः श्रुत्वा वाचकं पूजयेत्ततः ।
वस्त्राद्यैर्भूषणैश्चैव पूजयन्मुक्तिमाप्नुयात् ॥

श्रुत्वा गीतान्तु मन्दात्मा श्रावकं यो न पूजयेत् ।
स वै कृतघ्नः पापी च तस्मान्नान्योऽस्ति कश्चन ॥

तस्मात्सर्वप्रयत्नेन वाचकं पूजयेत्सुधीः ।
तेन प्रीतो महादेव आत्मसायुज्यमानयेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्त्वा प्रययुस्सर्वे सायं सन्ध्यामुपासितुम् ।
स्तुवन्तस्सूतपुत्रन्ते सन्तुष्टा गोमतीतटम् ॥

**Colophon:**

ओं तत्सदिति श्रीमत्पद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवराघवसंवादे षोडशोऽध्यायः ।

---

## No. **2547.** शिवगीता.

## ŚIVAGĪTĀ.

Pages, 34. Lines, 9 on a page.

Begins on fol. 27*a* of the MS. described under No. 2014.

1 to 12 Adhyāyas complete; 13th, incomplete.

Same work as the above.

---

## No. **2548.** शिवगीता.

## ŚIVAGĪTĀ.

Pages, 87. Lines, 17 on a page.

Begins on fol. 1*a* of the MS. described under No. 118.

Adhyāyas 3 to 16, complete; 10 lines in the beginning are wanting.

---

## No. **2549.** शिवगीता.

## ŚIVAGĪTĀ.

Substance, palm-leaf. Size, 12 × 1½ inches. Pages, 106. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 14*a*. The other works herein are Bhuvanēśvarīsammōhanakavaca 1*a*, Bhuvanēśvarīmantrakavaca 2*a*, Dēvyupaniṣat 3*a*, Śivapurāṇa 6*a*, Vēdasāraśivasahasranāmastōtra 59*a*, Tripurāmbikāstōtra 76*a*, Rāmakavaca 87*a*, Rāmadurga 91*a*,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Hanūmatkavaca 92*a*, Harināmāṣṭaka 94*b*, Bhuvanēśvarīmātṛkāmantra 95*a*, Rāmamantrakavaca 97*a*, Rāmadurgakavaca 99*a*, Prāṇapratiṣṭhāmantra 100*a*, Lalitāsahasranāmastōtra 102*a*.

Same work as the above.

---

## No. 2550. शिवगीता.
## ŚIVAGĪTĀ.

Substance, palm-leaf. Size, $10\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 158. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 84*a*. The other works herein are Mahimnastava 1*a*, Malhaṇastava 8*a*, Bilhaṇastava 13*a*, Anāmayastava 19*a*, Halāyudhastava 26*a*, Śivānandalaharī 39*a*, Vighnēśvarabhujaṅga 46*a*, Śivabhujaṅga 48*a*, Śivatāṇḍavastava 52*a*, Kāśīśvarāṣṭaka 55*a*, Kālabhairavāṣṭaka 56*a*, Vṛṣabhāṣṭaka 57*b*, Bījabhairavāṣṭaka 58*b*, Ardhanārīśvarāṣṭaka 60*b*, Śaṅkarāṣṭaka 61*b*, Viśvanāthāṣṭaka 63*a* Namaśśivāṣṭaka 65*a*, Gurugītā 67*a*, Āndhravacana 83*b*.

Same work as the above.

The MS. is dated: Sunday the 3rd of Mārgaśira-Bahula in the year Īśvara.

---

## No. 2551. शिवगीतातात्पर्यप्रकाशिका.
## ŚIVAGĪTĀTĀTPARYAPRAKĀŚIKĀ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{8}$ inches. Pages, 546. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 15, complete.

A commentary on Śivagītā by Paramaśivēndrasarasvatī, a pupil of Abhinavanārāyaṇēndrasarasvatī.

**Beginning:**

उमापत्यमुमाजानिमुमां चोमासहोदरम् ।
पद्मामुमाननान्दारं विधिं वयमुपास्महे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चाक्षरतनुं पञ्चवदनं प्रणवं शिवम् ।
अपारकरुणारूपं गुरुमूर्तिमहं भजे ॥

नत्वा सर्वगुरुं साम्बं लीलामानुषविग्रहम् ।
रामं च शिवगीतायाः तात्पर्यं वर्ण्यते मया ॥

क्वेयं गीता शिवप्रोक्ता गम्भीरोपनिषन्मयी ।
क्वाहं मन्दमतिर्हन्त शम्भोराज्ञा गरीयसी ॥

इह खलु देवा रावणादिरक्षःपीडिताः तत्परिचरणादी(धी)नाः मानभङ्गयुक्ताः तेनैव विघ्नितभूदेवादिकर्तृकयज्ञानुष्ठानेन बलहीनाश्च सन्तः वैकुण्ठवासिनं भगवन्तं. . . .

* * * *

पाशुपतास्त्रादिकं लब्ध्वा रावणसंहारे कृतनिश्चयः लोकानुग्रहार्थं ज्ञानं तत्साधनानि जीवादिस्वरूपं च शिवं पृष्टवान्; श्रीशिवेनापि तस्मै सर्वमुपदिष्टम् । तामेतां शिवेन प्रोक्तां श्रीरामेण श्रुताम् उपनिषन्मयीं पठनादिमात्रेण ब्रह्मविद्याप्रदात्रीं शिवगीतामवतारयितुमुपक्रमते — अथेत्यादिना अध्यायचतुष्टयेन । एवं च अध्यायचतुष्टयस्य तदवतारणग्रन्थरूपत्वात् शिवगीतात्वम् ।

**End:**

अस्यां शिवगीतायां भस्मोद्धूलनत्रिपुण्ड्ररुद्राक्षधारणशिवक्षेत्रवासशिवलिङ्गपूजाशिवनामस्मरणपञ्चाक्षरजपशिवध्यानादिकं कर्तव्यं, श्रवणादिपुरस्सरं शिवज्ञाननिष्ठापि संपादनीयेत्युक्तम् । एवं निश्चितवन्त ऋषयस्सन्तुष्टाः गोमतीतटं गोमतीतीरं सन्ध्यामुपासितुं प्रययुः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याभिनवनारायणेन्द्रसरस्वतीपूज्यपादशिष्यश्रीपरमशिवेन्द्रसरस्वतीविरचितायां श्रीशिवगीतातात्पर्यप्रकाशिकायां षोडशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीनारायणेन्द्रसरस्वतीपादाब्जसेवापरायणेन श्रीशङ्करेन्द्रयोगिना लिखितेयं शिवगीतातात्पर्यप्रकाशिका समाप्ता ॥

पञ्चाक्षरतनुं पञ्चवदनं प्रणवं शिवम् ।
अपारकरुणारूपं गुरुमूर्तिमुपास्महे ॥

---

No. **2552.** शिवगीता—सव्याख्या.

ŚIVAGĪTĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 11⅜ × 1½ inches. Pages, 21. Lines, 11 on a page. Character, Grantha. Condition, edges bitten. Appearance, new.

3rd Adhyāya incomplete.

Same work as the above.

---

No. **2553.** शिवगीता—सव्याख्या.

ŚIVAGĪTĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 11⅜ × 1⅜ inches. Pages, 304. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

No. **2554.** शिवतत्त्वसुधानिधिः.

ŚIVATATTVASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 12 × 1½ inches. Pages, 121. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 20.

A portion of the Skānda-Purāṇa and found in the **Sanatkumārasaṁhitā**; treats of the greatness of Śiva.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

यं प्रणम्य सुरेन्द्राद्या भवन्ति सुखशालिनः ।
सर्वविघ्नोपशान्त्यर्थं तं वन्दे शङ्करात्मजम् ॥

श्रीसूतः—

शिवं हरिं विधातारं तत्पत्नीन्(:) तत्सुतान् गुरून् ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ॥
वक्ष्ये शृणुध्वं सर्वज्ञाः शिवतत्त्वसुधानिधिम् ।
नैमिशीयास्तु मुनयः शौनकाद्या महर्षयः ॥
सत्रावसाने संहृष्टाः सूतं पप्रच्छुरादरात् ।

ऋषयः—

व्यासशिष्य महाप्राज्ञ सर्वशास्त्रविशारद ।
सूत पौराणिकश्रेष्ठ सर्वज्ञोऽसि भवान्यतः ॥
त्वद्गुरुस्सर्वलोकानां श्रेष्ठस्सत्यवतीसुतः ।
वेदानां वा(व्या)सभूतत्वाद्वेदव्यास इति स्मृतः ॥

* * * *

इत्यादिमहापुराणे स्कान्दे सनत्कुमारसंहितायां शिवतत्त्वसुधानिधौ प्रथमोऽध्यायः ॥

**End :**

श्रुत्वा समग्रमृषयस्सूतं पौराणिकोत्तमम् ।
महावाक्यार्थदातारं सम्पूज्य विधिवन्मुदा ॥
वस्त्रैराभरणैर्गन्धैः पुष्पैरर्घ्यादिभिश्शुभैः ।
उक्तमर्थं सुनिश्चित्य ब्रह्मनिष्ठा(ष्ठां) बभूवतुः(विरे) ॥
य एतत्पुण्यमाख्यानं श्रावयेद्वा शृणोति वा ।
अपुत्रो लभते पुत्रान् दरिद्रो लभते धनम् ॥
ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधिगच्छति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वान् कामानवाप्नोति सत्यमेतन्न संशयः ॥

**Colophon**

इत्यादिमहापुराणे स्कान्दे श्रीमत्सनत्कुमारसंहितायां शिवतत्त्वसुधानिधौ सकलाध्यायसारमहिमा नाम विंशोऽध्यायः ॥

---

No. **2555.** **शिवभक्तमाहात्म्यम्.**

ŚIVABHAKTAMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 19¼ × 1⅞ inches. Pages, 310. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 90.

A portion of the Skāndōpapurāṇa. It describes the lives of the 63 Nāyanārs, the famous Tamil devotees of Śiva, and explains the way in which they gained salvation.

**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

वामाङ्कारूढवामोरु(रू)वक्षोजार्पितपुष्करम् ।
विघ्नवारणहर्यक्षं विघ्नराजमहं भजे ॥

गौरीगिरिशयोरङ्कादङ्कं कृतगतागतम् ।
उद्यद्दशनषड्वक्रमुमासुतमहं भजे ॥

शिरसा शिवभक्तानां पादाम्बुजरजःकणान् ।
म(मो)दामहे वयं नित्यं वासनाध्वान्तभास्करान् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनयो नैमिशारण्ये दीर्घसत्रे यतव्रताः ।
अष्टादशपुराणज्ञमपृच्छन् सूतमागतम् ॥

ऋषयः—

सूत सर्वपुराणज्ञ व्यासशिष्य महामते ।
सन्दिहाना वयं सर्वे पृच्छामस्त्वां महत्तरम् ॥
विचारितेऽपि वेदान्ते तदर्थेच(ऽव)गतेऽपि च ।
अष्टादशपुराणेषु श्रुतेष्वपि महत्सु च ॥

* * * *

एतत्तत्त्वमशेषेण विस्तराद्वक्तुमर्हसि ।
इति पृष्टो(ष्ट)ऋषिवरैस्सूतः सर्वार्थतत्त्ववित् ॥
नमस्कृत्वा महाभागश्शिवाय गुरुमूर्तये ।
विघ्नेशं भारतीं देवीं सम्प्रदायप्रवर्तकान् ॥
प्रणम्य परया भक्त्या वक्तुमेवोपचक्रमे ।

श्रीसूतः—

साधु पृष्टं मुनिश्रेष्ठाः श्रोतव्यं यद्विशेषतः ।
श्रुतं यथा गुरुमुखात् यथामति वदामि वः ॥
वेदागमपुराणेषु मन्त्रेषु सकलेषु च ।
एक एव महादेवः विकारेषु यथार्णवम्(ः) ॥

* * * *

संशयो यदि युष्माकं शौनकाद्या महर्षयः ।
अस्मिन्नर्थे निवृत्त्यर्थमेतस्येदमुदीर्यते ॥
व्यासेन मुनिना प्रोक्तं भक्तमाहात्म्यमुत्तमम् ।
श्रुत्वा पुराणं भवतः सर्वे सञ्छिन्नसंशयाः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीस्कन्दपुराणे भक्तमाहात्म्ये प्रथमोऽध्यायः ॥

ऋषयः—

भगवन् सूत सर्वज्ञ व्यासशिष्य महामते ।
व्यासेन मुनिना प्रोक्तं भक्तमाहात्म्यनामकम् ॥
पुराणं ब्रूहि यच्छ्रुत्वा मित्यादि (मिथ्या)जात्यादिकं भवेत् ।
यस्य श्रवणमात्रेण पापनाशपुरस्सरम् ॥

**End :**

किमेतदिति पप्रच्छ जना वृत्तान्तमूचिरे ॥
निवार्य रुदितं तस्यास्तुष्टाव परमेश्वरम् ।
अथाज्ञया महेशस्य प्राहस्तद्द्विजनन्दनम् ॥
सभूषणगणं साङ्गं . . . . . ।
सर्वे . . . . दरं मेनिरेऽधिकम् ॥

**Colophon :**

इति श्रीस्कन्दपुराणे शिवभक्तमाहात्म्ये नवतितमोऽध्यायः ॥

---

## No. 2556. शिवभक्तमाहात्म्यम्.

## ŚIVABHAKTAMĀHĀTMYAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 362. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 78.

Same work as the above.

---

## No. 2557. शिवभक्तमाहात्म्यम्.

## ŚIVABHAKTAMĀHĀTMYAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 290. Lines, 19 on a page. Character, Grantha. Condition, good. Appearance, new.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 66 to 90.

A portion of the Bhaviṣyōttara-Purāṇa. A work similar to the above.

**Beginning :**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

आदिमध्यविहीनं हि शैवं तत्त्वं परात्परम् ।
सर्वाधारं निराधारं विक्रियारहितं सदा ॥

सदानन्दघनाम्भोधिं त्रिपुरघ्नं महेश्वरम् ।
पार्वतीरमणं वन्दे सततं सकलार्थदम् ॥

सूतं सर्वज्ञमतुलं शैवसिद्धान्तपारगम् ।
व्यासशिष्यं महाप्राज्ञं पुराणार्थविशारदम् ॥

नत्वा हर्षेण संयुक्ताः पप्रच्छुरमितौजसः ।
सूत सूत महाप्राज्ञ व्यासशिष्य महामते ॥

*   *   *   *

तस्य श्वेतवनाभिख्यवणिजो महिमोन्नतिम् ।
वक्तुमर्हसि सूताद्य इति पृष्टो मुनीश्वरैः ॥

तेषां निरवशेषेण कथयामास सूतजः ।
इति तस्य वचः श्रुत्वा व्याघ्रपादसुतस्य च ॥

नत्वा सर्वे मुनिवराः प्रार्थयामास तं मुनिम् ।
उपमन्यो महाभाग व्याघ्रपादप्रियात्मज ॥

शिवभक्त महाप्राज्ञ सर्वतत्त्वविदां वर ।
शिवप्रसादात् क्षीराब्धिं प्राप्तवान् पञ्चमाब्दके ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिवभक्तस्य माहात्म्यं कृत्स्नं वक्तुं त्वमर्हसि ।
इति पृष्टो मुनिवरैः वक्तुं समुपचक्रमे ॥

उपमन्युः—

यस्य सर्वज्ञ ईशोऽपि महिमानमशेषतः ।
नावगन्तुं समर्थोऽभूत् मया तच्चरितं कथम् ॥
कथितुं शक्यते विप्राः किञ्चिद्वक्ष्यामि साम्प्रतम् ।
पुरा कैलासशिखरान्निर्गत्य परमेश्वरः ॥

**Colophon:**

इति श्रीभविष्यत्पुराणे शिवभक्तमाहात्म्ये पूर्वभागे शिवशापेन यज्ञेशस्य मर्त्यत्वप्रापणं नाम षट्षष्टितमोऽध्यायः ॥

**End:**

सारात्सारतरं पुण्यमिदमुक्तं मयानघाः ।
तस्माद्यूयं यथाकालं शृणुध्वं श्रद्धयान्विताः ॥
इति तेनेरितास्सर्वे सनकाद्या महर्षयः ।
उपमन्युं महाभागमब्रुवन् साधु साध्विति ॥

इति (तस्य) श्वेतविपिनस्य सन्मुनेश्चरितं समस्तदुरितौघनाशनम ।
शृणु(यात्)पठते(ठेत) विमलाशयस्सदा शिवरूपमेति न हि तत्र संशयः ॥

**Colophon:**

इति श्रीभाविष्योत्तरपुराणे शिवभक्तमाहात्म्ये नवतितमोऽध्यायः ॥

---

No. **2558.** श्रीकाकुलक्षेत्रमाहात्म्यम्.

ŚRĪKĀKULAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, $8\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 93. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, not old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 13.

A portion of the Brahmāṇḍa-Purāṇa. A work treating of the sanctity and greatness of the shrine at Śrīkākula (Chicacole in the Ganjám district of the Madras Presidency).

**Beginning:**

श्रीशं श्रीकाकुळाधीशमिन्द्रनीलसमप्रभम् ।
कल्याणगुणसंयुक्तमाश्रयेऽभीष्टसिद्धये ॥

सूतः—

श्रिया ब्राह्मया समायुक्ताः स(शौ)नकाद्या महर्षयः ।
सत्रयागक्रियां चक्रुर्नैमिशारण्यवासिनः ॥

स्वाध्यायनिरताश्शुद्धास्तदर्थपारिनिष्ठिताः ।
सर्वशास्त्रार्थतत्त्वज्ञाः शान्तिदान्त्यादिसंयुताः ॥

जितेन्द्रिया जितक्रोधा विष्णुभक्ता विमत्सराः ।
अत्रिर्वसिष्ठो भगवानगस्त्यः कुशिकात्मजः ॥

. . . वामदेवश्च जाबालिरथ काश्यपः ।
मार्कण्डेयो महातेजाः शुकः कौण्डिन्य एव च ॥

पराशरो मुनिवरो भरद्वाजस्तथा ऋषिः ।
एतदाख्या द्विजश्रेष्ठास्सर्वे ब्रह्मर्षिसम्मताः ॥

राजर्षयो महात्मानस्तथा देवर्षयश्च ये ।
अग्रेसरा ब्रह्मविदामागतास्ते दिदृक्षवः ॥

तानागतानृषिवरान् दृष्ट्वा कुलपतिस्तथा ।
शौनको हर्षसंयुक्तः पूजयामास धर्मतः ॥

* * * *

अर्घ्यपाद्यादिभिस्सर्वैरुपचारैः प्रतोषितः ।
सुखोपविष्टस्तान् प्रेक्ष्य सर्वत्र कुशलं मुनिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पप्रच्छ प्रीतिसंयुक्तः सत्रयागे विशेषतः ।
पृष्टास्ते मुनयस्सर्वे हर्षगद्गदया गिरा ॥
अब्रुवन् कुशलं यागे सर्वत्र च विशेषतः ।
ततः प्राञ्जलयो भूत्वा मानसं ब्रह्मणस्सुतम् ॥
लोकसञ्चारनिरतं सर्वतीर्थनिषेविणम् ।
पप्रच्छुर्मुदितास्सर्वे नारदं वीतकल्मषम् ॥

ऋषयः—

अस्माभिस्तोषिता देवा दत्तमिष्टं हुतं तथा ।
नियमास्सफला जाता जन्मान्तरकृता अपि ॥
येनेदं दर्शनं जातं तव देवर्षिसत्तम ।

* * * *

भगवन् श्रोतुमिच्छामः कस्माद्देशादिहागतः ॥
यत्र देशे तव रुचिः तत्पुण्यं तत्सुपावनम् ।
विष्णोः प्रियतमं चैव सर्वपापहरं नृणाम् ॥
तं देशमिति पृष्टस्तैः नारदो मुनिपुङ्गवः ।
कृपालुः परमोदारः प्रवक्तुमुपचक्रमे ॥

**Colophon:**

इति श्रीकाकुळक्षेत्रमाहात्म्ये ब्रह्माण्डपुराणे उत्तरखण्डे प्रथमोऽध्यायः ॥

श्रीनारदः—

शृणुध्वमृषयस्सर्वे यत्पृष्टोऽहं ब्रवीमि तत् ।
पुण्यक्षेत्राणि सर्वाणि यानि सन्तीह भूतले ॥
तानि पश्यन्नहं नित्यं नदीश्च विविधाश्शुभाः ।
चरन् कदाचित् कृष्णायास्तिरे पुण्यतमे स्थितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीकाकुळमिति ख्यातं क्षेत्रमद्भुतदर्शनम् ।

**End:**

नारायण(णे)जगन्नाथे किमलभ्यं ततः परम् ।
तस्मात्सर्वफलावाप्तिः भविष्यति न संशयः ॥

इत्येवं सूतकथितं श्रुत्वा ते तु महर्षयः ।
तुष्टुवुः परमात्मानं काकुळेशमथाच्युतम् ॥

**Colophon:**

इति ब्रह्माण्डपुराणे उत्तरखण्डे श्रीकाकुळक्षेत्रमाहात्म्यंस(त्म्यस)माप्तं न(प्तिर्ना)म त्रयोदशोऽध्यायः ॥

---

## No. 2559. श्रीरङ्गमाहात्म्यम्.

### ŚRĪRAṄGAMĀHĀTMYAM.

Substance, palm-leaf. Size, 16 × 1⅛ inches. Pages, 56. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

10 Adhyāyas in the Brahmāṇḍa-Purāṇa The colophon here however mentions it as forming part of the Brāhma-Purāṇa.

This treats of the sanctity of Śrīraṅgam on the Kāvērī near Trichinopoly in the Madras Presidency and of the Vaiṣṇava shrine therein.

**Beginning:**

श्रीनारदः—

देवदेव विरूपाक्ष श्रुतं सर्वं मयाधुना ।
त्रैलोक्यान्तर्गतं वृत्तं त्वन्मुखाम्भोजनिस्सृतम् ॥

तथा पुण्यानि तीर्थानि पुण्या(न्या)यतनानि च ।
गङ्गाद्यास्सरितस्सर्वा इतिहासाश्च शङ्कर ॥

कावेर्यास्तु प्रसङ्गेन तस्यास्तीरे त्वया पुरा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रस्तुतं रङ्गमित्युक्तं विष्णोरायतनं महत् ॥
तस्याहं श्रोतुमिच्छामि विस्तरेण महेश्वर ।
माहात्म्यमघनाशाय पुण्यस्य च विवृद्धये ॥

शङ्करः—

एतद्गुह्यतमं लोके स्वकालेऽपि मया तव ।
न प्रकाशितमेवाद्य मया सम्यक् प्रकाश्यते ॥
माहात्म्यं विस्तरेणेह वक्तुं वर्षशतैरपि ।
न शक्यं श्रोतुमपि वा तस्मात्संक्षेपतः शृणु ॥

**Colophon:**

इति ब्राह्मे पुराणे श्रीरङ्गमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

श्रुत्वैतदखिलं ब्रह्मन् विष्णुभक्तो विमत्सरः ।
भुक्त्वा भोगश्च कामश्च विष्णुमाप्नोति शाश्वतम ॥
पठन् शृण्वन् तथा विप्रो विदुषामग्रणीर्भवेत् ।
क्षत्रियो लभते राज्यं वैश्यश्च धनसम्पदम् ॥
शूद्रो(ऽपि)भगवद्भक्तिं तथैव विजयं युधि ।
गर्भिणी जनयेत्पुत्रं कन्या विन्दति सत्पतिम् ॥
शृण्वन् लिखन् पठन् बिभ्रत् रङ्गमाहात्म्यमुत्तमम् ।
मुक्त्वा शुभाशुभौ याति तद्विष्णोः परमं पदम् ॥

**Colophon:**

इति ब्राह्मे पुराणे श्रीरङ्गमाहात्म्ये दशमोऽध्यायः ॥

वाधूलान्वयजातेन श्रीनृसिंहार्यसूनुना ।
वेदनारायणेनेदं लिखितं रङ्गवैभवम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 2560. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHĀTMYAM.

Pages, 54. Lines, 7 on a page.

Begins on fol. 125*a* of the MS. described under No. 2111.

Same work as the above.

---

## No. 2561. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHĀTMYAM.

Pages, 62. Lines, 6 on a page.

Begins on fol 118*a* of the MS. described under No. 2473.

Complete.

Same work as the above.

The MS. is dated 12th of Āṣāḍha-Bahula in the year Vṛṣa. This work along with Vēṅkaṭagirimāhātmya and Puruṣōttamamāhātmya found herein is said to have been copied by Jaggarāju Koṇḍayya.

---

## No. 2562. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHĀTMYAM.

Pages, 30. Lines, 8 on a page.

Begins on fol. 61*a* of the MS. described under No. 236?.

Complete.

Same work as the above.

---

## No. 2563. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHĀTMYAM.

Substance, paper. Size, $8\frac{7}{8} \times 6\frac{5}{8}$ inches. Pages, 47. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 76*a*. The other work herein is Viṣṇusahasranāmabhāṣya 1*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

Same work as the above.

The MS is dated: Monday, the 8th of Śrāvaṇa-Bahula in the year Śubhakṛt. The MS. is said to have been copied by Tummalapalli Śēṣācalam and given to Mandayam Rāmānujācāryar of Triplicane by Taḍakamalla Kanakammagāru.

---

## No. 2564. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHATMYAM.

Pages, 56. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2383

Complete.

Same work as the above.

---

## No. 2565. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHĀTMYAM.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 36. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 7*a*. The other works herein are Tarkasaṅgrahadīpikā 1*a*, Rāmanujabhāṣyasaṅgraha 28*a*.

Folios 12, 14 and 16 are wanting.

Complete.

Same work as the above.

---

## No. 2566. श्रीरङ्गमाहात्म्यम्.

## ŚRĪRAṄGAMĀHĀTMYAM.

Pages, 34. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2480,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Breaks off in the 7th Adhyāya.

Two leaves in the beginning are wanting.

## No. 2567. श्रीरङ्गमाहात्म्यम्.
## ŚRĪRAṄGAMĀHĀTMYAM.

Pages, 6. Lines, 13 on a page.

Begins on fol. 65*a* of the MS. described under No. 1952.

Adhyāyas 1 to 6.

Same work as the above.

(The name of this work also should have been given in the list of other works noted thereunder)

## No. 2568. श्रीरङ्गमाहात्म्यम्.
## ŚRĪRAṄGAMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 18 × 1½ inches. Pages, 50. Lines, 11 on a page. Character, Grantha and Tamil. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 6 in the Brahmāṇḍa-Purāna, with a Tamil commentary.

Said to have been copied by Ilaṅgādu Raghunātha Ayyaṅgar.

Same work as the above.

## No. 2569. श्रीरङ्गमाहात्म्यम्.
## ŚRĪRAṄGAMĀHĀTMYAM.

Pages, 6. Lines, 15 on a page.

Begins on fol. 9*a* of the MS. described under No. 2505.

Adhyāyas 1 to 4, complete; 5th, incomplete.

A portion of Brahmāṇḍa-Purāṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2570.** श्रुतिगीता.

ŚRUTIGĪTĀ.

Pages, 8. Lines, 15 on a page.

Begins on fol. 18*a* of the MS. described under No. 2380.

The 87th Adhyāya of the 10th Skandha of the Bhāgavata. This gives the praise of the Vēdas bestowed on the Supreme Being when He was floating on a milky ocean after the dissolution of the universe.

**Beginning:**

जय जय जह्यजामजितदोषगृहीतगुणां
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
अगजगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोऽनुचरेन्निगमह(:) ॥
बृहदुपलब्धमेतदवयन्त्यवशेषतया
यत उदयास्तमयौ विकृतेर्मृदि वाविकृतात् ।
अत ऋषयो दधुस्त्वयि मनोवचनाचरितं
कथमयथा भवन्ति भुवि दत्तपदानि नृणाम् ॥

**End:**

योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो
यस्सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरश्शास्ति ताः ।
यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥

**Colophon:**

इति श्रीभागवते दशमस्कन्धे सप्ताशीतितमोऽध्यायः ॥

---

No. **2571.** श्रुतिगीता सव्याख्या.

ŚRUTIGĪTĀ WITH COMMENTARY.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 50. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Leaves 1, 21 and 22 are broken.

Begins on fol. 1*a*. The other works herein are Kṛṣṇacaturviṁśati 26*a*, Kṛṣṇāṣṭaka 28*a*, Gāyatrīvarṇamālā 28*b*, Rāmatārāvali 28*b*, Rāmākṣaramālikā 30*b*, Bhajagōvindam 31*b*, Rāmastavarāja 35*a*, Bhāratasāvitri 41*a*.

The commentary is by Śrīdhara.

**Beginning :**

सप्ताशीतितमेऽध्याये नृनारायणवादतः ।
वेदैस्तु निर्गुणालम्बा सगुणा चाभिवर्ण्यते ॥
वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे ॥
सम्प्रदायविशुद्ध्यर्थं स्वीयनिर्बन्धयन्त्रितः ।
श्रुतिस्तुतिमितव्याख्यां करिष्यामि यथामति ॥
(श्रीमद्भागवतं पूर्वैस्सार)तस्सान्निषेवितम् ।
मया तु तदुपस्पृष्टमुच्छिष्टमुपचीयते ॥
पूर्वाध्याय(न्ते)
(एवं स्वभक्तयो राजन् भगवान्) भक्तभक्तिमान् ।
उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥

इत्यत्र सन्मा(र्गं सतां) . . . . . कारणरहितानां वेदाना मार्गं ब्रह्मपरत्वमुपदिश्य भगवान् . . . . . नः पृच्छति ब्रह्मन्निति ।

राजा—

ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे(गुणवृत्तयः) ।
. . . . . . . . . . . ॥

तत्र तावन्मुख्यलक्षणागुणभेदेन त्रिधा शब्दस्य प्रवृत्तिः ।

**End :**

तदेतद्वर्णितं राजन् यन्नः प्रश्नः कृतस्त्वया ।
तथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योऽस्योत्प्रक्षक आदिमध्यनिधनो(ने) योऽव्यक्तजीवेश्वरो
यस्सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरा संहिताम् ।
यं सम्पन्न(द्य) जहात्यजंप्य(जांम)नुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥

**Colophon :**

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे सव्याख्याने सप्ताशीतितमोऽध्यायः ॥

---

No. **2572.** श्रुतिगीता—सव्याख्या.

ŚRUTIGĪTAVYĀKHYĀ.

Substance, palm-leaf. Size, $17\frac{1}{3} \times 1\frac{3}{8}$ inches. Pages, 52. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

This commentary is in accordance with the tenets of the Viśiṣṭādvaitins.

It is by Veṅkaṭakṛṣṇa, the author of the commentary on Bhāgavata known as Bhāgavatatātparyacandrikā

**Beginning :**

श्रीशुकः । श्रीविष्णुरातः । विष्णुना भगवता रातः दत्तः । द्रौण्यस्त्रविप्लुष्टाङ्गत्वेऽपि भगवत्कृपया संरक्षिताङ्गत्वात् तेन दत्तः । रा दाने इति धातोः कर्मणि क्तः । भगवत्कृपया संरक्षिताङ्गत्वञ्च स्वस्य परिक्षितैवोक्तम् ।

द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं
सन्तानबीजं कुरुपाण्डवानाम् ।
जुगोप कुक्षिं गत आत्तचक्रो
मातुश्च मे यश्शरणं गतायाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति स वैयासकिं पप्रच्छ ब्रह्मन्निति ।
ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ।
कथं चरन्ति श्रुतयः साक्षात् सदसतः परे ॥

**End:**

य(यो)स्योत्प्रेक्षक आदिमध्यनिधन इति जगत्कारणत्वं, योऽव्यक्तजीवेश्वर इति प्रकृतिपुरुषनियन्तृत्वं, यं सम्पद्य जहात्यजामित्यादौ मुक्तिप्रदत्वं चाभिधाय एतादृशवैभवविशिष्टं नारायणं निरन्तरं ध्यायेदित्युक्त्वा सर्वासु श्रुतिषु निखिलजगत्कारणत्वनिखिलचेतनाचेतननियन्तृत्वमुक्तिप्रदत्वादिकल्याणगुणविशिष्टतया प्रतिपादितः श्रीमन्नारायण एवेति प्रतिपादितं भवति ॥

**Colophon:**

इति श्रीमद्वेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्यचन्द्रिकायां दशमस्कन्धे षडशीतितमोऽध्यायः ॥
श्रुतिगीताव्याख्या सम्पूर्णा ॥

---

No. **2573.** श्रुतिगीताव्याख्या.

ŚRUTIGĪTĀVYĀKHYĀ.

Substance, palm-leaf. Size, $16 \times 1\frac{1}{8}$ inches. Pages, 76. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete; to the end of the Gītā proper.

Same work as the above

---

No. **2574.** श्रुतिगीता सव्याख्या.

ŚRUTIGĪTĀ WITH COMMENTARY.

Pages, 82 Lines, 20 on a page. Character, Telugu.

Begins on fol. 1*a* of the MS. described under No. 412.

Complete.

A commentary on the Śrutigītā or Vēdastuti by Śrīnivāsadāsa, a pupil of Vēṅkaṭācārya of Vādhūlagōtra, a resident of Gōvardhana.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

(व्या.)—

श्रीश्रीनिवासदासाख्यो नत्वा श्रीयतिशेखरम् ।
रामानुजं करोत्याद्यां(व्याख्यां)वेदस्तुतेर्गुणैः ॥
वेदवेदान्ततत्त्वज्ञैः श्रीसुदर्शनसूरिभिः ।
शुकपक्ष्यानुसारेण कृतं व्याख्यानमुत्तमम् ॥
तद्वाक्यान्येव सङ्गृह्य मया तत्करुणेक्षणात् ।
अन्यान्यपि प्रमाणानि क्रियते तत्सविस्तरम् ॥

तत्र—

"एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान् ।
उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥"

इत्युक्तं शुकार्यैः । एवमिति कथम् ।

"इत्थं चराचरमिदं[विश्वं]भावा ये चास्य हेतवः ।
मद्रूपाणीति चेतस्या धत्ते विप्रो मदीक्षया ॥"
"तस्माद्ब्र(त्त्वं ब्रा)ह्मणानेतान् ब्रह्मन् मच्छ्रद्धयार्चय ।
एवश्चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः ॥"

इति पूर्वोक्तप्रकारेण सन्मार्गं सतां भागवतानां श्रुतिस्मृत्याद्युक्त-भगवदाराधनरूपम् आदिश्य भगवान् द्वारवतीमगादित्युक्तमिति ।

* * * *

परीक्षिदुवाच—

(मू.)—

ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणो(णे) गुणवृत्तयः ।
कथश्चरन्ति श्रुतयः साक्षात्सदसतः परे ॥

इत्थंभूते सत्तामात्रब्रह्मणि श्रुतीनां प्रवृत्तिमघटमानां मन्वानः पृच्छति ब्रह्मन्निति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भोः ब्रह्मन् ब्रह्मणि निष्णात कथन्तादृशे ब्रह्मणि श्रुतयः साक्षाच्चरन्ति कथंभूताः श्रुतयः गुणवृत्तयः गुणेषु सत्त्वादिषु तत्प्रचुरेषु पुरुषेषु वृत्ति॰ र्यासां तादृश्यः.

**End:**

ब्रह्मणि तु सर्वज्ञत्वसर्वशक्तत्वादिकमपि "स्वाभाविकी ज्ञानबलक्रिया चेति" श्रवणात् । अतः सर्वं निरवद्यम् । इति ।

चिदचिद्व्यापकं ब्रह्म तद्व्याप्यगुणवर्जितम् ।
हेयैर्गुणैश्च राहित्यान्निर्गुणं हि तदुच्यते ॥

* * * *

श्रीगोवर्द्धनवासिनो गुणनिधेर्मूर्तेर्हि साक्षाद्धरेः
श्रीमद्वेङ्कटदेशिकस्य करुणापीयूषतत्त्वार्थवित् ।
श्रीरङ्गाधिपपादपद्ममधुपः श्रीवासदासाभिधः
तेनेयं रचिता हरेर्गुणयुता व्याख्या हि वेदस्तुतेः ॥
वाधूलवंशक्षीराब्धिचन्द्रमा निष्कलङ्ककः ।
योऽयं श्रीवेङ्कटाचार्यः सन्निधत्तां सदा हृदि ॥

**Colophon:**

इति श्रीगोवर्द्धनकृतवेङ्कटाचार्यसदादासेन श्रीनिवासदासेन विरचिता वेदस्तुतिव्याख्या समाप्तिमगमत् ॥

---

## No. 2575. श्रुतिगीता—आन्ध्रटीकासहिता.

## ŚRUTIGĪTĀ WITH TELUGU ṬĪKĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 12. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Māghakāvya 7*a*, Haṁsasandēśa 14*a*.

Incomplete.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **2576.** श्वेतगिरिमाहात्म्यम्.

ŚVĒTAGIRIMĀHĀTMYAM.

**Substance**, palm-leaf. Size, 16 × 1½ inches. Pages, 52. **Lines**, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the 30th Adhyāya.

Said to be a portion of the Pādma-Purāṇa. This treats of the sanctity of the Kūrma shrine at Śvētagiri in the southern part of the Coromandel coast.

**Beginning :**

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

दन्तिल उवाच—

ऋषे कथन्तु हरिणी सर्वपापापहारिणी ।
स्वप्नेऽप्यादेशितं क्षेत्रं कूर्मनाम वदस्व तत् ॥

कथं क्षेत्रस्य माहात्म्यं कथं वा हरिरव्ययः ।
कूर्मरूपी निवसति तस्मिन् क्षेत्रे निरञ्जनः ॥

कथं प्रसादमाहात्म्यं तत्सर्वं मां वदस्व भो(:) ।

ऋषिरुवाच—

साधु पृष्टं हि सुमुने कूर्ममाहात्म्यमुत्तमम् ।
अस्ति कश्चिच्छ्वेतगिरिर्दक्षिणस्योदधेस्तटे ॥

तत्र श्वेतमहीपालः कुर्वाणो राज्यमुत्तमम् ।
तत्पत्नी विष्णुपादाब्जभ्रमरायितमानसा ॥

कुर्वाणा विष्णुभक्त्या सा शुक्लैकादशिकाव्रतम् ।
उपासयन्ती गोविन्दं सुन्दरी शुद्धिपूर्वकम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीपद्मपुराणे श्वेतगिरिमाहात्म्ये प्रथमोऽध्यायः ॥

* * * *

इति श्रीपद्मपुराणे श्वेतगिरिमाहात्म्ये एकोनत्रिंशोऽध्यायः ॥

**End:**

श्रीमद्दाशरथेः कार्यवर्यः कोऽस्मात् परो मतः ।
विष्णुदीक्षाकृतोद्योग(ा): तपोभङ्गपरायणाः ॥
तिष्ठन्ति राक्षसास्तेषां शिक्षान्यस्मात्कथं भवेत् ।
स्रा . . . . . . . . . . . .

---

## No. 2577. श्वेतगिरिमाहात्म्यम्.

## ŚVĒTAGIRIMĀHĀTMYAM.

Pages, 112. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2114.

Adhyāyas 1 to 13 of the Kṣētravaibhavakhaṇḍa in the Brahmāṇḍa-Purāṇa.

This describes the sanctity of the Rama shrine and the sacred waters attached to it, which are all on Śvētagiri said to be situated on the northern bank of the Brahmakuṇḍī.

**Beginning:**

नैमिशेऽनिमिश(ष)क्षेत्रे मुनयश्शौनकादयः ।
सत्रं महत्पुण्यतमं समासत समाश्शतम् ॥
दीक्षा बहुविधाः कृत्वा . . . . . ।
. . . . . . चक्रुः कर्माण्यतन्द्रिताः ॥
तत्रान्तरे पुराणानि श्रुत्वा सूतमुखाद्द्विजाः ।
न तृप्तिमुपयान्ति स्म कथामृतरसायनात् ॥
एकदा समुपासीनाः सदस्यध्वरमण्टपे ।
श्रीरङ्गादिमहाक्षेत्रमाहात्म्यं भुवि विश्रुतम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा कौतूहलात्ते वै सूतं पौराणिकोत्तमम् ।
प्रणिपत्य महाभागाः पप्रच्छुरिदमादरात् ॥

ऋषयः—

सूत सूत महाप्राज्ञ व्यासशिष्य महामते ।
श्रुतं तव मुखाम्भोजात् स्वयंव्यक्तादिवैभवम् ॥
तत्तत्क्षेत्रादिविस्तारं तत्तत्पुष्करिणीफलम् ।
तत्तद्विमाननिर्माणं तत्तत्सेवाफलं श्रुतम् ॥

* * * *

श्रुतं विस्तरतो विद्वन् तत्तत्फलविधायकम् ।
इदानीं श्रोतुमिच्छामः किंचित्पूर्वं त्वयोदितम् ॥
श्रीशैलक्षेत्रमाहात्म्ये प्रदक्षिणकथाविधौ ।
श्वेताद्रिः कश्चिदस्तीति सर्वगिर्युत्तमोत्तमः ॥

* * * *

विस्तार्य तदिदानीं त्वं समाचक्ष्व महामते ।
श्रोतुं विस्तरतो ब्रह्मन् परं कौतूहलं हि नः ॥
इत्युदीरितमाकर्ण्य मुनिभिश्शौनकादिभिः ।
रौमहर्षणिराभाष्य वचनं चेदमब्रवीत् ॥

सूतः—

श्वेताद्रिस्थलमाहात्म्यं वच्म्यहं शिवशासनात् ।
शृणुध्वमृषयस्सर्वे शृण्वतां नास्ति पातकम् ॥

* * * *

**Colophon**:

इति श्रीब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे श्वेतगिरिमाहात्म्ये तत्तत्स्थल-निरूपणं नाम प्रथमोऽध्यायः ॥

* * * *

वक्तारं पूजयेत्पश्चात् वित्तालङ्कारभूषणैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वैतच्छौनकादा(द्या)स्ते सूतं पौराणिकोत्तमम् ।
गन्धपुष्पाक्षतैस्सम्यक् अर्चयामासुरादरात् ॥
श्रोतव्यमेतदखिलं पुरुषैः पुराणं
श्रेयस्करं श्रुतिसुखं नियतं यशस्यम् ।
धर्मिष्ठमद्भुतफलं श्वृ(सि)तभूधरस्थ-
रामस्य विप्रमुखतः कृतपुण्यपुञ्जैः ॥

**Colophon :**

इति श्रीमद्ब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे श्वेतगिरिमाहात्म्ये पुराण-प्रस्तावकथनं नाम द्वादशोऽध्यायः ॥

ऋषयः—

ब्रह्मगुण्ड्युत्तरे तीरे श्रवणात्सर्वमङ्गळः ।
श्रु(सि)तोऽद्रिस्सुमनोवासश्श्रुतोऽस्माभिरिहाधुना ॥
सा ब्रह्मगुण्डिका सूत विख्याता जलवाहिनी ।
सह्यजा वा मलयजा हिमाद्रितनयाथवा ॥

**End :**

तस्मात्सर्वप्रयत्नेन कलौ पापापहे नृणाम् ।
कर्तव्यं तज्जले सम्यक् स्नानं पापप्रणाशनम् ॥

**Colophon :**

इति श्रीब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे श्वेतगिरिमाहात्म्ये ब्रह्मकुण्डि-महिमानुवर्णनं नाम त्रयोदशोऽध्यायः ॥

The following is a list of the contents of the various chapters as given in the colophons :—

इति श्रीब्रह्माण्डपुराणे क्षेत्रवैभवखण्डे श्वेतगिरिमाहात्म्ये—

१. तत्तत्स्थलनिरूपणम्.
२. श्वेताद्रिकथनम्.
३. रामकुण्डमहिमानुवर्णनम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४. रामलिङ्गप्रतिष्ठाकथनम्.
५. रामलिङ्गस्तोत्रकथनम्.
६. प्रदक्षिणविधानकथनम्.
७. कुमारकुण्डकथानुवर्णनम्.
८. कोदण्डरामप्रतिष्ठाकथनम्.
९. कल्याणमहोत्सवकथनम्.
१०. कल्याणमहोत्सवकथनम्.
११. सीतारामस्तोत्रकथानुवर्णनम्.
१२. पुराणप्रस्तावकथनम्.
१३. ब्रह्मकुण्डमिहिमानुवर्णनम्.

---

## No. 2578. श्वेतारण्यमाहात्म्यम्.

## ŚVĒTĀRAṆYAMĀHĀTMYAM.

**Substance**, palm-leaf (Śrītāla). Size, 15½ × 2½ inches. Pages, 13. **Lines**, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

A portion of Śaṅkarasaṁhitā of the Skānda-Purāṇa.

Adhyāyas 15 to 17. This gives an account of the Śiva shrine at Śvētāraṇya (Tiruveṅgāḍu) near the mouth of the Cauvery, and describes the holiness of the place.

**Beginning :**

अथान्यदपि वक्ष्यामि क्षेत्रतीर्थस्य वैभवम् ।
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥
पुरा कृतयुगे राजा सूर्यवंशसमुद्भवः ।
सत्यव्रत इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अशासत्पृथिवीमेतां सप्तद्वीपां सकाननाम् ।
मनूपदिष्टमार्गेण पालयामास वै जगत् ॥
विषयान्तेऽस्य भूपस्य गिरिकान्तारसंयुतम् ।
नगरं लोकविख्यातं देवराजपुरोपमम् ॥
नागाख्यं सम्पदोपेतं नानाविधधनैर्युतम् ।
तत्र केचित्कुळवराः कुळतन्त्रानुवर्तिनः ॥

* * * *

एतस्मिन्नन्तरे श्रीमान् वसिष्ठो ब्रह्मनन्दनः ।
आश्वासयन्महाराजं ब्राह्मणश्च बहुश्रुतम् ॥

वसिष्ठः—

शृणु राजन् प्रवक्ष्यामि शास्त्राणां निर्णयं परम् ।
शिवस्सर्वजगन्नाथस्सर्वभूतहिते रतः ॥

* * * *

**Colophon:**

इति स्कान्दे शङ्करसंहितायां श्वेतारण्यमाहात्म्ये पञ्चदशोऽध्यायः ॥

* * * *

इति श्रीस्कान्दे . . . माहात्म्ये षोडशोऽध्यायः ॥

**End:**

अतस्तत्क्षेत्रमहिमां को वा जानाति भूतले ।
इदं पवित्रं पापघ्नमायुष्यं बलवर्धनम् ॥
पावनं पावनानाञ्च पापाटव्याश्च दाहकम् ।
पठितव्यं प्रयत्नेन ब्राह्मणानां सभान्तरे ॥
बोधयेत्सर्ववर्णानां सर्वपापक्षयाय वै ।
य इदं शृणुयान्नित्यं पापानाञ्च निवृत्तये ॥
श्रोता वक्ता पाठयिता शिवलोकं व्रजन्ति वै ।

**Colophon:**

इति स्कान्दे शङ्करसंहितायां श्वेतारण्यमाहात्म्ये सप्तदशोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीअगस्त्यः—

अथान्यमपि वक्ष्यामि श्वेतारण्यस्य वैभवम् ।
स्तेयजश्च महापापं प्रणश्येच्छ्वेतकानने ॥
देवदेवप्रभावेन तीर्थानाञ्च प्रभावतः ।
श्वेतारण्यप्रभावेन कावेर्याश्च प्रभावतः ॥
सर्वलोककृतं पापं क्षिप्रमेव विनश्यति ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥

No. 2579. सङ्गमेश्वरमाहात्म्यम्.

SAṄGAMĒŚVARAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17⅝ × 1½ inches. Pages, 30. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Adhyāyas 71 to 75 in the Bhaviṣyōttara-Purāṇa. A few stanzas from the Skānda-Purāṇa are added at the end.

This gives an account of the sanctity of the Saṅgamēśvara shrine situated at the junction of the Cauvery and the Bhavāni. The holiness of some hills near it is also alluded to herein.

**Beginning:**

सूत उवाच—

इतः परं प्रवक्ष्यामि सङ्गमेश्वरवैभवम् ।
भवान्याश्च परायाश्च कावेर्याश्चैव सङ्गमे ॥
अस्ति स्थानवरं पुण्यं बदरीषण्डमध्यगम् ।
यत्र व्यासादयो विप्रा नित्यं तेपुः परं तपः ॥
वसिष्ठः काश्यपोऽत्रिश्च भरद्वाजश्च गौतमः ।
गाधिश्च जमदग्निश्च कपिलो रैभ्य एव च ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्रर्षयो महात्मानः परावरविशारदाः ।
परमार्थैकतत्त्वज्ञाः परब्रह्मणि निष्ठिताः ॥

* * * *

शिष्यप्रशिष्यसहिता वेदान्तश्रवणोत्सुकाः ।
बदरीखण्डमध्यस्था बादरायणपूर्वकाः ॥

यत्र सिध्यति गायत्री सङ्गमेशशिलातले ।
गायत्र्याख्या शिला नाम प्रसिद्धा भुवनत्रये ॥

यत्र वेदगिरिर्नाम शैलः परमपावनः ।
तस्य योजनविस्तारं दक्षिणोत्तरमायतम् ॥

अर्धयोजनमात्रन्तु पूर्वापरविमिश्रितम् ।
तस्य पर्वतमध्ये च कावेरीति महानदी ॥

भवान्यास्सङ्गमं गत्वा प्रवहिष्यति नित्यशः ।
वेदाद्रिशिखरं लिङ्गमेकाकारेण वर्तते ॥

तदेव सङ्गमेशाख्यं गायत्र्याख्या शिला तथा ।
गायत्र्याख्या शिला चैव सङ्गमेशो महेश्वरः ॥

* * * *

**Colophon:**

इति भविष्योत्तरपुराणे तीर्थखण्डे सङ्गमेश्वरमाहात्म्यं नाम **एकसप्ततितमो**ऽध्यायः ॥

**End:**

न केवलेन पुण्येन तत्पुण्यं लभते नरम्(:) ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

ये चक्रतीर्थस्य विधानमादरात् पठन्ति शृण्वन्ति च ये लिखन्ति ।
देशान्तरस्था अपि चक्रतीर्थे स्नानस्य पुण्यं समवाप्नुवन्ति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति भविष्योत्तरपुराणे तीर्थखण्डे सङ्गमेश्वरमाहात्म्ये पञ्चसप्ततितमोऽध्यायः ॥

वन्दे वेतण्डवदनं यच्छुण्डा लीलयोद्धृता ।
ब्रह्माण्डमण्टपारम्भस्तम्भतां लभते क्षणम् ॥

ऋषयः—

नानाविधानि तीर्थानि नानास्थानानि भूतले ।
तेषु तेषु पुराणेषु तानि तानि महामते ॥
त्वयेरितानि बहुशः कावेरीतीरजानि च ।
शिवविष्णोश्च पुण्यानि भुक्तिमुक्तिप्रदानि च ॥

* * * *

कोटिकालेन यत्साध्यं तद्दिनैकेन सिध्यति ।
तत्क्षेत्रस्य च माहात्म्यं पुनर्वक्तुं त्वमर्हसि ॥

---

No. **2580.** सत्यक्षेत्रमाहात्म्यम्.

SATYAKṢĒTRAMĀHĀTMYAM.

Substance, paper. Size, 12 × 9½ inches. Pages, 37. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 126*a*. The other works herein are Ānandaraṅgavijaya 1*a*, Saṭṭakavyākhyāna 52*a*, Harivilāsabhāṇa 77*a*, Śṛṅgārarājatilaka 110.

This describes the holiness of Satyakṣētra which is said to be situated three Yōjanas to the south of the Cauvery on the banks of the Puṣpabhadrā.

Adhyāyas 1 to 8 in the Brahmāṇḍa-Purāṇa.

**Beginning:**

नारदः—

ओङ्काररूपममलं श्रीरङ्गं धाम वैष्णवम् ।
द्वादशाक्षरमन्त्रेण भजनीयमिति श्रुतम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमदष्टाक्षरो नाम मन्त्रराज इति श्रुतः ।
तेनैवाराधनीयानि क्षेत्राणि वद शङ्कर ॥

श्रीशङ्करः—

साधु पृष्टं महाप्राज्ञ सर्वलोकप्रियङ्कर ।
अष्टाक्षरार्चनीयानि क्षेत्राणि शृणु नारद ॥
सत्यक्षेत्रं हरिक्षेत्रं कृष्णक्षेत्रं च नैमिशम् ।
सालग्रामश्च बदरी हस्तिशैलं वृषाचलम् ॥
शेषाद्रिं चित्रकूटश्च लक्ष्मीक्षेत्रं कुरङ्गकम् ।
कर्णिका कुम्भघोणश्च मोहिनीपुरमैन्द्रिकम् ॥
श्वेताचलमनन्ताख्यं फुल्लाख्यं घटिकाचलम् ।
सारक्षेत्रमळिन्दाख्यं कुरुक्षेत्रञ्च वारुणम् ॥
मधुरा माधवश्चैव शृङ्गोष्ठी पुरुषोत्तमम् ।
अष्टाविंशतिमेतानि क्षेत्राण्याहुः पुराविदः ॥

(नारदः—)

चन्द्रशेखर सर्वज्ञ सम्यगुक्तं त्वयाधुना ।
क्षेत्राणि विहितान्येव श्रीमदष्टाक्षरार्चने ॥
एतेषु पुण्यक्षेत्रेषु कुर्वतां सुमहत्तपः ।
कालेन भूयसा वा किं सद्यो वा स्यात्तपःफलम् ॥

महेश्वरः —

चिरेणैव तपस्सिद्धिः क्षेत्रेष्वेकस्थलं विना ।
तत्क्षेत्रमेकं जानीहि सद्यस्सिद्धिकरं परम् ॥
सत्यक्षेत्रमिति ख्यातं भोगयोगस्थलं मुने ।
उत्तरे श्वेततटिनी दक्षिणे मुक्तकार्मुका ॥
पश्चिमे प्रासशैलस्तु पूर्वे पूर्वस्थिता पुरी ।
एतावति चतुस्सीमा[न्]सत्यक्षेत्रस्य निश्चिता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्यक्षेत्रस्य माहात्म्यं साकल्येन वदाम्यहम् ।

* * * *

**Colophon :**

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे सत्यक्षेत्रमाहात्म्ये प्रथमोऽध्यायः ॥

**End :**

एवं तस्मै वरं दत्वा लक्ष्मीशोऽन्तरधीयत ।
इन्द्रद्युम्नस्तु हृष्टात्मा ययौ दिग्विजयाय सः ॥
आदौ सत्यं फणिपतिपरश्चन्द्रमा वैनतेयः
पश्चात्सत्यतपोधना बुधसुतस्तक्षकश्चाब्जनेत्रः ॥
एतेऽप्यष्टौ प्रथितयशसः स्थापकास्सत्यमूर्तेः
इन्द्रद्युम्नः पुनरपि नवीकृत्य तेभ्यो वरोऽभूत् ॥

**Colophon :**

इति ब्रह्माण्डपुराणे महेश्वरनारदसंवादे सत्यक्षेत्रस्य माहात्म्ये इन्द्रद्युम्नवरप्रदानं नाम अष्टमोऽध्यायः ॥

सत्यक्षेत्रमाहात्म्यग्रन्थस्य ग्रन्थसंख्या पञ्चाशदधिकपञ्चाशतम् ॥

The following are the Subjects detalt with:—

इति श्रीब्रह्माण्डपुराणे महेश्वरनारदसंवादे सत्यक्षेत्रमाहात्म्ये

१. प्रथमोऽध्यायः
२. अनन्तोपाख्यानम्.
३. चन्द्रोपाख्यानम्.
४. गरुडोपाख्यानम्.
५. सत्यतपोपाख्यानम्.
६. पुरूरवोपाख्यानम्.
७. तक्षकोपाख्यानम्.
८. इद्रद्युम्नवरप्रदानम्.

---

No. **2581.** सत्यक्षेत्रमाहात्म्यम्.

SATYAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 11½ × 1½ inches. Pages, 64. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. **Appearance**, new.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Adhyāyas 1 to 8 in the Brahmāṇḍa-Purāṇa.
**Same work as the above.**
**Copied by Lōkanātha Śāstrin.**

---

No. **2582.** सर्पपुरक्षेत्रमाहात्म्यम्.

SARPAPURAKṢĒTRAMĀHĀTMYAM.

Substance, palm-leaf. Size, 18¼ × 1⅝ inches. Pages, 26. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Ahyāyas 51 to 56 in the Brahmakaivarta-Purāṇa.

This gives an account of the shrine of Bhāvanārāyaṇa at Sarpapura and describes the sanctity of the sacred waters attached to it. The Sarpapurakṣētra is said to be situated on the eastern bank of the Gōdāvarī, to the west of the sea and to the east of the Tulyabhāga. It is probably what is now known as Sarpavaram in the Gōdāvari District of the Madras Presidency.

**Beginning :**

अम्बरीषः—

श्रीमत्सर्पपुरक्षेत्रमाहात्म्यं कथयस्व मे ।
कुतस्सर्पपुराख्यानं क्षेत्रस्यास्य बभूव ह ॥
सरोनाम्नां च किं मूलं भावनारायणो हरिः ।
किमर्थमत्र स्थितवानयं केन प्रतिष्ठितः ॥
एतदाचक्ष्व सर्वं मे श्रोतुं कौतूहलं मुने ।

वसिष्ठः—

राजन् सम्यक् त्वया पृष्टं शौनकाय महात्मने ।
गतेन नैमिशारण्यमगस्त्येनेदमीरितम् ॥
तदेवाहं प्रवक्ष्यामि समाहितमनाः शृणु ।
अथासीद्गोमतीतीरे नैमिशारण्यमद्भुतम् ॥
महर्षिजनसंघुष्टं फलपुष्पद्रुमाचितम् ॥
फलस्वादनतुष्टानां विहगानां रुतैर्वृतम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयूरकोकिलादीनां शुकादीनां समन्ततः ॥

* * * *

तत्रास्ते वेदतत्त्वज्ञः शौनको भगवानृषिः ।
भगवद्भक्तिसम्पन्नो जितकामो जितेन्द्रियः ॥

* * * *

दीर्घकालं क्षणमिव यापयामास शौनकः ।
ततः कदाचिदायातः कुम्भयोनिर्महातपाः ॥

* * * *

**Colophon:**

इति ब्रह्मकैवर्ते महापुराणेऽगस्त्यशौनकसंवादे सर्पपुरक्षेत्रमाहात्म्ये एकपञ्चाशोऽध्यायः ॥

**End:**

वसिष्ठः—
भुजगपतिपुराख्यक्षेत्रमाहात्म्यमुक्तं
वचनमखिलतत्त्वज्ञानपूर्णो मुनीन्द्रः ।
कलशभव उदारं त्वीरयन् शौनकार्थे
नरवरपरितोषं प्रापयामास सद्यः ॥

**Colophon:**

इति श्रीब्रह्मकैवर्ते महापुराणे अगस्त्यशौनकसंवादे सर्पपुरक्षेत्रमाहात्म्ये षट्पञ्चाशोऽध्यायः ॥

---

## No. 2583. सालग्राममहिमा.

## SĀLAGRĀMAMAHIMĀ.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 5, complete; 6th, incomplete.

Begins on fol. 15*a*. The other work herein is Sālagrāmalakṣaṇa 1*a*. A portion of the Gaṇḍakīpurāṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This describes the characteristics and the holiness of the Sālagrāma stone used as an image of Viṣṇu in the conduct of Hindu worship.

**Beginning:**

अतः परं प्रवक्ष्यामि सालिग्रामशिलां ततः ।
शिलायां द्विविधं ज्ञेयं शिलारूपे विशेषतः ॥
स्थलजं जलजश्चापि गुरुलघ्वोस्समन्वितम् ।
तूणीरं रामतूणीरं सीतातूणीरमेव च ॥
तूणीरं त्रिविधं ज्ञेयं चक्रहीने विशेषतः ।
चक्रहीने तु तूणीरं सीताचक्रं तदा भवेत् ॥
चक्रेण सहितं देवं सालग्रामाधिदैवतम् ।
सुरार्चनमिति ज्ञेयं ब्रह्मरुद्रादिसेवितम् ॥

* * * *

**Colophon:**

इति गण्डकीपुराणे सालिग्राममाहात्म्ये भगवद्गण्डकीसंवादो नाम प्रथमोऽध्यायः ॥

**End:**

दळाधिक्ये तु यन्मूर्तिस्तन्मूर्तिरधिका श्रियम्(या) ।
विज्ञेयं चक्ररूपे तु उपचक्रे विशेषतः ॥
त्रिविक्रमे तु बालश्च कूर्मे मत्स्यं त्रिविक्रमम् ।
सीतारामन्तु विज्ञेयमुपचक्राद्विशेषतः ॥

**Colophon:**

इति गण्डकीपुराणे सालिग्राममाहात्म्ये पञ्चमोऽध्यायः ॥

ततः परं प्रवक्ष्यामि दळे संख्यां विशेषतः ।
पञ्चदळेन संयुक्तं सीताचक्रमथोच्यते ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिपञ्चदळसंयुक्तं गोपालश्च ततः परम् ।
विंशद्दळेन संयुक्तं वासुदेवमथोच्यते ।।

No. **2584.** **सुब्रह्मण्यमाहात्म्यम्.**

SUBRAHMAṆYAMĀHĀTMYAM.

Pages, 42. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2411.

Adhyāyas 113 to 117 in the Sahyādrikhaṇḍa.

**This describes the holiness of the Kaumārakṣētra to be found below the Ghauts near Udipi in South Canara in the Madras Presidency.**

A portion of the Skānda-Purāṇa.

(कौमारक्षेत्रमाहात्म्यम्—).

**Beginning :**

श्रीसूत उवाच—

तत्पुरस्तान्महाक्षेत्रं कौमारमिति विश्रुतम् ।
महापातकसंहाति(रि)धाराद्वारिपरिप्लुतम् ।।
सर्वाभीष्टप्रदं नृणां दृष्टिप्रत्ययकारकम् ।
क्षेत्राणामुत्तमं क्षेत्रं भूकैलासं विदुर्बुधाः ।।
ऋषिभिः सेवितं नित्यं देवसङ्घैरुपस्थितम् ।
सर्वर्तुकुसुमोपेतं वृक्षषण्डोपशोभितम् ।
सदा कुसुमशोभाढ्यं वल्लिरल्लीक(तल्लज)शोभितम् ।।

* * * *

इत्यार्षे स्कान्दे महापुराणे सनत्कुमारसंहितायां सह्याद्रिखण्डे सुब्रह्मण्यमाहात्म्ये त्रयोदशोत्तरशततमोऽध्यायः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

इति भक्तपराधीनः जगौ साम्बस्तथा द्विजाः ।
महापूजाश्च कृत्वासौ तदोत्सवमकारयत् ॥
दत्वा दानानि बहुशः सन्तर्प्य द्विजसत्तमान् ।
सहदेवयुतः साम्बो ययावश्वानुगो बली ॥

श्रीसूतः—

इतीदं कथितं विप्राः क्षेत्रस्यास्य च वैभवम् ।
महापापहरं पुण्यं श्रवणात्कुष्ठनाशनम् ॥
सर्वदारिद्र्यशमनं सर्वसम्पद्विधायकम् ।
श्रुत्वेदं पुण्यमाख्यानं कौमारक्षेत्रशंसनम् ॥
भुक्त्वा भोगानिह(हा)त्रापि परत्र लभते गतिम् ।

**Colophon:**

इत्यादिमहापुराणे स्कान्दे सनत्कुमारसंहितायां सह्याद्रिखण्डे सप्तदशाधिकशततमोऽध्यायः ॥

सुब्रह्मण्यमाहात्म्यं संपूर्णम् ॥
वेङ्कटेश्वरस्य स्वहस्तलिखितम् ॥

---

## No. 2585. सूतगीता.

## SŪTAGĪTĀ.

Pages, 65. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2481.

Adhyāyas 1 to 8.

A portion of the Skānda-Purāṇa and is found in the Sūtasaṁhitā. A work establishing the superiority of Śiva over the other deities of the Hindu Triad.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

ऐश्वरं परमानन्दमनन्तं सत्यचिद्घनम् ।
आत्मत्वेनैव पश्यन्तं निस्तरङ्गसमुद्रवत् ॥
निर्विकल्पं सुसम्पूर्ण(सु)प्रसन्नं शुचिस्मितम् ।
भासयन्तं जगद्भासा भानुमन्तमिवापरम् ।
प्रणम्य मुनयस्सूतं दण्डवत्पृथिवीतले ।
कृ(ता)ञ्जलिपुटा भूत्वा तुष्टुवुः परया मुदा ॥
नमस्ते भगवञ्छम्भुप्रसादादात्तवेदन ।
नमस्ते भगवञ्छम्भोश्चरणाम्भोजवल्लभ ॥
नमस्ते शम्भुभक्तानामग्रगण्य समाहित ।

* * * *

व्यासविज्ञानदीपस्य वर्त्म(र्ति)भूताय ते नमः ।
प्रमाणमुक्तामालायाः सूत्रभूताय ते नमः ॥
अस्माकं भववृक्षस्य कुठाराय नमोऽस्तु ते ।
कृपासागर सर्वेषां हितप्रद नमोऽस्तु ते ॥

* * * *

अस्माकं गुरवे साक्षात् नमः स्वात्मप्रदायिने ।
एवं गोत्रर्षयः स्तुत्वा सूतं सर्वहितप्रदम् ॥
पूजां प्रचक्रिरे सर्वे सर्वलोकहितैषिणः ।
सोऽपि सूतः स्वतस्सिद्धस्वरूपानुभवात्परात् ॥
उत्थाय स्वगुरुं व्यासं दध्यौ सर्वहिते रतम् ॥
अस्मिन्नवसरे व्यासः साक्षात्सत्यवतीसुतः ।
भस्मोद्धूळितसर्वाङ्गः त्रिपुण्ड्राङ्कितमस्तकः ॥
कृष्णाजिनी सोत्तरीयो आषाढेन विराजितः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुद्राक्षमालाभरणस्तत्रैवाविरभूत्स्वयम् ॥

तं दृष्ट्वा देशिकेन्द्राणां देशिकं करुणाकरम् ।
सूतस्सत्यवतीसूनुं स्वशिष्यैस्सह सत्तमैः ॥

प्रणम्य दण्डवद्भूमौ प्रसन्नेन्द्रियमानसः ।
यथार्हं पूजयामास दत्वा चासनमद्भुतम् ॥

भगवानपि सर्वज्ञस्साक्षात्सत्यवतीसुतः ।
प्राह गम्भीरया वाचा स्वशिष्यम्प्रति सत्तमः ॥

भद्रमस्तु सुसम्पूर्णं सूत शिष्य ममास्तिक ।
तवैषामपि किं कार्यं मया तद्ब्रूहि मेऽनघ ॥

एवं व्यासवचः श्रुत्वा सूतः पौराणिकोत्तमः ।
उवाच मधुरं वाक्यं लोकानां हितमुत्तमम् ॥

इमे हि मुनयश्शुद्धास्सत्यधर्मपरायणाः ।
मद्गीताश्रवणे चैषामस्ति श्रद्धा महत्तरा ॥

भवत्प्रसादे सत्येव शक्यते सापि भाषि(तुम्) ।
यदि प्रसन्नो भगवान्वदेत्याज्ञापयाद्य माम् ॥

इति सूतवचः श्रुत्वा भगवान् करुणानिधिः ।
त्वदीयामद्य तां गीतां व(दे)पामर्थिनां शुभाम् ॥

* * * *

**Colophon :**

इति सूतसंहितायां सूतगीतासूपनिषत्सु प्रथमोऽध्यायः ॥

श्रीसूतः—

शृणुत ब्रह्मविच्छ्रेष्ठा भाग्यवन्तस्समाहिताः ।
वक्ष्यामि परमं गुह्यं विज्ञानं वेदसम्मितम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

यानुभूतिरमला सदोदितां वेदमाननिरता शुभावहा ।
तामतीवसुखदामहं शिवां केशवादिजनसेवितां तु(नु)मः ॥
वेदपद्मनिकरस्य भास्करं देवदेवसदृशं घृणानिधिम् ।
व्यासमिष्टफलदं गुरुं नुमः शोकमोहविषवेगभेषजम् ॥
ये वेदवेदान्तधना महाजनाः
शिवाभिमानैकनिरस्तकिल्बिषाः ।
नमामि वाचा शिरसा धिया च तान्
भवाहिवेगस्य निवाकरा(रका)नहम् ॥

**Colophon:**

इत्यादिमहापुराणे श्रीस्कान्दे सूतसंहितायां यज्ञवैभवखण्डे उपरिभागे सूतगीतासूपनिषत्सु अष्टमोऽध्यायः ॥

---

No. **2586.** सूतगीताव्याख्या.

SŪTAGĪTĀVYĀKHYĀ.

Pages, 62. Lines, 22 on a page.

Begins on fol. 128*b* of the MS. described under No. 2482.

Complete.

A commentary on the Sūtagītā by Mādhavācārya.

**Beginning:**

ओम् । अथ विद्यार्थिनां गुरुनमस्कारः कर्तव्यः इति व्युत्पादयितुं सूतगीतां श्रोतुकामैः नैमिशीयैः कृतो नमस्कार इति उपरि(नि)बध्नाति ऐश्वरमिति । अनन्तमित्यादिविशेषणं सकृदुक्तार्थम् । आत्मत्वेनैवेति । सच्चिदानन्दैकरसम् अद्वितीयं यत्पदं तदात्मभावेनैव साक्षात्कुर्वन्तम् अत एव सुसम्पूर्णम् अपरिच्छिन्नम् । अवाप्तनिरतिशयानन्दरूपतया सुप्रसन्नम् अत एव शुचिस्मितम् । आत्मीयतेजसा कृत्स्नं जग-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्भासयन्तं तदानीमपरं सूर्यमिव स्थितम् । एतावद्भिर्विशेषणैः तस्य वक्ष्यमाणार्थोपदेशसामर्थ्यप्रतिपादनेन नमस्कारयोग्यत्वमवधारितम् । नमस्ते भगवन्नै(न्नित्यादि । नै)मिशीयैः ऋषिभिः कृतं सूतस्तोत्रम् । अविज्ञातदोषायेति । अविद्यमानदोषायेत्यर्थः । प्रश्नं प्रचक्रिरे इति सूतगीताविषयंप्रश्नं कृतवन्त इत्यर्थः ॥

**End:**

तन्त्रेषु दीक्षित इत्यादिवैदिकप्रशंसापरम्परा गमिकैरुपजीव्यत्वादपि वेदमार्गः श्रेयान् इत्याह वेदोक्तमिति । इत्थं ज्ञानयज्ञवैभवं प्रतिपाद्य मानसवाचिककायिकभेदेनावस्थितसकलयज्ञवैभवं प्राक् प्रतिपादितं निगमयति यज्ञवैभवेति । प्राज्ञां संहितां परिसमापयन् तस्याः फलमुक्ते(क्तमि)ति तत्पाठश्रवणादेः फलमाह मद्रो(द्रु)क्ते(ति) । उत्पन्नविद्यादार्ढ्याय प्रबन्धावसानेऽपि परापरगुरुनमस्कारं करोति तस्य (सत्य)बोधन(सुखे)त्यादिना ॥

इत्यष्टमः ॥

**Colophon:**

इति श्रीमत्र्यम्बकपादाब्जसेवाधुरन्धरेण सेवापरायणेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखण्डस्य उपरिभागे सूतगीतातात्पर्यदीपिकायाम् अष्टमोऽध्यायः ॥

सूतसंहिताव्याख्यानं सम्पूर्णम् ॥

---

## No. 2587. सेतुमाहात्म्यम्.

## SÊTUMĀHĀTMYAM.

Substance, palm-leaf (Śrītāla). Size, 14⅛ × 1⅞ inches. Pages, 500. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 52.

A portion of the Skanda-Purāṇa treating of the holiness of Sētu near Rāmēśvaram.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

विघ्नाचलभिदादक्षो विघ्नेशो भगवानयम् ।
सर्वस्माद्दुरितादस्मान् पातु सर्वत्र सर्वदा ॥

नैमिशारण्यनिलया मुनयश्शौनकादयः ।
अष्टाङ्गनिरतास्सर्वे ब्रह्मज्ञानैकतत्पराः ॥

मुमुक्षवो महात्मानो निर्ममा ब्रह्मवादिनः ।
धर्मज्ञा अनसूयाश्च सत्यव्रतपरायणाः ॥

जितेन्द्रिया जितक्रोधास्सर्वभूतदयालयाः ।
भक्त्या परमया विष्णुमर्चयन्तस्सनातनम् ॥

तपस्तेपुर्महापुण्ये नैमिशे मुक्तिदायिनि ।
एकदा ते महात्मानस्समाजं चक्रुरुत्तमम् ॥

कथयन्तो महापुण्याः कथाः पापप्रणाशिनीः ।
मुक्तिं मुक्तेरुपायञ्च जिज्ञासन्तः परस्परम् ॥

षड्विंशतिसहस्राणामृषीणां भावितात्मनाम् ।
तेषां शिष्यप्रशिष्याणां सङ्ख्या कर्तुं न शक्यते ॥

अत्रान्तरे महाविद्वान् व्यासशिष्यो महामुनिः ।
अगमन्नैमिशारण्यं सूतः पौराणिकोत्तमः ॥

तमागतं मुनिं दृष्ट्वा ज्वलन्तमिव पावकम् ।
अर्घ्याद्यैः पूजयामासुः मुनयश्शौनकादयः ॥

सुखोपविष्टं तं सूतमासने परमे शुभे ।
पप्रच्छुः परमं गुह्यं लोकानुग्रहकाङ्क्षया ॥

सूत धर्मार्थतत्त्वज्ञ स्वागतं मुनिपुङ्गव ।
श्रुतवांस्त्वं पुराणानि व्यासात्सत्यवतीसुतात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्सर्वपुराणानामर्थज्ञोऽसि महामुने ।
कानि क्षेत्राणि पुण्यानि कानि तीर्थानि भूतले ॥
कथं वा लप्स्यते मुक्तिः जीवानां भवसागरात् ।
कथं हरे हरे वापि नृणां भक्तिः प्रजायते ॥
केन सिध्येत तपसः फलं च त्रिविधात्मनः ।
एतच्चान्यच्च नस्सर्वं कृपया वद सूतज ॥
ब्रूयुः स्निग्धाय शिष्याय गुरवो गुह्यमप्युत ।
इति पृष्टस्तदा सूतो नैमिशारण्यवासिभिः ॥
वक्तुं प्रचक्रमे नत्वा व्यासं स्वगुरुमादितः ।

श्रीसूतः—

सम्यक्पृष्टमिदं विप्रा युष्माभिर्जगतो हितम् ।
रहस्यमेतद्युष्माकं वक्ष्यामि शृणुतादरात् ॥
मया नोक्तमितः पूर्वं कस्यापि मुनिपुङ्गवाः ।
मनो नियम्य विप्रेन्द्राः शृणुध्वं भक्तिपूर्वकम् ॥
अस्ति रामेश्वरं नाम रामसेतौ प्रतिष्ठितम् ।
क्षेत्राणामपि सर्वेषां तीर्थानामपि चोत्तमम् ॥
दृष्टमात्रे रामसेतौ मुक्तिस्संसारसागरात् ।
हरे हरौ च भक्तिः स्यात् तेन पुण्यसमृद्धिदा ॥
